अथोद्भटैश्चारभटैस्तुरुष्काश्चण्डासिदण्डैरभिताड्यमानाः ।
नेशुः समन्ताल्लगुडप्रपातैर्यथा कुलान्येकविलोचनानाम्[1] ॥ ३७ ॥
स्यात् पेषयन्त्रान्तरसंस्थितानां यादृश्यवस्था हरिमन्थकानाम् ।
तादृश्यभूद् भूपतिचाहमानरणाश्रयाणां यवनेश्वराणाम् ॥ ३८ ॥
दृष्ट्वा विशीर्णं युधि जीर्णपर्ण[2]मिवात्मनीनं शिबिरं शकेशः ।
क्रोधादधाविष्ट महिष्ठमुष्टिधृतासिदण्डः स्वयमाशुचण्डः ॥ ३९ ॥
तमापतन्तं प्रसमीक्ष्य चाहमानोऽप्यधावद् धृततीव्रवेगः ।
अन्तःस्फुरत्क्रोधकृशानुकीलानुकारिरागारुणदारुणाक्षः ॥ ४० ॥
करोदरोद्दामिमहासिदण्डच्छलोल्लसत्पुष्करदुर्निरीक्षौ ।
अभ्युद्यतौ[3] वन्यगजौ किमेतौ वितर्क्यमाणाविति वीरवारैः ॥ ४१ ॥
प्रपूरयन्तौ भुवनोदराणि पादाभिघातप्रतिजातशब्दैः ।
मिथःप्रहारप्रथनप्रवीणौ युद्धं चिरायातनुतां क्रुधा तौ ॥ ४२ ॥
एवं नृदेवो युधि युध्यमानः प्रसह्य किंचिच्छलमाकलय्य ।
शकाधिराजं विनियम्य सम्यगपूपुरत् स्वां विधिवत् प्रतिज्ञाम् ॥ ४३ ॥
महीमहेन्द्रान् शरणागतांस्तान् स्वे स्वेऽधिकृत्वा विषये नयेन ।
ततः स मानी निजराजधानीमापद् विमानीकृतशत्रुजातः ॥ ४४ ॥
वासांसि दत्त्वा सुरलोकलोभिमहांसि तस्मा इति राड् मुमोच ।
हतेऽत्र[4] को नाम पुनर्विधित्सुरमायया सङ्गररङ्ग[5]मेवम् ॥ ४५ ॥
पृथक् पृथक् सङ्गररङ्गभङ्ग्यैत्थं सप्तकृत्वः क्षितिवासवेन ।
विनिर्जितोऽसौ यवनावनीशो मम्लौ च जग्लौ च भृशं नृशंसः ॥ ४६ ॥
अथाऽसहस्तं स्वबलच्छलाभ्यां जेतुं शकेशः शकचक्रकेतुम् ।
बलाभिलाषी प्रचचाल चन्द्र इव ग्रहेशं प्रति खर्परे[6]शम् ॥ ४७ ॥
काम्बोजलङ्काहयभीमभिल्लवङ्गादिदेशाधिपपेशलश्रि ।
शिष्टाष्टलक्षप्रमितामिताहिकान्तत्वराजित्वरवाजिराजि ॥ ४८ ॥
सम्पादितारातिविपत्तिपत्तिकोट्याकुलं शौर्यकलं[7] बलं प्राक् ।
उत्कात्मवार्ताय नृपाय तस्मै घटैकदेशीयनृपो ददेऽथ ॥ ४९ ॥

---

1 K °विलोकनानां । 2 P जीर्णकल्प° । 3 K अभ्युद्यतौ । 4 P हा तत्र । 5 P सङ्गरमेव मुखैः । 6 P षर्प्प° । 7 K सौर्यकलं ।

सद्यस्ततोऽसौ प्रसरत्प्रसादाद् बलं समासाद्य सहाबदीनः ।
न केनचिज्ज्ञातचरः समेत्य जग्राह दिल्ली[2]मतिविग्रहेण ॥ ५० ॥
ततो भियाऽभ्यस्तपलायनानां हता हता हेतिकृतारवाणाम् ।
भग्नप्र[3]भाणां मुखतो जनानां समागमं शत्रुपतेर्निशम्य ॥ ५१ ॥
रणे मयाऽसौ शतशो जितोऽपि किं चापलं बाले[4] इवातनोति ।
वहन्नहङ्कारमिति क्षितीशः प्रचेलिवांस्तुच्छपरिच्छदोऽपि ॥५२॥ युग्मम् ।
प्रागल्भतद्धस्तभृशानुभूतभीस्तं समीक्ष्येति शकः प्रदध्यौ ।
अस्माकमेकाक्यपि नैष जेतुं शक्यो मृगाणामिव पञ्चवक्त्रः ॥ ५३ ॥
ततो निशीथे निभृतान्धकारे सम्प्रेषितैः प्रत्ययितैः शकेशः ।
अबीभिदत् पुष्कलनिष्कदानैस्तस्याश्वपालं सह [5]तौर्यिकैः सः ॥ ५४ ॥
दिष्ट्या समेता भुवमस्मदुक्ता यास्यन्ति वेश्मानि परं निजानि ।
हन्मो वितन्मोऽद्य दृढं स्वराज्यमित्युक्तियुक्तिप्रथका मिथोऽपि ॥५५॥
आकाशशेषे तुहिनांशुबिम्बे प्रकाशकल्पेऽतुहिनद्युतौ च ।
शकाः समन्तान्निभृतं समेत्य पृथ्वीपतीये शिबिरे निपेतुः ॥५६॥ युग्मम् ।
गृहाण शस्त्रं निगृहाण शीघ्रं प्रयात एवैष श[6]कोऽग्रतस्ते ।
आहन्म एतान् निहता वर्तैतैरित्थं भटप्रोद्भटवाक्यचित्रे ॥ ५७ ॥
प्रवर्त्तमाने समरे समन्ताच्छकेन नुन्नेन तदाश्वपेन ।
तुरङ्गमस्तेन नृपाय नाटारम्भाभिधानोऽश्वयते द[7]दे सः ॥ ५८ ॥
तमश्वमारूढममुं विभाव्य शकास्तचित्ता अथ तौर्यिकास्ते ।
अवीवदन् वीरवरप्रियाणि मृदङ्गभेरीपटहादिकानि ॥ ५९ ॥
अभ्युन्नताम्भोधरधीरगर्जिवि[8]तर्जिनं तूर्यरवं निशम्य ।
प्रनर्तितुं बर्हणवत् प्रवृत्ते ताक्ष्र्ये विलक्षः क्षणमास भूपः ॥ ६० ॥
भज स्थिरत्वं व्रज मा विषादं इत्युक्तिभाजो यवना जवेन ।
किंकार्यतामूढममुं तथास्थमवेष्टयन् द्राक् चटका इवाहिम् ॥ ६१ ॥
भुवं स्पृशन् दक्षिणपादजान्वङ्गुष्ठेन चाकुञ्चितवामपादः ।
वहन् कृ[9]पाणावरणं च हस्तेऽथोत्प्लुत्य ससेनिंषसाद भूमौ ॥ ६२ ॥
भङ्ग्या भ्रुवः कांश्चन कांश्चिदुग्रासैर्वेल्लनैः कांश्चन सिंहनादैः ।
वित्रासयंश्चित्रविधायि युद्धं चिराय चक्रे भटचक्रशक्रः ॥ ६३ ॥

---

1 P साम्राज्यमा° । 2 P दिल्ली° । 3 K °प्रमेभ्या° । 4 K बालकवत्तनोति ।
5 K तूर्यिकैः । 6 K शकः पुरस्ते । 7 K ददान । 8 K °विर्जितसूर्य° । 9 K कृपाणं वरणं च भूपो ।

पृष्ठे शकस्तमवुपेत्य कश्चित् प्रक्षिप्य कण्ठे धनुराततज्यम् ।
अपीषतद् भूपतिमाशु पश्चात् सम्भूय सर्वे तरसा बबन्धुः ॥ ६४ ॥

अथ स धरणिकान्तः सद्गुणालीनिशान्तः
प्रतिहतखलजातः प्रौढराढावदातः ।
विधिविलसितयोगादात्तबन्धः शकेन्द्राद्
द्विरपि रतिमहासीद् भोजने जीवने च ॥ ६५ ॥

यवनाधिपदेशमनुप्रहितं विभुनैव पुरोदयराजभटम् ।
समुपेतमवेक्ष्य तदा शकराट् प्रविवेश पुरीमुररीकृतभीः ॥ ६६ ॥

कष्टं निशम्योदयराज ईशितुः प्राप्तं तथा नाहमभूवमित्यथ ।
मूर्धानमुच्चैरधुनोन्मुहुर्मुहुः शल्यं तदुद्धर्तुमिव स्वतो हृदः ॥ ६७ ॥

संत्यज्यैनं व्यसनपतितं स्वामिनं चेद् व्रजामि
क्रीडां व्रीडा कलयति तदा गौडगोत्रे मुखं मे ।
इत्थं ध्यात्वा शकपतिपुरीं सन्निरुध्याभितोऽसौ
तस्थौ पक्षद्वयमनुदिनं युध्यमानो हठेन ॥ ६८ ॥

म्लेच्छावनीपमिममेवमन्यदा कश्चिज्जगाद सविषादमानसः ।
त्वामेषकोऽमुचदनेकशो रणे त्वं नैकवेलमपि हा! जहास्यमुम् ॥ ६९ ॥

धर्मोचितामपि तदेति तद्गिरं श्रुत्वा भृशं स कुपितो नृशंसधीः ।
उच्यन्त एत इत एव विद्रवद्राजन्यकोपनिषदस्तमित्यवक् ॥ ७० ॥

वीरेन्द्रेष्वथ दत्तदृष्टिषु धरापीठे ह्रिया प्राक् सतां
सान्द्राश्रुस्रुतिसिक्तशोकलतिकाकन्देषु वृन्देषु च ।
आनीयैष नृपं तमुग्रतररुट् दुर्गान्तरेऽचीचयत्
कार्याकार्यविचारणान्धबधिरा हा! हाऽधमाः सर्वतः ॥ ७१ ॥

शैवा यत् 'शिव'मामनन्ति 'सुगतं' बौद्धा यदाचक्षते
'सर्वज्ञं' यदुदाहरन्ति नितमामर्हन्मते छेकिलाः ।
तद्ब्रह्माद्भुतचिन्मयं स्थिरमनास्तत्र स्थितोऽसौ स्मरन्
पृथ्वीराजनृपो नृपालितिलको लेभे शिवं शाश्वतम् ॥ ७२ ॥

पृथ्वीपतेरिति विनाशगतिं निशम्य दूनः स गौडकुलपङ्कजबालसूर्यः ।
स्थानं निजं तदुपगम्य बलं स्वयं च युध्वा दिवस्पतिपदं तरसाऽऽससाद ॥ ७३ ॥

---

1 K [illegible] । 2 K तदुस्थातु° । 3 P राजश° । 4 K लज्जया क्षितितलविन्यस्ताक्षिषु [illegible] । 5 K [illegible] । 6 K °मतच्छे° । 7 K पृथ्वीपालनृपालमाल° । 8 K तदुपनीय ।

अधिगत्य भूपतिविपत्तिमिति स्रवदश्रुमिश्रनयनस्तदनु ।
विहितौर्ध्वदैहिक इलामखिलां स्वकरे चकार हरिराजनृपः ॥ ७४ ॥

यन्नामप्रतिवर्णसंश्रुतसुधापूरापतद्‌यद्‌यशः-
कर्पूरोरुरजोभरप्रसृमराविर्भावविपङ्काकुले ।
वाणीनां पथि नाभजन्त पथिकीभावं यदीया गुणा
औदार्यप्रमुखाः किमद्भुतमहो ! तत्तत्कवीनामपि† ॥ ७५ ॥

यत्पाणिं सरसीरुहं किल रमा भेजेऽसिदम्भाच्च तां
रागादन्वगमत् स्वयं हरिरभूत् सूनुः प्रतापस्तयोः ।
यः श्रुत्वाऽग्रजवैरिणं स्मररिपुं कोपात् तथाऽतीतपत्
नालं दूरयितुं यथा क्षणमपि स्वस्मात् स गङ्गामभूत्† ॥ ७६ ॥

भूचक्रे स्वयशोऽद्रितुङ्गशिखरादभ्युद्गतैरंशुभि-
र्ब्रह्माण्डाहतिभग्नवेगविधुरैः पश्चान्निवृत्तैः पुनः ।
देवानामपि कुम्भजन्ममुनये दातुं किमर्थं व्यधा-
न्नित्योल्लासिविकासिकाससुभगंभूष्णुश्रियं यो दिवम् ॥ ७७ ॥

विधुरतिविधुरश्रीर्निस्तरङ्गा च गङ्गा
कनकगिरिरगौरस्त्यक्तगर्वश्च शर्वः ।
कुमुदममदमैन्द्रः सिन्धुरो नोद्धुरौजा
अजनि लसति विष्वग्द्रीचि यत्कीर्तिपूरे ॥ ७८ ॥

यान् यान् व्यत्यगमन् नृपान् कृतनतीस्ते ते प्रकाशं ययु-
र्यान् यान् प्रत्यचलच्च भेजुरभितस्ते ते क्षणान्म्लानताम् ।
यस्य क्षोणिपतेः प्रतापवसतेर्दिग्जैत्रयात्रोत्सवे
सेना कापि न वा व्यराजततमां संचारिणी दीपिका‡ ॥ ७९ ॥

कर्तुं दिग्जयमुद्यतस्य निखिलं क्षोणीतलं क्रामता-
मश्वानां गतिभङ्गतामुपनयन् वेगोत्तरं धावताम् ।
वारांराशिरसावजायततमां यस्यान्तरायः कवे-
र्वाचां वाच्यविचारभास्वररुचां गोष्ठीशठानामिव‡ ॥ ८० ॥

हत्वाऽनेन विपक्षभूमिपतयः स्ववैभवं लम्भिता
अस्येमामुपकारितां स्वहृदये सम्भाव्य तेऽपि क्षणात् ।
सच्चक्रुर्गजवाजिराजिवसुधाकोशादिदानैरमुं
वन्ध्यं सारपरोपकारजनितं पुण्यं न शत्रावपि‡ ॥ ८१ ॥

---

† इदं पद्यद्वयं नोपलभ्यते K आदर्शे । 1 K °दभ्युद्यतै° । 2 K किमर्थे । 3 K शुभगं । 4 K गर्वः स । 5 K सिन्धुरा । ‡ एतच्चिह्नाङ्कितं पद्यत्रयं K आदर्शे नोपलभ्यते ।

हुत्वा यो निजकोपपावकमुखे द्विड्वीरहव्यं शुचा-
क्रन्दत्तद्रमणीविलोचनगलद्बाष्पाम्बुभिर्भूरिभिः ।
भूचक्रेऽत्र तथातिवृष्टिमनिशं प्रोल्लासयामासिवा-
नाशिश्राय यथा विनाशमचिरादन्यायबीजाङ्कुरः ॥ ८२ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के श्रीपृथ्वीराजसङ्ग्रामवर्णनो नाम तृतीयः सर्गः ॥ ३ ॥

अथ चतुर्थः सर्गः ।

कुर्वन् कुवलयोल्लासमसन्तापकरैः करैः ।
वेला इव तुषारांशुः स प्रजा अभ्यवीवृधत्[1] ॥ १ ॥
राज्यं निर्विशतेऽन्येद्युर्हरिराजमहीभृते ।
प्रीतिव्रततिवृद्ध्यर्थं श्रीगूर्जर[2]नरेश्वरः ॥ २ ॥
विस्फुरच्चुक्रसम्बन्धाः समुन्नतपयोधराः ।
वर्षा इवोल्लसद्धर्षाः प्रेषयामास नर्त्तकीः ॥ ३ ॥ युग्मम् ।
अन्यदा स्फुरितोदारस्फारशृङ्गारभासुरे ।
नृपे च नृपलोके च स्फीतप्रीतौ निषेदुषि ॥ ४ ॥
वाद्यमानेषु वाद्येषु तालमेलमनोहरम् ।
गायनेषु च गायत्सु कोकिलालापकोमलम् ॥ ५ ॥
दृढयौवनसोपानाः शृङ्गाररसवारयः ।
विस्फुरद्धालसेवाला विलासोल्लासवीचयः ॥ ६ ॥
पीनस्तनोल्लसत्कोका विस्मेरवदनाम्बुजाः ।
चलद्[3]दृक्पृथुलोमानः सुमेषोर्दीर्घिका इव ॥ ७ ॥
वात्या व्यतिकरो[4]द्धूतकदलीदलवत् तनुम् ।
वेल्लयन्त्यो भ्रमन्तश्च चक्रजीविकचक्रवत् ॥ ८ ॥
कदाचिद् भुजयोर्मूलं कदाचिन्नाभिमण्डलम् ।
कदा[5]चन कुचौन्नत्यं दर्शयन्त्यो मुहुर्मुहुः ॥ ९ ॥
लसल्लावण्यलीलाभिर्लोकलोचनलोभनाः ।
मूर्त्ताः कन्दर्पदर्पास्ताः प्रावर्तन्त प्रनर्तितुम् ॥१०॥-सप्तभिः कुलकम् ।

---

1 K अभ्यवर्धयत् । 2 P गुर्जर° । 3 P चलदृक् । 4 P °करावृत° । 5 K कदाचित् कुचपीनत्वं ।

तस्याजन्मनमेवासीदासां लावण्यवारिधौ ।
मग्ने दृग्मनसी यस्य निर्यातुं शक्ततां गते ॥ ११ ॥
इति तासां स्फुरद्भासां नाट्यं पश्यन्नहर्निशम् ।
क्षणमात्रमपि त्यक्तुं नालंभूष्णुरभूदयम् ॥ १२ ॥
ततोऽसौ गीतनृत्तादिदक्षदानपरायणः ।
मितंपचत्वं शिश्राय सेविनां जीविकार्पणे ॥ १३ ॥
वार्तामलभमानास्ते तस्य सेवामहासिषुः ।
स्वार्थसिद्धिं विना [3]कोऽपि किं स्यात् कस्यापि सेवकः ॥ १४ ॥
राज्यस्थितिं तथाभूतां दर्शं दर्शं प्रजा अपि ।
विरज्यन्ते स्म तस्मात् प्राक् स्त्रितमा दुर्भगादिव ॥ १५ ॥
एतत् स्वरूपं विज्ञाय प्राग्वैरी शकनायकः ।
ससैन्योऽभ्येत्य *ढिल्लीतो* देशसीमानमानशे ॥ १६ ॥
काकनाशं ततो भीत्या प्र[5]नष्टजनताननात् ।
सौख्यसर्वङ्कषं श्रुत्वाऽऽगमनं शत्रुभूपतेः ॥ १७ ॥
आरभ्य *पृथ्वीराजेन्द्र*नाकलोकाप्तिवासरम् ।
अकृत्यमिति संत्यक्तशकाननविलोकनः ॥ १८ ॥
सान्तःपुरपुरन्ध्रीकस्ततोऽसौ ज्वलनेऽविशत् ।
भाविनी यादृशी कीर्तिर्मतिः स्यात् तादृशी नृणाम् ॥ १९ ॥
—त्रिभिर्विशेषकम् ।
नाकलोकंपृणेऽमुष्मिन्नम्लासीत् तत्परिच्छदः ।
अ[6]स्तङ्गते जगद्दीपे स्मेरः किं कमलाकरः ? ॥ २० ॥
अपुत्रत्वेन भूभर्तुः शत्रोरागमनेन च ।
चिन्ताचान्तहृदो बाढं मन्त्रयन्ति स्म मन्त्रिणः ॥ २१ ॥
अपत्यं भूपतेर्नास्ति भटा न च रणोद्भटाः ।
विपक्षस्तु महावीर्यः कथं रक्षि[7]ष्यते पुरम् ? ॥ २२ ॥
तत् त्यक्त्वा नीवृतं यामो *रणस्तम्भपुरं* प्रति ।
सूरोऽपि बलवैकल्यात् श्रयेद् द्वीपान्तरं न किम् ? ॥ २३ ॥
तत्रास्ति *पृथ्वीराजस्य* प्राक् पित्राऽतो निरासितः ।
पौत्रो *गोविन्दराजाख्यः* स्वसामर्थ्यात्तवैभवः ॥ २४ ॥

---

1 K दृग्मनसे । 2 K दोष्मतां । 3 K किं स्यात् कोऽपि कस्यापि वल्लभः । 4 P ढिल्ली° । 5 K पलायितजनाननात् । 6 K अस्तमीयुषि मार्तण्डे । 7 K [illegible] ।

स्वस्वामिवंशकासारहंसं तं भूपमाश्रिताः ।
कीर्तिपात्रीभवन्तोऽवतिष्ठेम ह्यकुतोभयाः ॥ २५ ॥

मन्त्रयित्वेति भूपीयं सर्वं कोशबलादिकम् ।
सहाऽऽदाय चलन्ति स्म रणस्तम्भपुरं प्रति ॥ २६ ॥

दावपावकवद् वार्क्ष्यं ज्वालयन् देशमुद्धसम् ।
शकः पश्चादुपागत्याऽजयमेरुपुरं ललौ ॥ २७ ॥

अथ प्राप्य रणस्तम्भं पुरं गोविन्दभूपतेः ।
समगंसत ते सर्वे वृत्तान्तं च न्यगोदिषुः ॥ २८ ॥

पितृव्यस्य तथाभूतं मृत्युं श्रुत्वा धराधिपः ।
वाचामगोचरं कष्टं कलयामास मानसे ॥ २९ ॥

स्मृतिस्मृतिपरित्यक्तशोकः कृत्वौर्ध्वदैहिकम् ।
धीसखाँस्तान् यथायोग्यकार्येणायोजयन्नृपः ॥ ३० ॥

पराभवन् द्विषच्चक्रं प्रभवन् न्यायवृद्धये ।
सौख्यं चानुभवन् स्फीतं स प्रजाश्चिरमन्वशात् ॥ ३१ ॥

गोविन्दे दिविषद्वृन्दे सञ्चारयति चातुरीम् ।
तानवं शात्रवं निन्ये श्रीमद्बालणभूपतिः ॥ ३२ ॥

घनवत् समरे यत्र शरासारं वितन्वति ।
नाशेनैवाऽभवद् व्यक्ता रिपूणां राजहंसता ॥ ३३ ॥

वर्षत्यपि भृशं बाणधाराभिर्यद्धनुर्घने ।
चित्रं विच्छायतामेव भेजिरे शत्रुभूभृतः ॥ ३४ ॥

सत्वरं जित्वरं वीक्ष्य समरे यमरिव्रजाः ।
अभिलेषुः सपक्षत्वं न वरं नाशहेतवे ॥ ३५ ॥

नाम्नि धाम्नि च संक्षेपं विधित्सन् यो विरोधिनाम् ।
अवनीपालतां हित्वा द्राग् वनीपालतां ददौ ॥ ३६ ॥

सदा नभोगौ गोचक्रमण्डनौ पापखण्डनौ ।
उभावभूतां तत्पुत्रौ सूर्याचन्द्रमसाविव ॥ ३७ ॥

गुणश्रेष्ठस्तयोर्ज्येष्ठः ख्यातः प्रल्हादनाह्वयः ।
द्वैतीयीको द्वितीयश्रीर्वाग्भटः प्रतिपद्भटः ॥ ३८ ॥

---

1 K न्यगादिषु । 2 तथाभूतं पितृव्यस्य मृत्युं श्रुत्वाऽथ पार्थिवः । 3 P धीसत्वा° । 4 K सातं । 5 K भूपतेः । 6 K विविित्सुः ।

समं वितन्वतोः क्रीडां सममभ्यस्तयोः कलाः ।
अवर्द्धिष्ट तयोः प्रीती रामलक्ष्मणयोरिव ॥ ३९ ॥
वीक्ष्याऽन्यदा नृपो मूर्ध्नि पलितङ्कुरणीं जराम् ।
शमति स्माऽऽशु भोगेभ्यो योगेभ्यः श्लाघते स्म च ॥ ४० ॥
ततोऽनुशास्य विधिना भूपः पुत्रावुभावपि ।
न्यधात् *प्रल्हादनं* राज्ये प्रधानत्वे च *वाग्भटम्* ॥ ४१ ॥
स्वयं स्थित्वा कियत्कालं तयोः प्रीतिमिवेक्षितुम् ।
प्रान्ते स्मरन् परब्रह्म बभूवे दिविषत्पदम् ॥ ४२ ॥
कृत्वौर्ध्वदैहिकं वप्तुस्ततः *प्रल्हादनो* नृपः ।
अरञ्जयत् प्रजा नाट्योपनिषज्ज्ञो यथा सभाः ॥ ४३ ॥
भास्वत्यभ्युदिते यस्मिन्नासत्यजनि कर्त्तरि ।
सपक्षैश्च विपक्षैश्च कौतुकं कौशिकायितम् ॥ ४४ ॥
विशामीशे दशाऽप्याशा जेतुं यत्र कृतोद्यमे ।
वैरिणो जीवितं त्रातुं द्विधापि प्रधनं जहुः ॥ ४५ ॥
बलिध्वंसोल्लसद्धामा शयशायिसुदर्शनः ।
*विष्वक्सेनो*ऽपि यश्चित्रं न भेजे दानवारिताम् ॥ ४६ ॥
उच्छलद्धूलिविज्ञातखुराग्रक्षुण्णभूतलाः ।
त्वरया वायुविस्फूर्तिजित्वरास्तुरगा बभुः† ॥ ४७ ॥
मुदान्यदा स दावाग्निप्रतापश्चापविद् गुरुः ।
विधित्सुः पटुमाखेटं निरगान्नगराद्बहिः† ॥ ४८ ॥
आजानुलम्बि सुस्थूलनीलीचीवरधारिणः ।
चेलुः पदातयो मूर्त्ता भयानकरसा इव ॥ ४९ ॥
स्तब्धोर्ध्वकर्णाः सुस्निग्धवर्णा स्वर्णाग्रकण्ठिकाः ।
चाक्षुषा मातरिश्वान इव श्वानश्चकासिरे ॥ ५० ॥
वाहिनीशतसंश्लेषबहलैः प्रचलद्बलैः ।
समुद्रैरिव कल्पान्तभ्रान्तैर्विह्वलयन्निलाम् ॥ ५१ ॥
विस्मेरसुमनोबाणकरवीरमनोहराः ।
नारीरिव वनीर्वीक्ष्य नृपोऽभूद् रन्तुमुन्मनाः ॥ ५२ ॥
बलभद्रास्ततः केऽपि हरिमार्गानुसारिणः ।
केचिच्छशधरादृष्टसिंहिकासुतविक्रमाः ॥ ५३ ॥

---

1 K समीरस्फूर्ति° । † K आदर्शे व्यत्ययेन लिखितं लभ्यते पद्यद्वयमिदम् ।

केचिच्छिवानुगा रौद्रा नृपोल्लङ्घनजाङ्घिकाः ।
अन्तर्वणं विशन्ति स्म भटा आखेटलम्पटाः ॥ ५४ ॥
द्विधापि पृष्ठदानेन सत्रपाकोऽपि सिंहयोः ।
यशोऽमृतं पिबन्नन्तःस्थितः क्रोडं व्यडम्बयत् ॥ ५५ ॥
मत्स्वामिवल्लभां शश्वद्वसुधां चखनीत्ययम् ।
इति प्रकुपितः कोऽपि वराहं मध्यतोऽच्छिनत् ॥ ५६ ॥
त्वन्नेत्रकान्तिचौरोऽयं यथारुचि विधीयताम् ।
इति कश्चित् प्रियाप्रीत्यै मृगं बध्वा समाग्रहीत् ॥ ५७ ॥
निघ्नन् पुरः स्थितं सिंहं हत्वा पृष्ठागतं परम् ।
लेभे काकाक्षगोलस्योपमानं कस्यचित्करः ॥ ५८ ॥
तत्कटीदर्शनादाशु प्रियां संस्मृत्य कश्चन ।
न हातुं न प्रहन्तुं च सिंहमासीत् क्षणं क्षमः ॥ ५९ ॥
व्यात्तवक्त्रे करं क्षिप्त्वा छित्त्वा केसरिणः शिरः ।
उदञ्चितभुजो बाहुत्राणवत् कोऽप्यदीदृशत् ॥ ६० ॥
निजिघांसुं मृगीं काञ्चिन्मृगो दृष्ट्वाऽतिकष्टितः ।
स्वयमासान्तरावर्ती कटाक्षेहकटाक्षितम् ॥ ६१ ॥
वञ्चयित्वाऽथ दाक्ष्येण कोऽपि दृग्गोचरं हरेः ।
पृष्ठमारूढवान् सिंहयानलीलायितं दधौ ॥ ६२ ॥
कृत्वाऽतिसिंहस्थामप्राक्पश्चाच्छस्त्रेण पातितः ।
वराहो रारटीति स्म स्वभावः खलु दुस्त्यजः ॥ ६३ ॥
नृपोऽपि वर्षन् हर्षेण शरासारैररुन्तुदैः ।
श्वापदानापदाक्रान्तान् कुर्वन् गच्छन् यदृच्छया ॥ ६४ ॥
क्वचिद् गिरिणदीतीरे स्फुरच्छरवणान्तरे ।
पारीन्द्रमेकमद्राक्षीन्निद्रामुद्रितलोचनम् ॥ ६५ ॥—युग्मम् ।
उत्साह्य भूपो विज्ञातशरसन्धानमोक्षणः ।
निर्ममे दक्षिणेर्म्माणं तं पारीन्द्रं विनिद्रितम् ॥ ६६ ॥
तेनैवोत्साहनादेन कुतोऽपि कुपितोऽन्यतः ।
तावत् परः स्फुरत्फालः सिंहः संहतविक्रमः ॥ ६७ ॥
जग्राह भूपतेरंसं प्रांशुं तीव्राग्रदंष्ट्रया ।
उरोविदारं राज्ञापि क्षुर्याऽसौ प्रतिचस्करे ॥ ६८ ॥—युग्मम् ।

---

1 K सहाऽग्रहीत्° । 2 K छिन । 3 K °ऽति° । 4 K °सिंह° । 5 K कुर्वन् कुर्वन् ।

दंष्ट्राघातस्रवद्रक्तधाराभिरभितश्चितः ।
दधौ धातुद्रवश्लिष्टशैललीलां क्षणं नृपः ॥ ६९ ॥
ततो दंष्ट्राविषोत्सर्पिमूर्च्छाभिर्विह्वलीकृतः ।
यतीवार्द्धि स पापर्द्धि त्यक्त्वाऽगादात्ममन्दिरम् ॥ ७० ॥
मन्त्रवादिगणैर्वैद्यवृन्दैरपि परः शतैः ।
भृशं चिकित्स्यमानोऽपि नाभूद् भूपः स्वरूपभाक् ॥ ७१ ॥
दुश्चिकित्सतरं ज्ञात्वाऽऽत्मानं भूपोऽथ सर्वथा ।
वीरनारायणं पुत्रमभ्यषिञ्चन्निजे पदे ॥ ७२ ॥
पतिष्यन्नाहमानीयराज्यश्रीवल्लीपादपम् ।
वाग्भटं च समाहूय सोदरं जगिवानिति ॥ ७३ ॥
शौर्यं बुद्धिरविश्वासो राज्यश्रीकारणं त्रयम् ।
तदुर्कं स्थावरे स्वापं दुरापं शैशवे पुनः ॥ ७४ ॥
तदस्ति स्वापचापल्ये बाल्येऽसौ वयसि स्थितः ।
अनुशास्यस्तथाकारं यथा स्यान्नाऽहितं क्वचित् ॥ ७५ ॥
दौःशल्येन सुतस्याऽस्य सशल्य इव *वाग्भटः* ।
मन्दं मन्दमथाचख्यौ मन्युगद्गदया गिरा ॥ ७६ ॥
भवितव्यं तु न स्वामिन् निरोद्धुं कोऽपि सासहिः ।
त्वामिवैनं पुरोपासे सावधानः[3] परं सदा ॥ ७७ ॥
उक्त्वेति *वाग्भटे* तूष्णीं तस्थुषि क्षितिपाग्रणीः ।
चिकीर्षयाऽऽत्मनीनस्य सस्मार परमात्मनः ॥ ७८ ॥
राज्यथास्तमिते तस्मिन् *वीरनारायणो* विभुः ।
भास्वानिवासीलोकानां कमलोल्लासकोविदः ॥ ७९ ॥
स्वतेजसैव यस्याऽऽशु द्विषतः पिंषतः सतः ।
वृथा मत्प्रतिकर्मेति किमसिः श्यामतामधात् ॥ ८० ॥
विस्फूर्जद्भुजशौण्डीर्यफणभृद्दष्टवैरिणाम् ।
यस्य खड्गलतानागदमनौषधिवद् बभौ ॥ ८१ ॥
सोऽन्यदा प्रमदानेत्रपावनं यौवनं श्रितः ।
परिणेतुं सुतां *कत्संवाहस्याऽऽम्रपुरीमगात्*[4] ॥ ८२ ॥

---

1 K त्यक्त्वा मन्दिरमागमत् । 2 K मन्त्रि° । 3 K सावधानतया परम् । 4 K कच्छवाहस्य° ।

तत्राऽभिषेणितो जलालदीनशकभूभुजा ।
पलाय्याऽगाद् रणस्तम्भं पृष्ठतः सोऽप्युपागमत् ॥ ८३ ॥
तत्र युध्वा चिरं जलालदीनः प्रौढपौरुषः[1] ।
विज्ञाय तं छलग्राह्यं निवृत्त्याऽगान्निजां पुरीम् ॥ ८४ ॥
कियत्यथ गते काले ततः स शकभूपतिः ।   5
विजिगीषुश्छलेनाऽमुं दूतेनेत्थमचीकथत् ॥ ८५ ॥
ज्योतिश्चक्रेषु सर्वेषु सूर्याचन्द्रमसौ यथा ।
तथाऽऽवां सार्वभौमावो भूभृत्सु निखिलेष्वपि ॥ ८६ ॥
तन्नौ[2] युक्ता मिथः प्रीतिः पचेलिमफलोदया ।
न तु विग्रहविस्फूर्तिर्भिदेलिमतमायतिः[3] ॥ ८७ ॥   10
सहायं त्वादृशं लब्ध्वा समीरमिव पावकः ।
दन्दह्ये यत् क्षणेनैव वैरिवंशान् दृढानपि ॥ ८८ ॥
प्रीतोऽस्मि तव शौर्येण त्वं मे भ्राताऽस्यतः परम् ।
द्रुह्यामि यद्यहं तुभ्यं कर्त्रे तर्हि शपे ध्रुवम् ॥ ८९ ॥
एकवेलं समेतव्यं मिलनाय परं त्वया ।   15
न चेदहं समाकार्यस्त्वदादेशवशंवदः[4] ॥ ९० ॥
वक्षःस्थलपुरेशेन विग्रहाऽऽख्येन विग्रहैः ।
सुतरां विगृहीतस्य सिसाधयिषतोऽथ तम् ॥ ९१ ॥
ताभिर्दूतोक्तिभङ्गीभिर्भृङ्गीभिरिव वारिजम् ।
चुम्बितं चाहमानस्य हृदयं व्यश्वसीत्तमाम् ॥ ९२ ॥–युग्मम् ।   20
ततोऽवनीपतिं वीक्ष्य शकसङ्गमनोत्सुकम् ।
रहः संवादयामास वाग्भटः प्रतिभाभटः ॥ ९३ ॥
नयशास्त्राम्बुधेः पारदृश्वनः का तवौचिती ।
क्रियते दुष्टहृन्म्लेच्छसङ्गमाय यदुद्यमः ॥ ९४ ॥
शत्रुर्न मित्रतां गच्छेच्छतशः सेवितोऽपि सन् ।   25
दीपः स्नेहेन सिक्तोऽपि शीतात्मत्वमियर्त्ति किम् ॥ ९५ ॥
प्रचिकीर्षसि चेद् राज्यं जिजीविषसि चेच्चिरम् ।
तदा मद्युक्तिभृङ्गीयं नीयतां हृदयाम्बुजम् ॥ ९६ ॥
गुरवो यदि वा सन्तो हितवाक्योपदेशिनः ।
हेयोपादेयतां तस्याऽभव्यभव्यौ चिकीर्षतः ॥ ९७ ॥   30

---

1 K पीनपौरुषः । 2 K न तु । 3 K सौख्यकेलिभिदेलिमा । 4 K समाकार्यं ।

इत्युक्त्वा तत्र तूष्णीके सर्वाङ्गीणक्रुधान्धलः ।
घटयन् भ्रकुटीं भीमां पार्थिवो जगिवानिति ॥ ९८ ॥
अकार्यं[1] यदि वा कार्यं[2] यन्मे रोचिष्यतेतमाम् ।
करिष्ये तदहं स्वैरं चिन्तयाऽत्र कृतं तव ॥ ९९ ॥
*वाग्भट*स्तेन वाक्येन प्रासेनेव हतो हृदि ।
ययौ तद् राज्यमुत्सृज्य *मालवे* सपरिच्छदः ॥ १०० ॥
परमप्रीतिगौराणां पौराणामपि भाषितम् ।
उपेक्ष्य गर्वादुर्वीशो ययिवान्[3] *योगिनीपुरम्* ॥ १०१ ॥
अन्तर्दुष्टो मुखे मिष्टः शकेन्द्रोऽभ्येत्य सम्मुखम् ।
महेन महताऽनैषीदन्तःपुरि नरेश्वरम्[4] ॥ १०२ ॥
प्रियालपनसारत्वं वनवद् दर्शयन्मुहुः ।
चिरं चकार चेतोऽस्य चित्रप्रचयचुम्बितम् ॥ १०३ ॥
अन्येद्युर्विषयोगेन शकान्नृपममीमरत्[5] ।
क्वाऽप्यकृत्यं प्रकुर्वन्तः पापा मुह्यन्ति हन्त[6] ! किम् ॥ १०४ ॥
हतेऽत्रान्यच्छकोऽबोधि जितमेवाऽऽशु राजकम् ।
मूले छिन्ने हि सुग्राहं[7] फलाद्युच्चैस्तरोरपि ॥ १०५ ॥
ततो *वाग्भट*भूपालसूर्येण[8] परिवर्जितम् ।
*रणस्तम्भपुर*व्योम व्यानशे शकतारकैः ॥ १०६ ॥
शकप्रेरणयेहाऽपि[9] जिघांसुं *मालवेश्वरम्* ।
विज्ञाय *वाग्भटो* हत्वा ललौ तद्राज्यमूर्जितम् ॥ १०७ ॥
शकातङ्कपरित्रस्तैर्बाहुजैः शरणागतैः ।
तद्राज्यं प्राज्यलीलाभृदवर्धिष्ट दिने दिने ॥ १०८ ॥
शके *जल्लालदीने*ऽथ *षर्परै*रभिषेणिते ।
*वाग्भटो*ऽप्यमिलत्[10] सैन्यं रणस्तम्भोद्दिधीर्षया[11] ॥ १०९ ॥
पुन्नागसङ्गसुभगाः प्रक्षरन्मदनिर्झराः ।
जङ्गमावनिभृल्लीलां कलयाञ्चक्रिरे द्विपाः ॥ ११० ॥
खुरोत्खातरजःपुञ्जैर्विश्वमप्येकरूपताम् ।
नयन्तो वाजिनां व्यूहा रेजिरेऽद्वैतवादिवत् ॥ १११ ॥

---

1 K अकृत्यं । 2 K कृत्यं । 3 K ययावान् । 4 K अन्तःपुरमधीश्वरम् । 5 K शकोभूपम° । 6 K इन्ति । 7 K सुग्राह्यं । 8 K सूर्यैन्दु° । 9 K प्रेरणयाऽऽपि । 10 K वाग्भटोऽमीमिलत् । 11 K रणस्तम्भजिघृक्षया ।

सञ्चरद्रथचक्राणां दिशां कूलङ्कषैः स्वनैः ।
शब्दाद्वैतमयीवाऽऽसीदखिलाऽप्यब्धिमेखला ॥ ११२ ॥
धृतिहेतिततिस्फीतद्युतिद्योतितदिङ्मुखाः ।
बभुः पदातयो द्वेधाऽप्यरिप्राणापहारिणः ॥ ११३ ॥
चलद्बलभरैर्भोगिविभुना दुर्धरां धराम् ।
सृजन्नधो रणस्तम्भं शिबिरं संन्यवेशयत् ॥ ११४ ॥
दृष्ट्वाऽनेकरणोत्सेकक्रीडद्वीरकुलं बलम् ।
दधिवांसो दरोद्रेकं दुर्गस्थाः शकपुङ्गवाः ॥ ११५ ॥
लोका अपि[3] लसच्छोका बभूवुः पुरवासिनः ।
सौख्यनाडिंधमाः के वा परचक्रे समेयुषि ॥ ११६ ॥
नृपादेशात् ततः स्फूर्जच्छौर्यावेशा भटव्रजाः ।
दुर्गग्रहाग्रहग्रस्ता अभियोद्धुं डुढौकिरे ॥ ११७ ॥
गोलैष्टङ्कैः कुशीभिश्च प्रभिन्दन्तोऽप्यनेकशः ।
न तेऽलम्भूष्णवोऽभुवन् दुर्गं भेत्तुं[6] मनागपि ॥ ११८ ॥
भटानां शौर्यचातुर्यं दुर्गाह्यत्वं पुरस्य च ।
दर्शं दर्शं नरेन्द्रोऽभूद् विषादाश्चर्यचुम्बितः ॥ ११९ ॥
मत्वा दुर्गं बलाग्राह्यं सोऽथ[7] नीतिविदां गुरुः ।
वेष्टयित्वाऽभितस्तस्थौ निवार्य समराद् भटान् ॥ १२० ॥
निर्यातुं च प्रवेष्टुं चाऽशक्नुवन्तस्ततो भिया ।
पुरोदरस्थिता लोका लेगिवांसो विषीदितुम् ॥ १२१ ॥
वारीण्यदुग्धायन्तैक्षुयष्टीयन्त तृणान्यपि ।
एधांस्यचन्दनायन्त प्राप्त्यभावात् पुरान्तरे ॥ १२२ ॥
त्रिमास्यामपि जग्मुषा पुरं रक्षितुमक्षमाः ।
पलायिषत सर्वेऽपि [10]जीवं लात्वा शकभुवाः ॥ १२३ ॥
भक्तिगौरास्ततः पौरा उपदापात्रपाणयः ।
सङ्गमिरे महीशस्य जयशस्यतमद्युतेः ॥ १२४ ॥
नृपोऽपि तेभ्यो वस्त्रादि दत्त्वा कृत्वा च सत्क्रियाम् ।
स्वच्छोत्सवोच्छलच्छायं प्रविवेश पुरान्तरम् ॥ १२५ ॥
सैंहिकेयास्यनिर्मुक्तचन्द्रबिम्बविडम्बिनीम् ।
पश्यन्नथारिनिर्मुक्तरणस्तम्भपुरश्रियम् ॥ १२६ ॥

---

1 K धृत° । 2 K सम्यवे° । 3 K अप्युल्लसत्° । 4 K ग्रहग्रह° 5 K बिभिन्दन्तो । 6 K भंक्तुं । 7 K नृपो । 8 K रणतो । 9 K °मिति । 10 K जीवग्राहं ।

गजाऽश्वस्वर्णरत्नाद्यैर्यथास्थाननिवेशितैः ।
स चकार धरासारमन्दिरं माद्यदिन्दिरम् ॥ १२७ ॥
क्रमागतोदयस्थानं भास्वान् लब्ध्वा स वाग्भटः ।
कान् कान् भूमीभृतो नैव पादाक्रान्तानरीरचत् ॥ १२८ ॥
निवेश्य देशसीमासु चतुर्दिक्षु बलं[1] निजम् ।
[‡]सुखं द्वादशवर्षाणि स्वयं राज्यं स तेनिवान् ॥ १२९ ॥
तस्मिन् स्वर्लोकलोलाक्षीकटाक्षविशिखावलैः[2] ।
वीरयोगव्रता[3] वाप्यां वेध्यतामुपचत्वरे[4] ॥ १३० ॥
तन्नन्दनो जगन्नेत्रानन्दनश्चन्दनद्रुवत् ।
जैत्रप्रतापः *श्रीजैत्रसिंहो*ऽभूद् भूमिवल्लभः ॥ १३१ ॥–युग्मम् ।
समूलकाषंकषिताऽन्यायसन्तमसोदयः ।
तिग्मांशुरिव लोकानां यः प्रियं भावुकोऽभवत् ॥ १३२ ॥
सद्वंशस्यापि यच्चापदण्डस्याऽहो अनौचिती ।
जग्राह दोषमेवास्य समाजे सङ्गते द्विषाम् ॥ १३३ ॥
बिभ्रत् सदानभोगत्वं सुमनः श्रेणिसेवितः ।
शचीवरयितुर्लीलां यो भूमिष्ठोऽप्यचूचुरत् ॥ १३४ ॥
कर्णजाहं जगाहाते शौर्ये यद्भुजदण्डयोः ।
चकम्पिरे शिरांसि स्राक् दृढानामपि भूभृताम् ॥ १३५ ॥
यदातङ्कतमग्रस्ते शत्रु[5]शौर्यनभोमणौ ।
व्यक्तशोकतमोऽभासीत् तन्नारीणां कचच्छलात् ॥ १३६ ॥
सद्वंशस्याप्यैकमत्यं न यच्चापस्य यस्य च ।
पृष्ठं यद् युध्यदात् प्राच्यः परेषां न पुनः परः ॥ १३७ ॥
अगण्यपुण्यलावण्यरसप्रसरसारणिः ।
हीरा[6]देवीति तस्याऽऽसीत् प्रेयसी श्रेयसी गुणैः ॥ १३८ ॥
सौन्दर्येण जिता यस्या रतिस्तामेव भेजुषी ।
जगदे वह्निदग्धस्य शरणं वह्निरेव वा ॥ १३९ ॥
भुञ्जाना भूभुजा साकं सा कन्दर्परसं भृशम् ।
शुभं गर्भं दधाति स्म विस्मयैकपदं सताम् ॥ १४० ॥
स्वकराम्भोजकीनाशदासीकृतशकासृजा ।
गर्भानुभावतो राजपत्नी सिस्नासति स्म सा ॥ १४१ ॥

1 K निजं बलं । ‡ K समाहेलिप्रमाराज्यं स स्वयं तेनिवान् सुखम् । 2 K शिखावलैः । 3 K व्रतवाप्यां । 4 K गत्वरे । 5 K रिपु° । 6 K हीरदेवी° ।

प्रहर्षुलमनःप्रेयःपूरितोद्दामदौर्हृदा ।
समये सुषुवे सूनुं सा श्रीरिव सुमायुधम् ॥ १४२ ॥
असौ शकासृग्बाष्पूरैः संप्लाव्य धरणीमिमाम् ।
इष्टा तन्मुण्डपाथोजैरित्यासीद् व्योम्नि गीस्तदा ॥ १४३ ॥
बालाङ्गसङ्गिरोचिर्भिरभितोऽपि प्रसृत्वरैः । 5
अभ्युद्यतसहस्रार्कमिवासीत् सूतिकागृहम् ॥ १४४ ॥
दिशः प्रसादमासेदुः सुखसेव्यो ववौ मरुत् ।
नभो निर्मलतां भेजे दिनकृद् दिद्युतेतमाम् ॥ १४५ ॥
विशदं सम्मदं यं तज्जनने जनको दधौ ।
शतांशोऽपि न तस्याऽऽसीत् कवीनां गोचरो गिराम् ॥१४६॥ 10
तज्जनौ स्वर्णधाराभिरवर्षद् भूपतिस्तथा ।
मूलतोऽपि यथा शुष्यदर्थिरोरंववासकः ॥ १४७ ॥
कृत्वा दशाहिकमहं [3]विश्वं विश्वसुखावहम् ।
हर्षाद् हम्मीरदेवेति नामाऽमुष्मै पिता ददौ ॥ १४८ ॥
मातापित्रोर्दृशः सिञ्चन् स्वदर्शनसुधारसैः । 15
सौम्यमूर्तिरवर्धिष्ट स शशीव दिने दिने ॥ १४९ ॥
दिनैः कतिपयैरेवाकृच्छ्रं गुर्वनुभावतः ।
शस्त्रशास्त्ररहस्यानि स स्ववश्यानि तेनिवान् ॥ १५० ॥
न तच्छास्त्रं न तच्छस्त्रं न च तज्जनरञ्जनम् ।
सदाशयाम्बुजे तस्य न यदभ्रमरायत ॥ १५१ ॥ 20
अथाऽभङ्गुरशृङ्गारजीवनं यौवनं श्रितः ।
कासां मृगीदृशां निन्ये वशं दृग्मनसी न सः ॥ १५२ ॥
दृग्द्वन्द्वपेयसौन्दर्यश्रीणामेकं तमास्पदम् ।
दृष्ट्वाऽवाञ्छन् पतीकर्तुं कामिन्यः का न मानसे ॥ १५३ ॥
अकृत्रिमालङ्कृतिराननस्य तस्योत्थिते श्मश्रुलते व्यभाताम् । 25
आधिक्यतो घ्राणयुगाध्वनिर्यच्छृङ्गारधारे इव नेत्रपेये ॥ १५४ ॥
केशाः केकिकलापकान्तिजयिनो वक्त्रं शशिप्रीतिभित्
कण्ठः कम्बुरिपुः कपाटपटुताविक्षेपि वक्षःस्थलम् ।
दोर्दण्डौ परिघापघातनिबिडौ पादौ कृताब्जापदौ
किं किं रम्यतरं न यौवनपदं प्राप्तस्य तस्याऽभवत् ॥ १५५ ॥ 30

1 K संप्लाप्य । 2 K रोरय । 3 K विश्वविश्व° । 4 K तस्योल्लसत् ।

विन्ध्ये सिन्धुरवद् धने विधनवत् जातिप्रसूनेऽलिवत्
त्यागे याचकवद् गुणे सगुणवन्न्याये महीपालवत् ।
माकन्दे पिकवच्छ्रुते विदुरवत् पाथोरुहे हंसवत्
तस्मिन् संसृजति स्म वागविषयां[1] प्रीतिं मनो योषिताम् ‡ ॥१५६॥
नारीभिः सुमचाप इत्यमरभूजन्मेति च प्रार्थिभि-
र्गङ्गाभूरिति सत्यसङ्गरपरैर्ब्रह्मेति तत्त्वोन्मुखैः ।
स्वर्भुग्भूरिति योद्धृभिर्यम इति प्रत्यर्थिपृथ्वीधवैः
कैः कैरेष कथं कथं न युवतामध्याश्रितस्तार्कितः ‡ ॥ १५७ ॥
सौन्दर्यधन्या अथ सप्त कन्याः पित्रा प्रमोदात् परिणायितोऽसौ ।
चिक्रीड ताभिः सह शश्वदस्तव्रीडं यथा दुश्च्यवनः शचीभिः ॥१५८॥
हम्मीरादितरावपि क्षितिपतेर्जैत्रस्य पित्र्यानुजौ
जज्ञातेऽङ्गरुहौ गुहाविव जगज्जैत्रप्रतापोदयौ ।
आद्योऽभादनयोर्नयोदयदलद्वल्लीवसन्तः सुर-
त्राणोऽन्यः परवीरदारणरणारम्भप्रभो वीरमः ॥ १५९ ॥
पुद्वारार्गलदीर्घपीनभुजभूप्रौढप्रतापज्वल-
ज्ज्वालाजिह्वविषावलीकवलितप्रत्यर्थिभूमीधवैः ।
इत्यभ्यस्तनयैस्त्रिभिः स्वतनयैः संसेव्यमानोऽन्वहं
श्रीजैत्रः क्षितिपः स्म वीरजनकोत्तंसत्वमास्तिघ्नुते ॥ १६० ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के तज्जन्मवर्णनो नाम चतुर्थः सर्गः समाप्तः ॥

अथ पञ्चमः सर्गः ।

अथ जैत्रसिंहनृपतौ धरणिं करणिं दिवः श्रितहरेः सृजति ।
उदजृम्भत प्रियसुहृत्सुरभिः सुमसायकस्य किल विश्वजितः ॥ १ ॥
पुपुषे ध्रुवं मलयशैलभवोऽनिल एष भोगियुवतिश्वसितैः ।
कथमन्यथाऽस्य सहता भवति स्म वियोगिनो झगिति मूर्च्छयितुम् ॥२॥
ऋतुराजवीक्षणरसाञ्चितरामरुणेन न ध्रुवमनोदि[7] रथः ।
कथमन्यथा दधुरमी दिवसा गुरुतां रथाङ्गविहगैकहिताम् ॥ ३ ॥

---

1 K विषयं । 2 K तरुणिम्नालंकृत° । ‡ एतत्पद्ययुग्मं विपर्ययेण लिखितं लभ्यते K आदर्शे । 3 K एको । 4 K शिखावली । 5 K पृथ्वीधवैः । 6 K °मादीकते । 7 K °मखेदि ।

अतिदुःसहप्रियसुहृद्विरहैः प्रमदाजनैः कथमिवैष स नः ।
महिमा सहिष्यत इतीव निशाः कृशतामधुर्मधुरिताः[1] कृपया ॥ ४ ॥
समुदाचरन्ति मधुपा मलिना न च निर्मला स्फुरति जातिरिह ।
इति वा बभूव ऋतुराट्समयो नवरं न वल्लभतरो यतिनाम् ॥ ५ ॥
मलयानिलो मलयजैः सुरभौ सुदृशामुरोजयुगले विलसन् ।
समुपागतं मलयशैलमहाशिखराधिरोहणममंस्त पुनः ॥ ६ ॥
अमुना विवर्णितदलामभितो नलिनीं विलोक्य नलिनीदयितः ।
कुपितः प्रहिंसितुमिवैष हिमोच्चयमभ्यगाद्धिमवतः[1] ककुभम् ॥ ७ ॥
स्थलतां प्रयाति गगने पवनेरितपुष्पराजिरजसां पटलैः ।
अचलन् यदर्कतुरगाः शनकैस्तदिवास वासरगणोऽत्र गुरुः ॥ ८ ॥
मधुकप्रसूनमधुपानवशादतिमात्रमत्तमधुकृद्युवतेः ।
विनिशम्य झङ्कृतमरं दधिरे कति रे ! न चेतसि विकारभरम् ॥ ९ ॥
सहकारसारतरमञ्जरिकाग्रसनोल्लसन्मधुरिमाञ्चितया ।
परपुष्टया कुसुमकाण्डकरेऽरचि लीलयाऽप्यखिलमेव जगत् ॥ १० ॥
इयमागतैव शशिनाशिकुहूरथ चेयमाप्यलपदन्यभृतः ।
पिककूजितेष्विति न का मुमुदे विषसाद चाध्वगवधूरसकृत् ॥ ११ ॥
शुकचञ्चुसन्निभपलाशदलत्कुसुमानि रेजुरभितोऽनुवनम् ।
शमदन्तिनं भृशमुपानयतो वशमङ्कुशा इव सुमेषुविभोः ॥ १२ ॥
यदि पुष्पिताऽहमिह तत्कियतीं श्रियमुद्वहन्तु लतिका इतराः ।
किमिदं विचिन्त्य कृपया सुरभौ विचिकास नाऽभिनवजातिलताः ॥१३॥
विकसत्प्रसूननिचयाः शुचयः प्रतिकाननं शुशुभिरे तरुषु ।
प्रथितांहसा इव वनीयुवतेर्निजजीवितेशमृतुराजमनु ॥ १४ ॥
जलदागमे स्वमहिमोल्लसितैरवधीदसौ पथिकलोकवधूः ।
इति पङ्क्तिबाह्यविहितेव मधौ नवमालती न सुमनस्त्वविशत् ॥ १५ ॥
मदनोऽधुनापि परदेशजुषां हृदि नष्टशल्यमभिहन्तुमिव ।
कुसुमानि वृन्तसुषिराणि भृशं विरचय्य काण्डफलतामनयत् ॥ १६ ॥
मम नाम नालिकशरा यदि मारुतः सहेत कतरे स्पृशतीः‡ ।
किमितीह नाद्रियत जातिलता कलिकां मधौ मधुसखः स्फुटतीः ॥१७॥
विकसत्प्रियालतरुमञ्जरिका रजसाऽरुणैरपि मृगीनयनैः ।
मधुसीधुपानघनरागजुषः सुदृशां दृशः सदृशतां न जहुः ॥ १८ ॥

---

1 K हिमं रविरभ्यगात् । 2 K मधुर° । 3 K कतरे । 4 K भृता । 5 K वशमिहाऽऽनयतो भृश° । 6 K °मावहन्तु । 7 K °मभिखातुं । ‡ 'अदसीय नालिकशर-प्रहतीरनुभूय जीवितुमलं कतरः' एतादृशः पाठः K प्रतौ । 8 K स्फुटतीम् ।

परिसञ्चरन्मलयदिक्पवनप्रविकम्पिपल्लवकराम्बुरुहैः ।
उपगूहनाय वनराजिवधूर्निजकान्तमाह्वयदिवर्तुपतिम् ॥ १९ ॥
मधुपानतः शिथिलितभ्रमरा भ्रमिरा बभुः प्रतिवनं तरुषु ।
गुलिकाखकाभ्यसनमुन्नयतो गुलिका इव प्रसवचापविभोः ॥ २० ॥
प्रविलोकनादपि वियोगवशा विदधद् वशा विधृतकम्परसाः ।
अनयत् पलाशशिखरी तरसा चरितार्थतां जगति नाम निजम् ॥२१॥
पदसङ्गमात्र उपजाततृषो मम निम्रजघ्नुरिमकाः प्रसभम् ।
गतभर्तृका इति सकोप इवाज्वरयन्मुहुर्मुहुरशोकतरुः ॥ २२ ॥
परिलोभयन् मधुकरप्रकरान् मधुसङ्गमेन मधुरैर्मधुभिः ।
तिलकद्रुमस्तिलकवन्निखिलेष्वपि भूरुहेषु लभते स्म रुचिम् ॥ २३ ॥
अपि तन्मुखाभिषवसेकमृते श्रियमुद्वहन्नतिवचोविषयाम् ।
अधरीचकार सुदृशामखिलामपि मानसं स्थितिमगो बकुलः ॥ २४ ॥
निजकालिमोल्लसितसन्निताऽसमयक्षपालिषु वनीततिषु ।
अलभन्त चम्पकतरोः कलिकाः स्मरराजदीपकलिकोपमितिम् ॥ २५ ॥
भृशलीनषट्चरणचक्रवशाऽधिकनीलनीरजदले सरसि ।
कमलैरलम्भि विलसत्कमलैर्गगने नवोदितशशाङ्करुचिः ॥ २६ ॥
मलिनाम्बुबिन्दुतुलनां कलयद् विकसत्पलाशमुमवृन्तमभात् ।
शिरसाऽग्निसाधनतपो रचयन्निव मालतीविरहतोऽलियुवा ॥ २७ ॥
कृतवेल्लना मलयदिक्पवनैर्वनवल्लयो रुरुचिरेऽतितराम् ।
उपगूहनानि चिरकालभवन् मिलनान्मिथः प्रवितरन्त्य इव ॥ २८ ॥
सकलत्रिलोकविजयप्रभवश्रमवारिसंगतमनङ्गपतिम् ।
इव वीजयन्त्यभिनभौ सुरभौ कदलीदलैरनिलसङ्गचलैः ॥ २९ ॥
हृदयेश्वरं भजत मानममुं त्यजताऽऽशु नैति समयो हि गतः ।
इति बोधयन्निव कुरङ्गदृशो रुचिरं चुकूज परपुष्टयुवा ॥ ३० ॥
किमु चुम्बनं किमथवा मधुरं मधु इत्यसाविव विवेचनकृत् ।
क्षणमम्बुजं क्षणमथ भ्रमरीवदनं चुचुम्ब मधुकृत्प्रवणः ॥ ३१ ॥
विलसद्विलासिनि वसन्तऋतौ कुसुमानि कानिचिदिहाविदुषाम् ।
इदमेतदेतदिदमित्यवदन्निव झङ्कृतैर्मधुकराः कतिचित्* ॥ ३२ ॥

---

1 K भ्रमणा भ्रमरा । 2 K रसा । 3 K रुचम् । 4 K °मावहन् । 5 K नीलनील-कमले । 6 P भवन् मिथः प्रवितरंत्य इव । 7 P प्रभवं । 8 K रस । * इदं पद्यं नास्ति K आदर्शे ।

विधृतत्वराणि विदधन् नितरां युवमानसानि दयितानुनये ।
चटुकूजितैः कलरवो मदयन् दयितां चुचुम्ब परिरभ्य मुहुः ॥ ३३ ॥
विकसत्सुमस्तबकचारुकुचा नवपल्लवाद्भुतकरक्रमणाः ।
मधुमागताः समवलोकयितुं वनदेवता इव लता व्यरुचन् ॥ ३४ ॥
अधिकाधिकं तनुविलेपविधौ प्रमदाभिराद्रियत वह्निशिखम् ।
उपकारकारि सुचिरोपनतं सहसैव हेयमिह वस्तु कथम् ॥ ३५ ॥
पथिकाङ्गनाजनपरासनजैर्गुरुपातकैरिव नितान्तचिताः ।
हविराचिताऽञ्जनघनद्युतयो भ्रमरा बभुः प्रतिवनभ्रमिराः ॥ ३६ ॥
इति वीक्ष्य वीक्षणयुगप्रसभाहृतसम्मदं सुरभिकालमिमम् ।
परिपृच्छ्य जैत्रजगतीदयितं स हि *वीरमाग्रजकुमारवरः* ॥ ३७ ॥
अदसीयरूपविलुलोकयिषानुगृहाधिरूढललनावदनैः ।
दिवसेऽपि विस्फुरदनेकसुधाकरबिम्बमम्बरतलं जनयन् ॥ ३८ ॥
घनसारसारमृगनाभिमिलन्मलयद्रुनागजरजःप्रकरैः ।
कृतदेवनो वनविनोदचिकीरवरोधबन्धुरवधूमधुरः ॥ ३९ ॥
प्रचलद्दलावलिलसत्पवनं[2] तरुराजिराजितपुरोपवनम् ।
प्रययौ स यौवनवयःसवयःपरिहासभासुरतरास्यशशी ॥ ४० ॥

—चतुर्भिः कलापकम् ।

तरुणा लसन्नवनवाभरणा अथ चेलुरर्हतमचेलभृतः ।
मदकृन्मधूत्सवकृते मदनोद्यमदीप्तदीप्तिसुतनूभिरमा ॥ ४१ ॥
कृतभूषयाऽपि वदनाम्बुरुहः सखि! साम्प्रतं तव रुरोदिषया ।
कृतमेहि सत्वरममुं दयितं सुतरां प्रसाद्य जहि वैरिमुदम् ॥ ४२ ॥
इति काचन प्रियसखीवचनैः सुचिरं विमृश्य हृदये निपुणम् ।
परिहृत्य मानमुपगत्य पतिं विशदप्रसादललितं व्यतनोत् ॥ ४३ ॥

—युग्मम् ।

अनुनेतुमन्यतर इन्दुमुखीं विविधेङ्गितानि विदधन् निपुणम् ।
परिरभ्यते[3] स्म तरसैव तया सपूर्वसूचिततदिङ्गितया[4] ॥ ४४ ॥
प्रचलालि काननमितः कितवो विरहात् तवाङ्ग! स किमातनुते ।
प्रविलोकयाव इति कापि मिषादुपनीय तां प्रियतमाय ददौ ॥ ४५ ॥
अनुनेतुमम्बुजदृशः पदयोः पतितस्य कस्यचन वेणिरभात् ।
इदमीयमानमभिपाटयितुं[5] कुसुमायुधस्य तरवारिरिव ॥ ४६ ॥

---

1 P प्रहाधि° । 2 K प्रचलद्दलच्छलकृता हवनं । 3 K वेस । 4 K तयाह स° । [5] K मदसीय° ।

अयि ! पश्य शस्यवदने ! मधुरा मधुवासरा झटिति[1] यान्ति कथम् ।
अधुनापि मानमिममादधती स्वपराहितं किमु चिकीर्षसि हा ! ॥४७॥
इति कश्चन प्रकुपितां दयितामनुनीय योषिदनुनीतिचणः ।
उपगूहनं प्रतिपदं वितरन्नचलन्मधूत्सवकृते सुकृती ॥ ४८ ॥
न विलोकसे न च ददासि वचः कथमेष जीवतु[2] तवानुचरः ।
इति पीतवल्लभवचा इतरा मदपानतोऽप्यधिकमाप मदम् ॥ ४९ ॥
नवपल्लवाद्भुतकरां मधुपावलिवेणिमिद्धसुमगुच्छकुचाम् ।
नववल्लभामिव विलोक्य वनीं दधुरुत्सुकत्वमथ रन्तुममी ॥ ५० ॥
तरुणीगणे विकरुणं प्रसवावचयं विधातुमभियोगवति ।
तरुभिः प्रकम्पितमिव प्रवहत्पवमानवेल्लितदलालिमिषात् ॥ ५१ ॥
प्रविहाय काननसुमान्यभितो निपतद्भिरम्बुजधिया वदने ।
भृशमुन्मदिष्णुमधुकृन्निकरैरुदवेजि काचन सरोजमुखी ॥ ५२ ॥
दयितां लताग्रमधिरोहयता[3] क्वचनापि केनचिददायि तनौ ।
नखरक्षतं यदतनोत् [4]किलितं न मुदं तदीयहृदये कियतीम् ॥ ५३ ॥
सुमकन्दुकौ निजकरग्रथितौ सहसं प्रदर्श्य किल केनचन ।
त्वदुरोजकौ ध्रुवमियत्प्रमितौ वदतेत्यहासि कुपितापि सुदृक् ॥ ५४ ॥
अयि वल्लभे ! मधुरगन्धमिदं कुसुमं वदन्निति परो विकुरः ।
उपनासमाप्य किल सिङ्घ्यणच्छलतः करं न्यधित तामधरे ॥ ५५ ॥
मुखचुम्बनं यदि ददासि सकृत् प्रददे तदा कुसुममाल्यमिदम् ।
गदतीति भर्त्तरि सखीविदितं त्रपया मुदा च समवादि परा ॥ ५६ ॥
दयितस्य वृक्षमधिरूढवतः पदमाशु पल्लवधिया विधृतम् ।
न चकर्ष नैव च मुमोच परा तदवाप्तिजातपुलकप्रसरा ॥ ५७ ॥
पुरतो लताततिषु रम्यतमाः प्रसवाः स्फुरन्ति ननु चन्द्रमुखी[5] ।
इति विप्रलोभ्य दयितामितरो विजनप्रदेशमनयद् रतये ॥ ५८ ॥
अयि ! पश्यतोऽपि कुसुमस्तबकः क्व गतो मयेति कितवोक्तिपरः ।
करसाद् विधाय दयितोरसिजं निजगाद लब्धमिति कोऽपि हसन् ॥५९॥
[†अयि पश्यतोऽपि कुसुमस्तबकः क्व गतो ममेति कितवोक्तिपरः ।
प्रममर्द नैकयुवतेः कुचयोर्युगलं गवेषणमिषेण[6] परः ॥ ६० ॥]
तनुवल्लिवद्धनवपुष्पगलन्मकरन्दलुब्धमधुकृन्निकरः ।
परिरभ्यते स्म तरुकैतवतोऽतिविदग्धया प्रियतमः परया ॥ ६१ ॥

---

1 K झगिति । 2 K जीवति । 3 K लतां समधि° । 4 K किल तत्र । 5 K चन्द्रमुखि । † एतत्पद्यमुपरितनपद्यस्य पाठान्तररूपेण K आदर्शे लिखितं लभ्यते । 6 P युगलं गवे गवेषणपरः ।

फलदाधिरूढहृदयाधिपतिप्रविलोकनापहृतचेतनया ।
वितरेममङ्ग ! वितरेममिति प्रसवं वृथैव परयाऽभिदधे ॥ ६२ ॥
इतरेण गोत्रभिदया प्रहितः कुसुमोच्चयानुवनितामनया ।
प्रहतो न्यवर्तत च निःश्वसितैरनवेक्ष्य तां किमुदितः प्रति याम् ॥६३॥
अयि पश्य पश्य पुरतो लकुचे सुकुचे कथं भ्रमति भृङ्गयुवा ।
इति प्रविलोभ्य दयितामितरो निपपौ परां सुचिरमर्द्धदृशा ॥ ६४ ॥
तरुराजितो विकसितप्रसवप्रकरान् निधाय शिरसि प्रयतान्[2] ।
गुरुझङ्कृतिप्रमुखरा भ्रमरा वनरक्षका इव परां रुरुधुः ॥ ६५ ॥
दधदन्तरा नवतिरस्करिणीमिव तापनोदनमिषेण पटीम् ।
वनितां विलोक्य कितवो हृदयाधिकृतां चुचुम्ब गतभीरितराम् ॥६६॥
उपवीजयन् निजकरग्रथितप्रविकाशिभासिकुसुमव्यजनैः ।
कृतविप्रियोऽपि भृशमन्वनयत् सुदृशं परः स्मरकलाविदुरः ॥ ६७ ॥
तरुशृङ्गसंस्थितसुमग्रहणोर्ध्वसरत्करतः सुकृशादुदरात् ।
गलदम्बरा क्षणमभादपरा प्रकटीभवन्त्यतनुशक्तिरिव ॥ ६८ ॥
कितवेन पल्लवमिषादधरे विधृते प्रिया यदतनोद्धसितम् ।
अभवत् तदेव किल तत्कपटस्फुटपाटवस्य शशिभासि यशः ॥ ६९ ॥
जडगात्रवर्तनपराङ्गमितां दधदेकबाहुलतया दयिताम् ।
नलिनं करेण च परेण परः शुशुभे स्मरः[3] सशरचाप इव ॥ ७० ॥
कामिन्याः कुसुमानि चेतुमधिरोहन्त्यास्तरुस्कन्धकं
भूमौ स्थायिनि दक्षिणे पदतले वामे च शाखास्पृशि ।
कृत्वा किञ्चन कैतवं विनमितोऽधोनाभिमूलं परो
दृष्ट्वोदीरितकाम ऊर्ध्वसुरते वाञ्छामतुच्छां दधौ ॥ ७१ ॥
शाखाग्रस्थमिदं ददासि कुसुमं चेत् तर्हि यद्याचसे
तत् तेऽहं प्रददे प्रिय ! ध्रुवमिति प्रोक्तेऽन्यया मुग्धया ।
नीत्वा लग्नकतां तदालिमचिराद् दत्त्वा च पुष्पं छला-
दासीद् यद्धृदये द्वयोरपि तयोर्धूर्तेन तत्प्रस्तुतम् ॥ ७२ ॥
कराम्बुजालम्बितलम्बशाखा मिथोऽपि संयोजितपादपद्माः ।
आन्दोलिता आलिजनैः स्वयं ता दोलातुलां शिश्रियुरम्बुजाक्ष्यः ॥७३॥
कामिनीकरजकोटिविलूनस्रस्तपल्लववनावनिपीठे ।
पुष्पराजिभिररराजत[5] मुक्तावेणिवद् विपुलविद्रुमपात्रे ॥ ७४ ॥

1 K जगदे । 2 K प्रयतीम् । 3 K स चापशरकाम इव । 4 K निपतितोऽधो । 5 K °रराज्यत ।

प्रसवचोलवतंसककङ्कणस्तबकराजिविराजितविग्रहाः ।
शुशुभिरे सुदृशो धृतकण्टका इव भटाः कुसुमायुधभूपतेः ॥ ७५ ॥

इति रुचिरविधाभिः स्वाङ्गसङ्गोपभोग-
स्फुरितविततलीलाश्रेणिभिः श्रेयसीभिः ।
ऋतुपतिसमयोत्थां काननीं पुष्पलक्ष्मीं
झगिति[1] सफलभावं निन्यिरे पौरवीराः ॥ ७६ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के श्रीवसन्तवर्णनो नाम पञ्चमः सर्गः समाप्तः ॥

अथ षष्ठः सर्गः ।

प्रेक्ष्य काननविलासवशेन स्वेदिनोऽथ तरुणान् नृपपुत्रः ।
वारिकेलिकलनाय जगन्वान् जैत्रसागरसरः सरसश्रि ॥ १ ॥

उल्लसच्चुकगरुत्समकान्तिर्यस्य तीरतरुराजिरराजत् ।
चन्द्रबिम्बमभितः प्रसरन्ती सिंहिकाङ्गजगजध्वजिनीव ॥ २ ॥

अन्तराप्रतिफलद्रणपूर्वस्तम्भनामपुररम्यतरश्रि ।
यज्जहास विपुलाङ्कविलासिद्वारकं किल सरिद्धृदयेशम् ॥ ३ ॥

तीररूढतरुनीलपलाशस्मेरजालकहरिन्मणिमुक्तम् ।
वृत्तरम्यमवनीवनितायाः कर्णकुण्डलतुलामवहद् यत् ॥ ४ ॥

नीलनीरजदलावलिदम्भव्यक्तलक्ष्मविधृतामृतपूरम् ।
यत्कृतावतरणं भुवि रेजे चन्द्रबिम्बमिव राहुभयेन[2] ॥ ५ ॥

कर्णिकाङ्कविरचन्मधुपोद्यत्तारकोन्मिषितपङ्कजदम्भात् ।
आलुलोकिषुनिजामिव लक्ष्मीं यद् दधार शतशो नयनानि ॥ ६ ॥

—षड्भिः कुलकम् ।

आयतैश्चलदृशोऽथ नितम्बैः सत्वरं रुरुधिरे वनवर्त्म ।
अग्रतोऽम्बुललनाय यियासून् वारयन्त्य इव जीवितनाथान् ॥ ७ ॥

स्वां श्रियं पयसि वीक्ष्य तरुण्यो द्राग् मनांसि चकृषुर्मुकुरेभ्यः ।
तत् किमत्र यदि वा प्रमदानां यत्र तिष्ठति मनश्चिरमेव ॥ ८ ॥

उत्तरङ्गिणि सरोऽम्भसि नार्यश्चिक्षिपुर्विकसितानि सुमानि ।
उज्जिजीविषयेव यजन्त्यो मन्मथस्य गिरिशं जलमूर्तिम् ॥ ९ ॥

1 K झटिति । 2 K °भयेण । 3 K मूर्ति । 4 K चिरकालं ।

तीरसंस्थितविलासवतीनां वारिणि प्रतिफलत्सु मुखेषु ।
स्मरवारिजधिया निपतन्तोऽहास्यन् मधुकरास्तरुणौघान् ॥ १० ॥

वारिगोचरजुषां युवतीनामुल्लसत्पुलिनिबिधिव्यपदेशात् ।
आतिथेयमिव कर्तुममूषामाविरासत सरोजलदेव्यः ॥ ११ ॥

अत्यगाधजलदर्शनजातातङ्ककम्पिततनूस्तनुमध्याः ।
पाणिनाऽथ विनिगृह्य कथञ्चिद् वेशयन्ति सलिलं स्म युवानः ॥ १२ ॥

किं पुरो विदधतीं जलकेलिं स्वां सखीमिव न पश्यसि मुग्धे ! ।
दर्शयन्निति च तत्प्रतिबिम्बं तां व्यशिश्वसदहो चतुरोऽन्यः ॥ १३ ॥

अस्त्यगाधमिह वारि तदेवं न प्रवेष्टुमुचितं तव मुग्धे ! ।
इत्युदीर्य विविशे कितवेनाऽन्येन वक्षसि निधाय मृगाक्षीम् ॥ १४ ॥

उत्सुकापि सुतरां जलकेलावञ्चले प्रणयिना विधृतापि ।
तद्विलोकरसभाववशाऽऽस्मा काप्यवास्थित तथैव परोऽपि ॥ १५ ॥

आहतः कुचतटैः प्रमदानां चेतनाविरहितोऽपि तडागः ।
क्षोभभावमगमत् सहसा यत् तत्र कारणमसौ रसवत्ता ॥ १६ ॥

अस्पृशत् प्रथममम्बु वधूनामङ्गसङ्गचपलं जघनानि ।
खेलति स्म तदनूरसिजेषु क्व क्रमः स्फुरति हन्त ! जडानाम् ॥ १७ ॥

जानुदघ्नमपि तत्सरसोऽम्भः कण्ठदघ्नमभवद् द्रुतमेव ।
योषिदङ्गविगलद्घणिम्ना स्फीततामुपगृहीतमिवोच्चैः ॥ १८ ॥

आजनेरपि वितीर्णमरन्दान्यम्बुजानि मधुपाः प्रविहाय ।
भेजिरे मृगदृशां वदनानि स्यात् कुतो हि मलिनेषु विवेकः ॥ १९ ॥

सञ्चरच्चटुलदृग्वदनाब्जालोकतर्कितनिशाकरबिम्बैः ।
खादितुं बिसलतोपगृहीता तत्यजे न बुभुजे न च चक्रैः ॥ २० ॥

योषितां स्तनतटे स्खलतोच्चैरस्मियन्त पयसा पुनरेव ।
शैशवे प्रवहता गिरिमार्गे कूलशैलसबलाऽऽस्खलनानि ॥ २१ ॥

प्रेयसीवदनमुक्षितुमात्तं नीरमञ्जलिपुटे दयितेन ।
तत्र बिम्बितमवेक्ष्य तदेवामोचि नोपचितभङ्गभयेन ॥ २२ ॥

सेसिचत्प्रियतमो मदिराक्ष्या शक्तया कुलतया प्रतिसेके ।
गृह्यते स्म भुजया लघुकण्ठे बाणयुद्धविदिवासिकरेण ॥ २३ ॥

वल्लभे विकसिताम्बुजमुख्या उन्मदे पिबति वक्त्रसरोजम् ।
अश्यदम्बुकणकेशकलापच्छद्मनाऽलिभिररोदि शुचेव ॥ २४ ॥

---

1 K कृदिवाऽसि ।

गाढपीडितरदावलिरन्ध्रैर्याः स्त्रियो मुमुचिरे जलधाराः ।
ताभिरास मदनः सलिलास्त्रो भर्तृमानदहनाञ्चशमाय ॥ २५ ॥
कण्ठदघ्नपयसि स्थितवत्या जीविताधिपतिना गजगत्याः ।
यद्यबुध्यत तयोर्द्युतिहान्याब्जद्वयान्तरगतं वदनाब्जम् ॥ २६ ॥
श्रीरपाह्रियत नो नयनानामेभिरेभिरिति सम्भृतकोपाः ।
मज्जयन्ति कमलानि सरस्सून्मज्जयन्ति च मुहुः सुदृशः स्म ॥ २७ ॥
वारिणि प्रतिनिधिव्यपदेशाद् व्यत्ययेन मदनश्च रतिश्च ।
तत्तदाप्तरुचिरत्वविशेषौ संश्रिताविव वधूं च वरं च ॥ २८ ॥
कैतवेन करवारिभिरेकां प्राप्य कश्चन पराङ्मुखभावम् ।
चुम्बति स्म विदितोदितरागोऽन्यां मुहुः कमलिनीमिव भृङ्गः ॥ २९ ॥
शैलसारकठिने प्रमदानामम्भसां स्तनतटे स्खलितानाम् ।
फेनपङ्क्तिरिव हारलताया दिद्युते सरसि मौक्तिकपङ्क्तिः ॥ ३० ॥
अम्भसाहृतविलेपनभङ्गौ योषितां वपुषि कान्तकृतानि ।
रेजिरे नखपदानि सपत्न्युच्चाटनार्थमिव मन्त्रपदानि ॥ ३१ ॥
त्रुट्यतोऽपि जलपूरितरन्ध्रैः शुक्तिजन्मभिरपाति न हारात् ।
के त्यजन्ति सुदृशां कुचयुग्मस्पर्शसौख्यमभिलब्धरसा वा ॥ ३२ ॥
नीरपूरणवशादृतमौनं नूपुरं चटुलपादसरोजे ।
संननाव्य सदवेदि मृगाक्ष्या गुह्यको वट इवानुपलब्धेः ॥ ३३ ॥
कण्ठदघ्न उदके विहरन्ती वाणिनी विशदपक्ष्मधत्त ।
स्मेरमब्जमिति तन्मुखवीक्षासख्यविश्वसितमानसमाशु ॥ ३४ ॥
भापनाय समुपेत्य जलान्तर्भर्तरि स्पृशति सक्थि करेण ।
त्रासकम्पिततनूस्तनुमध्याश्चर्यचुम्बितमवेक्षि सखीभिः ॥ ३५ ॥
प्रेयसा दशनरन्ध्रविमुक्तैरुक्षितोदककणैर्मदिराक्षी ।
प्रीतिजातपुलकोद्घुषिताङ्गा कामकाण्डनिचितेव चकासे ॥ ३६ ॥
मुक्तगन्धमपि वारिविहारैः पुष्पदाम न जहे शशिमुख्या ।
न स्वतोऽपि गुणवान् सुखहेयः किं पुनर्यदि स जीवनलीनः ॥ ३७ ॥
पङ्कजच्छदृदृशः कटिवस्त्रे नर्मणा व्यपहृते दयितेन ।
वस्त्रवन्निजदलानि ददानाम्भोजिनी ध्रुवमधत्त सखीत्वम् ॥ ३८ ॥
औक्षमौक्षमवलां जितदृग्भ्यां कालिमा य उदवास्यत भर्त्रा ।
सोऽसहिष्णुवनितावदनाब्जे व्यक्ततामभजदाशु निविश्य ॥ ३९ ॥

---

1 K विशेषे संश्रिते इव । 2 K सन्ननाप्य । 3 K मुखवीक्ष्य । 4 P भापनाय्य ।
5 K बहुशेन वदनाम्बुजयान्तै° ।

ताडनाय समुदञ्चितमब्जं मत्प्रियामुखमिति प्रतिचुम्बन् ।
तां स्मयेन परिवर्तितवक्त्रामप्यहासयदहो ! कितवोऽन्यः ॥ ४० ॥
योषितां जलविहारवतीनां नूपुराणि रणितानि न चक्रुः ।
कः सदाचरणभाग् जलमध्ये[1] स्वं तनोति यदि वा महिमानम् ॥४१॥
सारसेऽम्भसि परस्परहर्षादुज्झितैरपि सरोजमुखीभिः ।
श्रीरवाप्यत परा सुमगुच्छैः क्व श्रियां सुमनसो न पदं स्युः ॥ ४२ ॥
दम्पती विधृतवार्यभिपूर्णाऽऽयामशालि बिसशस्यतमाऽऽस्यौ ।
प्रेमपानमिव चक्रतुरन्योऽन्यावलोकवशकूणितनेत्रौ ॥ ४३ ॥
स्मेरपङ्कजवने कथमन्योऽज्ञास्यदास्यकमलं कमलाक्ष्याः ।
कैतवेन कमले यदि सिक्ते नाऽहसिष्यदियमेव विमुग्धा ॥ ४४ ॥
चुम्बितं स्मितसरोरुहबुद्ध्या तेन चाधरदले प्रहृताऽपि ।
कान्तवक्त्रमलिना किल दष्टाऽस्मीति तथ्यमपि नो बुबुधेऽन्या ॥४५॥
वारिभिश्चलदृशामधरेभ्यो दूयते स्म नवयावकरागः ।
मण्डनं तदधिकं तु वितेने तत्र[2] कान्तनिहितै रदनाङ्कैः ॥ ४६ ॥
मण्डनं चपलदृग्नयनानां वारिणाऽञ्जनमलोऽपि लवेन ।
भञ्जनेऽपि हि जडस्य मतिः किं कृत्यवस्तुवदपाटवमेति ॥ ४७ ॥
बिम्बितेऽम्बुनि निजाऽऽननपद्मे काऽपि दृग्द्वयमवेक्ष्य झषाक्षी ।
पद्मकोशगतमीनधिया तद् गृह्णती दयितचित्तमगृह्णीत्[3] ॥ ४८ ॥
सान्द्रितेऽम्बुनि कललननानां नेत्रकज्जलभरैर्हसितैश्च ।
गाङ्गवारिकलितां रविकन्यां मेनिरे युवजनाः किमु धन्याम् ॥ ४९ ॥
एहि मङ्क्षु नलिनीषु निलीनां दर्शयामि सुतनो ! भवदालीम् ।
विप्रतार्य दयितामिति कश्चित् तां जिगाय निभृते पणबन्धे ॥ ५० ॥
प्रौढदेवनवशाद्रितवृद्धौ[4] सारसेऽम्भसि निमग्नसरोजे ।
कुन्तलच्छलमिलद्भ्रमरौघैर्योषितां सरसिजायितमास्यैः ॥ ५१ ॥
उत्तानमम्भसि सुखं प्लुतिलाघवेन निस्पन्दमम्बुजदृशामभितस्थुषीणाम् ।
रेजुः स्तनाः सुविवृता भृशमुच्छ्वसन्तश्चक्रा इवापविवरे मिलितस्वकान्ताः ॥५२॥
व्यात्युक्षीषु भृशोक्षणाकुलितया वक्रीकृतग्रीवया
व्यालोक्य प्रतिबिम्बितां स्वकबरीं पृष्ठप्रतिष्ठेऽम्बुनि ।
प्रेयान् वारहिशङ्कया स्म परया संश्लिष्यते भीतया
लातुं स्वासिलताशया पुनरिमां चिक्षेप हस्तं[5] स च ॥ ५३ ॥

---

1 K जलमध्ये । 2 K तदैव । 3 K °मगृह्णात् । 4 K शाद्रुतवृद्धौ । 5 K हस्तादपि ।

चिकुरनिचयमाशु कम्पयामास नेत्राम्बुरुहमपि मुकुलीचकारोरःपीठे लुलोठ ।
जघनतटमुपासामास पस्पर्श पादौ प्रिय इव वनितानां सारसो वारिपूरः ॥५४॥

स्रस्तो धम्मिल्लबन्धो गलितमखिलमप्यञ्जनं लोचनानां
भ्रष्टो[1] रागोऽधराणामविरलपुलकैर्व्याप्तमङ्गं समग्रम् ।
नष्टा शक्तिः कपोलस्तनतटलिखिता पत्रलेखाऽप्यपास्ता
वारिक्रीडा वधूनामजनि रतिरसस्य प्रवेशध्रुवेव ॥ ५५ ॥

परिनिस्सरच्चटुलदृग्जघनोरसिजावलीरिततरङ्गतति ।
अभिनज्जलं झगिति कूलभुवः[2] सहयानमाभिरमितन्वदिव ॥ ५६ ॥

अत्युत्सुकत्वनिपतत्पदघातजातस्फीतध्वनिश्रुतिवियोजितपक्षिपक्षाः ।
अन्योऽन्यपाणितलताडनलब्धलक्ष्या नीरान्निरीयुरथ दम्पतयः सहेलम्[3] ॥५७॥

विलोक्यतां स्वच्छतयाऽबलानां जग्मुर्न वासांसि जलार्द्रितानि ।
ध्रुवं परित्यागभयेन तासां निलीय देहद्युतिषु स्थितानि ॥ ५८ ॥

गतेऽङ्गरागेऽपि तनूदरीणां न कायलक्ष्मीरधरीबभूव ।
स्वभावरम्यस्य जनस्य यद्वा विभूषणं मङ्गलमात्रदायि ॥ ५९ ॥

विनिर्गतानां सरसो वधूनां पृष्ठे प्रलम्बी शुचिकेशपाशः ।
परीक्षितुं प्रत्युत हेमपट्टे निवेशिताऽभात् कषपट्टिकेव ॥ ६० ॥

विनिर्गतानां सरसो वधूनां पृष्ठे प्रलम्बी शुचिकेशपाशः ।
मेरोः शिलायां सुखमासितस्य शिखण्डिनो बर्हमिव व्यराजत् ॥ ६१ ॥

निर्नीरितानि विबभुर्वनिताजनानां चेलाञ्चलैर्मृदुतरैर्नितरां वपूंषि ।
उत्तेजितानि सुमनोविशिखस्य शस्त्राणीवाऽखिलत्रिजगतीजयबद्धबुद्धेः ॥६२॥

उन्मिषन्नयननीलसरोजा भ्रूलतालसितकान्ततरङ्गाः ।
मुक्तबन्धकचशैवलरम्याः सारसीं श्रियमलानिव नार्यः ॥ ६३ ॥

भूषाऽपहृत्या रिपुमस्मदीयमसौ यमार्त्तः सलिलं बिभर्त्ति ।
इति प्रकोपाभिरिवाङ्गनाभिरबध्यतावर्त्य शिरोजपाशः ॥ ६४ ॥

इत्थं विधाय जलकेलिमनन्यजन्यां
श्रीजैत्रसिंहतनयः स हमीरवीरः ।
स्वान् स्वान् गृहान् प्रति विसृज्य जनान् सहैतान्
वेश्माससाद निजमर्थिकृतप्रसादः ॥ ६५ ॥

इति *श्रीजयसिंह*सूरिशिष्यमहाकवि*श्रीनयचन्द्र*सूरिविरचिते श्रीहम्मीरमहा-
काव्ये वीराङ्के जलक्रीडावर्णनो नाम षष्ठः सर्गः समाप्तः ॥

---

1 K नष्टो । 2 K कूलभुवं । 3 K सलीलम् ।

अथ सप्तमः सर्गः ।

अथ विश्रामसमयागमलालसं चलदश्वां प्रविदन्निव मानसम् ।
चरमभूमिधराग्रिमचूलिकामहिमरश्मिरभूषयदंशुभिः ॥ १ ॥
विधिवशाद् विपदं समुपेयुषीं न खलु कोऽप्यवधीरयितुं क्षमः ।
यददिवेत्य हिमद्युतिमण्डलः[1] समभवद् विगलद्द्युतिमण्डलः[2] ॥ २ ॥
जगति नाम पतङ्ग इति स्फुटं मम दधुस्तदमी शलभेषु किम् ।
इति वहन्निव सूरिषु कोपितां ग्रहपुषोऽजनि लोहितविग्रहः ॥ ३ ॥
अविरताम्बरसञ्चरणोल्लसद्गुरुपरिश्रमसङ्गतविग्रहः ।
सलिलकेलिचिकीरिव वाहिनीदयितमध्यमगाहत भास्करः ॥ ४ ॥
जलशयेशशयाम्बुजनिह्नुतैककुचसिन्धुसुतोरसिजभ्रमम्[3] ।
प्रवितरज्जगतां जलधेर्जले शकलमग्नमभाद् रविमण्डलम् ॥ ५ ॥
भुवनचक्षुषि भास्वति वारुणीमभिनिषेव्य जडेष्वधिमज्जति ।
उचितमेव तदा त्वमपि[4] व्यधाद् यदखिलं भुवनं स्ववशं तमः ॥ ६ ॥
अहिमभासि हृदेकतमप्रिये नयनमार्गमतीत्य गते क्वचित् ।
अपरदिग्भवरागहुताशने प्रविविशे प्रणयेन दिनश्रिया ॥ ७ ॥
गलितभासि हृदेकतमप्रिये व्रजति भास्वति शोच्यदशान्तरम् ।
विशदलिव्रजकैतवतोऽविशद्दिव शोकतमः सरसीरुहाम् ॥ ८ ॥
विधिनियोगतयाऽपतदापदं सममिवीक्ष्य पतिं[5] महसामिह ।
सपदि संचुकुचे सरसीरुहैरपश्रिभिः सुहृदामुचितं ह्यदः ॥ ९ ॥
सितगुरेष कुरङ्गकलङ्कभाग् मलिनहृत् क्षणदाऽस्य वधूरपि ।
तदिह ही किमवेक्ष्यत इत्यभूत् कमलिनी विनिमीलिसरोजदृक् ॥१०॥
उडुपतिद्युतिपानपरिस्फुरत्खगजिगीषुतयेव दिनात्यये ।
निशि वियोगवतां पततां गणा निखिलमेव रवेः पपुरातपम् ॥ ११ ॥
पुनरनाप्तिभिया पपुरातपं दिनकृतः किममून्यधिकं रुचेः ।
रथपदाह्वपतन्मिथुनानि नो यदधुना व्यषहन्त सहासितुम्[6] ॥ १२ ॥
निशि वियोगवतः पततः स्थिता बिसलता चलचञ्चुपुटे बभौ ।
असुगणं वनिताविरहाद् विनिर्जिगमिषुं विनिरोद्धुमिवाऽर्गला ॥ १३ ॥
बिसगुणोऽपि ययोर्युगचारिणोः कथमपि स्म न माति पुरान्तरा ।
अपि सरिद्दयितः सममात्तयोर्विलसितं न विधेः स्मृतिगोचरः ॥ १४ ॥

---

1 K °मण्डलं ।　2 K °मण्डलम् ।　3 K सलिलशायिशया° ।　4 K त्वमिदं ।
5 K पतिमवेक्ष्य महामनसो मुहुः ।　6 K सहस्थितिम् ।

रुरुदृशां स्ववशे सकलं जगद् रचयितुं रतिजीवितवल्लभः ।
दिनविरामरणन्मुरजावलिस्वनमिषेण निदेशमिवादित ॥ १५ ॥
तिमिरराशिरुदित्वरशक्तिरप्यधित नीचपदानि पुरा वशे ।
निजसमानवशीकरणोद्यमः प्रविजिगीषुगुणो ह्ययमादिमः ॥ १६ ॥
स्मरशरव्यितदुर्दयिताङ्गना ज्वलितदुःखहुताशकणा इव ।
प्रतिपदं कृतलोचनकौतुका रुरुचिरेऽतितरां शिखिकीटकाः ॥ १७ ॥
अतिविदग्धतया भ्रमिमाचरन् न कुलटाजन आट दृशोः पथम् ।
विविधयुक्तिनिषेवणहृष्टहृन्मनसिजेन वितीर्णवरादिव ॥ १८ ॥
भृशमपि क्षिपति प्रतिवासरं मयि मुहुर्मुहुरेति तमः कुतः ।
इति रुषेव वहन्नतिलोहितं वपुरगादुदयं रजनीकरः ॥ १९ ॥
शमयितुं तिमिराणि यदुत्सुकोऽप्यमृतसूरुदियाय शनैः शनैः ।
तदिदमङ्कमृगो मघवप्रियार्पिततृणग्रसने खलु लुब्धवान् ॥ २० ॥
भुवनभेदनसम्भवशोणितोपचितमन्मथमार्गणघर्षणैः ।
अरुणतामिव यच्छशिमण्डलं श्रियमदाद् गगनस्य निजस्य च ॥२१॥
क्रकचचक्रजकेसरपाण्डुरप्रसृमरोरुकरोत्करकैतवात् ।
अनुनिशादयितां हिमवालुकाप्रकरमास्यदिवाखरदीधितिः ॥ २२ ॥
हृदयमध्यगतं दधदुच्चकैः स्फुटतराङ्कमिषेण तमस्विनीम् ।
अजयदर्धवपुर्धृतवल्लभं पशुपतिं प्रणयातिशयाच्छशी ॥ २३ ॥
सरसिजानि विहाय हरिप्रिया तुहिनदीधितिमण्डलमाश्रयत् ।
अधिगताङ्ककलङ्कमिषोन्मिषत्स्फुटकटाक्षनिरीक्षणलक्षिता ॥ २४ ॥
हिमकरं दयितं मिलितुं निशा विवसिताद्भुतभूषणया दधे ।
अविरलोदिततारकपेटकच्छलमयी नवमौक्तिकजालिका ॥ २५ ॥
चिरभवन्मिलनादुपगूहनं द्विजपतावदयं ददति श्रियः ।
त्रुटति हारलता स्म समुत्पतद्विविधमौक्तिकतारकिताम्बरा ॥ २६ ॥
सुमशरान् प्रविहाय सुमायुधः शशिकरान् यदमन्यत तत्पदे ।
उचितमेव नवं नवमिच्छतां परिचिते रिपुता हि महीयसी ॥ २७ ॥
किममृतैः सिषिचे किमु चन्दनैः किमु हमीरकुमारयशोभरैः ।
चितमिदं जगदिन्दुकरोत्करैर्व्यतनुतेति वितर्कपरम्पराम् ॥ २८ ॥

---

1 K प्रतिलवं । 2 K कुपथसंश्रयणोऽद्भवपातकावतमसैरिव निबिचिरं वृतः । 3 K कवलितुं । 4 K प्रियार्पित° । 5 K क्रकजपत्रज° । 6 K गतां° । 7 K °"या तुहिन°" इत्यारभ्य "°स्फुट° पर्यन्तः पाठो मूलप्रतौ नास्ति अतः K प्रतेरुद्धृतः । 8 K किमुत दुग्धपयोनिधिवीचिभिः ।

प्रियसरोजदृशां रतविज्ञतास्थितिविवेकविधाविव दीक्षिताः ।
विविधभोगवतां रतमन्दिरे रुरुचिरे परितोऽपि दशेन्धनाः ॥ २९ ॥
प्रणयिभिः सह साम्प्रतमाहवः स्मरभवो भविता सुमहानिति ।
विविधभूषणकङ्कटसङ्ग्रहाऽऽग्रहवशं सुदृशो हृदयं व्यधुः ॥ ३० ॥
श्रवणकुण्डलवेणिविलोचनाम्बुजमृजोपधिना मृगलोचनाः । 5
सपदि चक्रकृपाणशरावलीप्रभृति शस्त्रचयं किमसज्जयन् ॥ ३१ ॥
उपगते दयिते भविता मया किमिह संयतयापि मुहुर्मुहुः ।
इति रणत्कलकिङ्किणिकामिषान्नववधूरिव मेखलया जगे ॥ ३२ ॥
तरुणिमोष्मविशुष्यदुपाहिताच्छतरचन्दनलेपनकैतवात् ।
मदनयुद्धकृते परिधापिताविव कुचौ परया नववाससा ॥ ३३ ॥ 10
रणितकिङ्किणिसन्मणिमेखलावलिमिषेण नवोढवधूरते ।
पतिभयादभितः स्मरमन्दिरं स्फुरितजागरिदुर्गमिव व्यधात् ॥ ३४ ॥
रुरुचिरेऽतितरां रुचिरद्युतिप्रसवसम्भवशेखरराजयः ।
स्मितसरोजदृशां मुखचन्द्रमःप्रसरदुन्नतिकान्तिचया इव ॥ ३५ ॥
सरलकज्जलकान्तलिपिच्छलाद् वशकृतौ जगतः कमिता रतेः । 15
स्वसुभटेषु पुरोगमतां दृशोः कथयति स्म न किं हरिणीदृशाम् ॥३६॥
प्रतिफलन्निह मा रजनीकरो विदितलक्ष्ममुखं वितनिष्ट नः ।
इति धियेव जितेन्दुकपोलयोर्विदधिरे नवपत्रलताः स्त्रियाः ॥ ३७ ॥
सहजपाटलतातिमनोहरे दधुरमूरधरे यदलक्तकम् ।
तुहिनभासि सितीकरणश्रमभ्रमकरं यदजायत नो किमु ॥ ३८ ॥ 20
उरसिजेषु सखीजननिर्मिता मकरिका विबभुर्मृगचक्षुषाम् ।
मकरकेतुविभोः स्तनवासिताऽनुमितिसाधनबन्धुरविभ्रमाः ॥ ३९ ॥
परिपिबन् रमणो ध्वनिमेतयोर्भवति नैव समाप्तरतादरः ।
चरणयोर्विधृते इति नूपुरे मृदुगिरो हृदये बहु मेनिरे ॥ ४० ॥
न पटयोरपि सूचिकया विना भवति योग्यतमा किल योजना । 25
दयितसङ्गमनेष्विति दूतिका जनगतागतमभ्यलपन् स्त्रियः ॥ ४१ ॥
स्वमपि कान्तममूष्वभितो विलासिनमवेक्ष्य परिच्युतमत्सरा ।
रतिरपि श्रयति स्म तनूदरीर्बलवता हि बलं न सहोचितम् ॥ ४२ ॥
अथ मिथोऽपि मुखाम्बुजदर्पणे नयनगोचरचुम्बि तनुश्रियः ।
उदितकामरसा दयितागमोत्सुकतरं दधिरे प्रमदा मनः ॥ ४३ ॥ 30

---

1 K रतिमन्दिरं । 2 K दृढं मुहुः । 3 K °गुणमिषेण । 4 K प्रसरदुन्नत° । 5 K पुरस्सरतां । 6 K °गोचरनीत° ।

चलदृशां दयितेषु समानताम्बुजरुचेव कृशत्वममाश्रयत् ।
शितिसरोजरुचेव सह क्षणादतिशयत्वमगादनुनेतृता ॥ ४४ ॥
मृगदृशः स्म विभान्ति कटाक्षिताः प्रणयिभिः[1] स्फुटितोष्मपयःकणाः ।
निशितपक्ष्मविभिन्नवपुःस्रुताधररसबिन्दुचयोपचिता[2] इव ॥ ४५ ॥
मृदुरवा दयितेषु यथा यथाऽऽयतकटाक्षचयानभिचिक्षिपुः ।
रतिपतिः स्पृशति स्म तथा तथा धनुरधिज्यमसौ विदयाशयः ॥४६॥
चरणलम्बितहारमिषाच्छ्रिताक्षवलयैस्तलिमैर्जपसोद्यमैः[3] ।
अजनि वारवधूविटनिर्मितप्रबलमोहनभङ्गभयादिव ॥ ४७ ॥
इह धृते प्रविलोकयिता स मां तमहमप्यखिलाऽऽत्मतया रते ।
इति विचिन्त्य पराधित पार्श्वतो गृहमणिं ज्वलितोज्ज्वलवर्तिकम् ॥४८॥
अयि ! तनोषि किमु क्षणुकोदरीति निगदत्यपि भर्त्तरि सत्वरम् ।
त्यजति मानमशेषमपि प्रिया स्म कटरे रजनीसमयोर्जितम् ॥ ४९ ॥
प्रियसमागमसूचकवामदृक्स्फुरणतो मुदिताशययाऽन्यया ।
हृदयनाथमनुप्रहिताऽपि किं निजसखी न पथः स्म निवर्त्यते ॥ ५० ॥
अपि लवो युगकोटिशतायतेऽधृतिपरस्य जनस्य ऋते यतः ।
हृदयहारिणि तत्र किमौचिर्ती स्पृशति मानिनि मानपरिग्रहः ॥ ५१ ॥
अनुनयन्नपि चैवमुपेक्षितो ह्यसुभगामिव चेद् भवतीं त्यजेत् ।
किमयशःपटहो न तदा तव व्रजति कोपिनि डिण्डिमडम्बरम् ॥५२॥
रतिकृतां प्रथितो रिपुरेव यस्तमपि मानभरं परिपुष्यती ।
सुचरितेत्युदिताऽपि तदाशये कथमिव प्रतिभासि विलासिनि[4] ! ॥५३॥
प्रतिवधूरधिगत्य समं त्वया सकलहं विदधे यदि त्वं स्ववसात् ।
तव तदास्तु पुनः स कुतः करे परिचिताः पुरुषा हि न कस्यचित् ॥५४॥
सखि ! हृदेकहितं भज मार्दवं परुषतां तु दुरन्ततरां त्यज ।
परुषता रचिता हि हृदीश्वरे फलति केवलमात्मनि मूढता[5] ॥ ५५ ॥
मम[6] वचोऽद्य कुरु स्वहितं न चेदनुशयं हृदयं तव यास्यति ।
इति परा प्रतिबोध्य सखीं निजां रमणमन्दिरमध्यमपानयत् ॥ ५६ ॥
—षड्भिः कुलकम् ।

स कितवोऽद्य समेष्यति चेत् तदा भुजयुगेन निबध्य रतालयम् ।
समुपनीय निहन्मि तथा पुरा पुनरुपैति यथा न तदालयम्[7] ॥ ५७ ॥

---

1 K प्रणयिभिः प्रणयेन कटाक्षिताः पुलकिताः बभुरम्बुजलोचनाः । 2 K °चयप्रचिता ।
3 P °स्तलिमर्जपसो° । 4 P विलासिनी । 5 K मूढताम् । 6 K कुरु ममाद्य वचः ।
7 K तदन्तिकम् ।

हृदयनिष्कुटमध्यकृतोद्गमा कमितरीति मनोरथवल्लरी ।
सुभगया परया परया मुदा सफलभावमनीयत सत्वरम् ॥ ५८ ॥
अनुनयान्वितमाश्रितगद्गदं सखि! तथा वद जीवितवल्लभम् ।
स समुपैति यथा न च कुप्यतीत्यभिविबोध्य सखी प्रहिताऽन्यया ॥५९॥
यदि वियोगमवश्यमियध्यथं स्मयमधास्यमिमं हृदि किं तदा ।
इति परा परितप्य मुहुर्मुहुर्नयनमालिषु दीनमथाक्षिपत् ॥ ६० ॥
प्रिय! समेष्यसि सुभ्रु! विमानहृत् तव किमीश! यशो मदनस्य किम् ।
स हि ममेक्षणजः किल सोऽपि तत् तव परेति हृदीशमजीहसत् ॥६१॥
प्रतिदिनं शतशोऽपि निवारितो मुहुरिह त्वमुपैषि कयाऽऽशया ।
कृतककोपवतीत्यपरा रयादुपरितल्पमपातयदीश्वरम् ॥ ६२ ॥
विनयतो वसनं कमितुः करौ करयुगेन परा त्रपयाऽधित ।
स्वयमपि स्फुरितोद्घुषणैर्गलन्निवसना सहसाऽथ किमातत ॥ ६३ ॥
यतिविरोधिलसद्रसपूर्णयोरुपरि लोलदृशः स्तनकुम्भयोः ।
बभतुरीश! कराम्बुरुहे अधोमुखपिधानतुलामिव बिभ्रती ॥ ६४ ॥
दृगतिथौ दयिते मृगचक्षुषां हृदि लवं यदि मानभरो लसत् ।
गृहपतौ समुपेयुषि कश्चिरं परगृहे लभते यदि वा स्थितिम् ॥ ६५ ॥
स्पृशति भर्त्तरि हृद्धृदयेशयः सचकितं मदनोऽन्यनतभ्रुवः ।
समुदतिष्ठदसंशयमत्रुटन्नितरथा किमु कञ्चुकसन्धयः ॥ ६६ ॥
सपदि गोत्रपरिस्खलनात् प्रियामनु परो दहनास्त्रमिवाकिरत् ।
समधित प्रतिशस्त्रमिवाथ सा जलमयं स्रवदश्रुततिच्छलात् ॥ ६७ ॥
तव मुखं कमलं मम चन्द्रमास्तदनयोरधुना स्मरकारितः ।
भवतु सन्धिरिति प्रवदन् परः स्वदयिताऽऽननयोजनमातनोत् ॥६८॥
तव ममाप्यधरं निपिपासतोर्विधुरताऽस्तु न कस्यचनेत्यथ ।
विलसतः स्म तथा पपतुर्यथाऽधरदलं सममेव वधूवरौ ॥ ६९ ॥
उपरि यावमृतस्य तयोरिहाप्युपरितैव भवत्विति दम्पती ।
विलसतः स्म तथाऽधरयोर्यथोपरितयैव मिथोऽजनि चुम्बने ॥ ७० ॥
दयितयोरमृतोपरि यौ तयोरधरयोरधरेत्यभिधा कथम् ।
अवगतं यदि वाऽधरता तयोरधरपानविधौ ग्रहणान्मिथः ॥ ७१ ॥
अमृतमित्यनृतं दयिताधरो यदि तदेष न किं गद नामृतम् ।
निमिमिषुर्यदमुं पिबतां दृशो विमुमुहुर्हृदयान्यपि कामिनाम् ॥ ७२ ॥

---

1 K °मज्जिर° । 2 K अहितगोत्र° । 3 K मिथोऽपि तथाऽधरयोरुपरितैव यथाऽजनि चुम्बने । 4 K मदनामृतम् ।

विशदमेव न किं दयितावलोकनसुधारसपानमसूचयन् ।
मुकुलिताक्षससीत्कृतशब्दिताऽऽननपुरः करणेन विलासिनः ॥ ७३ ॥
हृदि मयाऽनुसृते तव सा स्वयं निरगमत् किल माऽत्र विषीद तत् ।
दयितमित्यभिधास्खलनादवाङ्मुखमभाषत काऽप्यधृताधृतिः ॥७४॥
5 प्रियतमाधरपल्लवचुम्बनोपनतकान्तमुखेन्दुमिषाच्छशी ।
मयि सुधा किल तादृगिहापि किं किमधिकेति विवेक्तुमिवालसत् ॥ ७५ ॥
दयितयोर्मिथ एकमुखासवग्रहणलम्पटयोर्मुखसङ्गमे ।
द्विशशितापनिमित्तमुदत्वरी न किमुवाह विपर्ययवर्जनाम् ॥ ७६ ॥
श्रियमुषामुख एव हरन्निजां प्रियतमामुखवेषधरः शशी ।
10 अधरपानमिषाद् रुरुधे न किं वदनवारिरुहेण विलासिनः ॥ ७७ ॥
प्रणयिना विधृताऽपि मनस्विनी वपुरुवाहयदुत्पुलकं किल ।
किमियताऽपि जगाद न सा वशं तव गताऽस्मि विधेहि यदीहितम्॥७८॥
भज धृतिं त्यज भीतिमहेतुकां ह्रियमवाञ्चय वक्रमुदञ्चय ।
अभिनवामुपदेष्टुमिति प्रियामजनि कोऽपि सखीव पटुः स्वयम् ॥७९॥
15 जघनसङ्गमनोत्सुकमानसं हृदयनाथमवेत्य मृगीदृशः ।
स्वयमपासरदेव तदंशुकं किमुचिताचरणे गुणिनोऽबुधाः ॥ ८० ॥
असह आशु विदूरयितुं परो युवतिनीविमतित्रुटदुत्सुकः ।
विषहते समुदीरितमन्मथो न खलु कश्चन कालविलम्बनम् ॥ ८१ ॥
परिसमाप्तरतोऽपि परः प्रियाधररसं सुरसायनवत् पिबन् ।
20 पुनरपि स्फुरिताऽसमसायको व्यधित किं किमसौ न हृदीप्सितम् ॥८२॥
शशिरवी सुरतेषु तथाचलत्कनककुण्डलकैतवकल्पितौ ।
मृगदृशः पुरुषायितमूर्जितं समभिवीक्ष्य झलज्झलिताविव ॥ ८३ ॥
वरयिता रतकेलिषु[3] कौशलं भृशमसौ वहतीति परा मुदा ।
ऋजुरणन्नवनूपुरसिञ्जितैरभिजगाविव तद्गुणगौरवम् ॥ ८४ ॥
25 मम मुखस्य विधोरपि दर्शनात् तव दृशौ कुमुदे अपि [4]मीलितः ।
किमिदमित्यपरा शयनोन्मुखं स्तनघटेन जघान हि तं मुहुः ॥ ८५ ॥
पुनरुपैषि तदोकसि तां विलोकयसि जल्पसि वाऽथ तया समम् ।
दयितयेत्युदितो विदधे शठो न हि न हीति मृषाऽप्यमृषोत्तरम् ॥८६॥
जहिहि लाक्षणिकीं रुषमुत्तमे ! न हि न वेद्मि मनस्तव यन्मयि ।
30 अहह पश्य तवाधरपल्लवः स्फुरति मामिव चुम्बितुमुत्सुकः ॥ ८७ ॥
अपि च रागमभान्तमिवाशये ! न वहतो न दृशौ बहिरुद्गतम् ।
इति विदग्धवचाः कुपितामपि प्रियतमां न परः किमहासयत् ॥८८॥ —युग्मम् ।

1 K °ताक्षिमसीत्°। 2 K °नुसृते। 3 K रतिकेलिषु। 4 K मीलनः।
5 K किमद्भुतमित्यपराकुला।

रचयिता सखि ! तत्र किमेष मां नवरतं भविता च कथं कथम् ।
इति मुहुः समवादि न का सखी रतिरसोत्सुकयाऽपि नवोढया ॥८९॥
प्रियतमे पुरुषायितलाघवं किमपि पश्यति वक्रितकन्धरम् ।
असहया रतमुज्झितुमन्यया गृहमणिः शमितः कुसुमैर्ह्रिया* ॥ ९० ॥
सुरतकेलिषु सुभ्रु ! तवाहितं किमपि चेच्छपथोऽस्तु तदाऽत्र मे ।
श्रुतगिरं यदि मां[2] न च मन्यसे ननु विधाय न पश्यसि किं तदा ॥९१॥
इति नवां रमणीं रतये परः स्मरकलाविदुरः समबूबुधत् ।
अतिविचक्षणताऽतिविमुग्धतासुखविबोध्यमिदं यदि वा द्वयम् ॥९२॥
[†इति नवां रमणीं रमणः परः स्मरविलासकृते समबूबुधत् ।
सततनिर्मितकामकथोल्लसन्नवनवोक्त्यभिषिक्तमनोभवः ॥ ९३ ॥]
प्रियतमस्य भृशं सुरतार्दने शपथपूर्वमदात् सुरतं पुरा ।
तदनु लब्धरसा न तदस्मरन्नववधूर्वपु रे! स्मरवल्गितम् ॥ ९४ ॥
अधरपातविधौ स्तनमर्दने नखरदोल्लिखने[3] परिरम्भणे ।
क्वचिदपि स्खलति स्म न कामिनां मतिरिहाप्यवधानभृतामिव ॥ ९५ ॥
हृदि यदेव दधे दयितै रते युवतयोऽग्रत एव तदाचरन् ।
इतरथा कथमेकमनस्कता रतिरहस्यमुपैति[4] यथार्थताम्‡ ॥ ९६ ॥
इह सुखेषु सुखं सुरतोद्भवं महदिहापि मिथोऽप्यनुकूलता[5] ।
रहसि केलिरिहापि यदृच्छया सममिहापि रतिर्यदि किं पुनः‡ ॥९७॥
प्रियसखीभिरपि प्रतिबोधिता नवरतोत्सवतो भयशङ्किनी ।
अतितरां परिरभ्य हृदीश्वरं कपटमुद्रितदृक् शयितेतरा ॥ ९८ ॥
दयितदष्टरदच्छदपल्लवा नववधूः करकम्पनकैतवात् ।
विगतवन्ति दिनानि रतोत्सवैर्विरहितानि शुशोच मुहुर्न किम् ॥ ९९ ॥
रतिरसं कलयन् नितमां परस्तदुरुतागुणविघ्नितचुम्बनः ।
परिनिनिन्द कुचौ मुहुरीक्षयन् न च वधूं समयः स हि तादृशः ॥१००॥
रतिरसोपरमे स्खलनात् परः प्रणयिनीकुचपर्वतमस्तके ।
निपतितोऽपि मुमूर्च्छ न सम्मुखं दृढतरोऽजनि रन्तुमहो! पुनः¶॥१०१॥
प्रणयिनां यदभिद्यत कौसुमैरपि शरैर्हृदयं सुमधन्वनः ।
प्रणयिनीकुचशैलमहाहतीस्तदसहिष्ट यदद्भुतमेव तत्¶ ॥ १०२ ॥

---

1 K कियद्व्यथस् । * पद्यमिदं K प्रतौ नास्ति । 2 K मां च न मन्यसेऽनुभवमेव न पृच्छसि किं तदा । † एतत्पद्यमुपरितनस्य पद्यस्य पाठान्तररूपेण K आदर्शे लिखितं लभ्यते । 3 K नखशिखालिखने । ‡ एतत् पद्यद्वयं K प्रतौ व्यत्ययेन समुपलभ्यते । 4 K भवमुखेषु । 5 K मिथोऽपि विदग्धता । ¶ एतत् पद्यद्वयं K प्रतौ नोपलभ्यते ।

सपरिवेषशशिश्रियमुद्वहद्[1] भुजयुगान्तरवर्ति मुखं स्त्रियः ।
[2]विचलिपोर्हृदयाधिपरेतसोऽपशकुनाय न किं समजायत ॥ १०३ ॥
रतिरसं परमात्मरसाधिकं कथममी कथयन्तु[3] न कामिनः ।
यदि सुखी परमात्मविदेकको रतिविदौ सुखिनौ पुनरप्युभौ ॥ १०४ ॥
[4]अधिकृतां करकङ्कतयोजनां विदधतौ रहसीन्दुमुखीवरौ ।
विबभतुः सुगृहीतपरस्पराविव मिथोऽप्युपपादयितुं रतिम् ॥ १०५ ॥
अधिशिरोधि मिथः करकङ्कतप्रगुणि[5]ताननयुग्ममिषादभात् ।
प्रणवसंपुटयन्त्रमिव स्फुरद्विवलयं[6] रतिकृष्टिकृतेऽन्ययोः ॥ १०६ ॥
प्रणयिनो मुखचन्द्रमसि स्फुरत्यभिमुखं तरले! परिचुम्बितुम् ।
अनुचितं किमिदं नवनायिकामुखसरोजमजायत यत् पराक् ॥ १०७ ॥
रतिविरामभवादुपगूहनाद् विघटनेच्छुमवेत्य परा प्रियम् ।
सुदृढमूरुयुगेन निपीडयन्त्यतत हुंहुमिति स्मितजल्पितम् ॥ १०८ ॥
परिपिबन् दयितो दयिताधरं मुकुलिते नयने यदसौ व्यधात् ।
किममुनैव[7] जगाद न यत्पुरो[8]ऽमृतमवेक्षितुमप्यसमञ्जसम् ॥ १०९ ॥
सुरतकौशलशालिनि वल्लभे मुकुलिताक्षिमिषात् समवीविशत् ।
अविषयो वचसां किमिहान्तरा स्फुरति द्रष्टुमिवेति परा दृशौ ॥ ११० ॥
रतिकलां[9] कलयत्यसुवल्लभे किमपि कुञ्चिमुखी सुमुखी न वा ।
हह ननेति ममेति वचो मिषान्मदनदीपनमन्त्रमिवास्मरत् ॥ १११ ॥
अपदयं दयितस्य रतोत्सवं रचयतो नतनाभिपथादधः ।
करतलं ददती मुदमातनोन्नववधूरधिकां सुरतादपि ॥ ११२ ॥
अदहदीश्वरनेत्रहुताशनो रतिपतिं विदुषामिति यद्वचः ।
[10]ऋतमर्मस्त तदत्र स एव यो वशयितुं प्रबभूव न मानिनीम् ॥ ११३ ॥
मदनोऽरिरस्य मदनारिरित्यसौ मदनेन देह इति साधुरन्वयः ।
भुवि कामतत्त्वमधुनेति केवलं कथमन्यथाऽलसदहो[11]! समन्ततः ॥ ११४ ॥
उत्प्लुत्य तल्पादितरा रतान्ते कान्तं भुजाभ्यां दृढमालिलिङ्ग ।
आदातुकामेन तदङ्गयष्टेरनङ्गसर्वस्वमपि प्रपीड्य ॥ ११५ ॥
दध्रेऽङ्गानि यथा यथाऽतिकठिनान्येषा नवोढा रते
शङ्केऽधत्त तथा तथाऽतिकठिनं चेतोऽपि चित्तप्रियः ।
मा मा मा[12] न न मुञ्च मुञ्च हहहेत्युल्लापवत्यां मुहु-
स्तस्यां नो कथमन्यथाऽस्य करुणं[13] तारुण्यमासादयत् ॥ ११६ ॥

---

1 K °मावहत् । 2 P विचलिपोऽहृदया° । 3 K कथयन्ति । 4 K अधिकृकं । 5 K प्रगुणनोपधिना प्रिययोरभात् । 6 K °त्रिवलयं । 7 K °मुनेव । 8 K तत्पुरो । 9 K रतिकलां । 10 K तदकृतं तदमंस्त स एव यो । 11 K स्फुरदहो । 12 K मा मद । 13 P करुणातारुण्य° ।

दम्पत्योर्वदनेन्दुसङ्गममिषात् तथ्यं मिथश्चुम्बने
किं नैवाभ्युदगच्छदच्छरुचिभृत् सद्यः शशाङ्कद्वयम् ।
आसीत् तेन महाहवः स्मरभवो यद्युक्तमेवेति तत्
प्रीतिर्यत्र परैव युक्तमपि तद् यत् क्षेत्रयोरन्यता* ॥ ११७ ॥

दृष्ट्वा स्वं प्रतिबिम्बमेव वहति प्रेयानयं स्वप्रिया-
मक्ष्णीति स्रवदश्रुवार्भिरकरोन्मुग्धा निपानं पुरः ।
तत्रैव प्रतिबिम्बनान्निपतितां भर्त्रा[1] समं यत्पद-
द्वन्द्वे स्वे मुमुदे च वीक्ष्य किमितोऽपि स्यात् परं योषिताम् ॥११८॥

कोऽपि स्मरोन्मुक्तविषाक्तबाणमूर्च्छामतुच्छामिव हर्तुकामः[2] ।
शैलाविवालम्ब्य कुचौ कराभ्यां पपौ सुधामिन्दुमुखीमुखेन्दोः† ॥११९॥

सुरत्राणः कस्य त्वमिति मुहुरेवाभिहितया[3]
पणाख्या प्रोक्तां स्मरशरशरव्यत्वमितया ।
परेषां सर्वेषामवनिहिमरश्मे ! तव पुनः
करक्रीतादासीगिरमिति पपौ कोऽपि सुकृती† ॥ १२० ॥

स्वाभाविकात् सुरततो विपरीतमेतद्रागं विशिष्य सुरतं वितनोति यूनाम् ।
निश्चेतनाऽप्यजनि रागवती यदत्र शय्या मयावकवधूपदबिम्बदम्भात् ॥१२१॥

स्मरस्मेरलीलासु तल्पादधस्तात् प्रसूनानि बभ्राजिरे निष्पतन्ति ।
मृगाक्षीवपुर्वल्लिविश्लेषभावाविरासीन[4]दुःखाद् ददन्तीव झम्पाम् ॥१२२॥

यस्याङ्गं[5] तावदेवं बहिरपि विहितस्पर्शनं कामिनीना-
मीदृक्सौख्यं विधत्ते स खलु रचयिता किं न मध्ये[6] प्रविष्टः ।
इत्थं ध्यात्वा रतान्ते सुदृढतमपरीरम्भदम्भेन मध्ये
कायं प्रक्षेप्तुमैच्छन् सकलमिव हि तं कातराः कातराक्ष्यः ॥१२३॥

भानोः सङ्क्रमणे श्रयेत मृदुतां विश्वं समस्तं यथा
मन्ये शिश्रियतुः स्तनावपि तथा स्त्रीणां रतेः सङ्क्रमे ।
नैवं चेद् गुरुशैलवत् कठिनयोः श्रान्ता रतान्ते भृशं
प्रेयांसः कणशोऽभवन्न पतिता मध्ये तयोस्तत् कथम् ॥ १२४ ॥

क्षणं मानेऽमाने क्षणमथ मिथः काक्षकषणे
क्षणं हासोल्लासे क्षणमथ दृढालिङ्गनविधौ ।
इति व्यग्रा निन्युः प्रतिगृहमशेषामपि निशां
रतोत्साहैस्तैस्तैः समुदितमुदस्ते युवजनाः ॥ १२५ ॥

---

* पद्यमिदं K प्रतौ न विद्यते । 1 K समं तां पद° । † एतत् पद्यद्वयं K प्रतौ व्यत्ययेनोपलभ्यते । 2 P हन्तुकामः । 3 K दयिते पृच्छति मुहुः । 4 P °विरासान° । ‡ पद्यमिदं K प्रतौ १२१-१२२ अङ्काङ्कितात् पद्ययुगात् पूर्वमेव निर्दिष्टम् । 5 K तावदे• तावदपि किल कृतस्पर्शनं । 6 K सर्वं ।

अन्योऽन्यमर्पितरदच्छदखण्डनानां निःशङ्कनिर्मितनखक्षतमण्डनानाम् ।
संभोगसंभवपरिश्रमखेदितानां निद्रासुखं क्षणमभूद् रतयेऽथ यूनाम्॥१२६॥

अन्योऽन्यप्रवितीर्णदन्तनखरप्रोद्यत्पदव्यञ्जनै-
र्यूनोर्वीक्ष्य परां स्थितिं गतवतो निर्व्याजवीरव्रते ।
कन्दर्पोऽपि गिरीशदर्पदलने निश्चिन्ततामुद्वहन्
आशिश्राय चिराय सङ्गसुभगां निद्रां विशङ्कं तदा ॥ १२७ ॥

तूलं स्पर्शानुकूलं मुखशशिरुचिरश्रीसमाकृष्टिमूलं
ताम्बूलं नासिकाया व्रतसुकृतफलं स्फारपुष्पोपहारः ।
कान्ता श्रान्ता स्तनाभ्यामुरसि खिलमिदं न श्रुतः सप्तमश्चेत्
सर्गः शृङ्गारसञ्जीवन इति विदितो वीरहम्मीरकाव्ये ॥ १२८ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते महाकाव्ये श्रीहम्मीर-चरिते वीराङ्के सुरतवर्णने शृङ्गारसञ्जीवनो नाम सप्तमः सर्गः समाप्तः ॥

अथाष्टमः सर्गः ।

प्रपञ्चयन्तः स्फुटतारमन्द्रमध्यस्वरान् पञ्चमरागगर्भान् ।
हम्मीरदेवाय निशाऽवसानं वैतालिका विज्ञपयाम्बभूवुः ॥ १ ॥
विच्छायमिन्दुं मुखमावहन्ती विनिम्नताराकलुषाम्बरेषा ।
विभावरी याति रजस्वलेव स्नातुं पयोधौ दिशि पश्चिमायाम् ॥ २ ॥
वियुक्तनारीजननेत्रपातोल्काभिः समन्तादिव दीप्यमानम् ।
विहाय शीतांशुरसौ विहाय आसीदपूर्वाचलचूलचुम्बी ॥ ३ ॥
स्वातन्त्र्यहन्ता न उदेति भास्वानस्यामिति क्रोधभरारुणाभिः ।
दृष्टेव दृग्भिः कुलटाजनेन पुरन्दराशाऽरुणतां जगाम ॥ ४ ॥
अबोधि किं न क्षणिका क्षपेयं मानो दधे यद् भवतीभिरेवम् ।
इत्यभ्यसूयन्निव मानिनीभ्यस्तनोति शब्दान् कृकवाकुरेषः ॥ ५ ॥
जायापतीनां रतकौतुकेन रात्रिं समग्रामपि जागरित्वा ।
घूर्णन्त्यमी विस्फुरितप्रमीला इव प्रदीपा रतमन्दिरेषु ॥ ६ ॥
निवर्त्य चेतः सुरतात् कथञ्चिद् यावत् सुषुप्सन्ति युवान एते ।
मार्दङ्गिकैस्तावदवादि सद्यः प्रत्यूषसूचा सुभगो मृदङ्गः ॥ ७ ॥
विलेपनामोदिरतान्ततान्तस्वेदोदकास्वादनमन्दचारः ।
संभोगशालासु निविश्य यूनः सुखाकरोत्येष उषासमीरः ॥ ८ ॥

1 K °माहवम् । 2 K रति° । 3 K रतिमन्दिरेषु । 4 K मार्दङ्गिकैस्तावदवादि । 5 K °तान्तकान्त° । 6 K उषान्तवायुः ।

प्राप्तप्रबोधा गुरुणोपदिष्टान् महाप्रयोगान् प्रणिधाय चित्ते ।
कीर्त्यै कवीन्द्रा इव निर्मलार्थोत्पत्तिं नरेन्द्राः परिभावयन्ति ॥ ९ ॥
विप्राननोद्गीर्णविविक्तवर्णप्रचारचारुध्वनिवेदमन्त्राः ।
सतां हृदन्तस्तरसा प्रविश्य तमः कषन्तीव समूलकाषम् ॥ १० ॥
तमोमये प्रेक्ष्य विधिः प्रलीनं मेरुं युगान्तेऽथ नवं सिसृक्षन् । 5
प्रत्यूषसन्ध्याभवरागदम्भाच्चिनोति शृङ्गाणि हिरण्मयानि ॥ ११ ॥
विभा विभातैव विभावरीयमद्यापि मानं किमिवादधासि ।
इति प्रियाया अपि बद्धमूलं मानं सुखेनैव नुनोद कश्चित् ॥ १२ ॥
संभोगकेलीं[1] प्रविधाय पश्चात् सुप्ताऽपि नारी प्रथमप्रबुद्धा ।
आलिङ्ग्य सुप्तं[2] प्रियसुप्तिभङ्गं विशङ्कमाना न जहाति तल्पम् ॥ १३ ॥ 10
क्वचिद् विभातीकृतयामिनीका अभ्येत्य कान्ता निभृतप्रचारम् ।
स्वप्नेऽपि तत्तर्जनशान्तचित्तामाश्लिष्य सुप्तां दयितां स्वपन्ति ॥१४॥
अपि द्विजेशः श्रितवारुणीको ध्रुवं भवेन्नीचजडोपयोग्यः[3] ।
इति प्रबोधं जगतां प्रयच्छन्नध्यास्त मध्यं जलधेः शशाङ्कः ॥ १५ ॥
असौ[4] सिषेवे चतुरोऽपि यामान् श्यामाक्षये सत्यपि यत् सकामः । 15
तेनैव शङ्केऽस्तमुपैति पक्वपलाण्डुपाण्डुः पतिरोषधीनाम् ॥ १६ ॥
समस्वरूपे शशिनो रवेश्च बिम्बेऽस्तभावादुदयत्वतश्च ।
उपैति पूर्वापरयोर्विभेदे मतिर्जनानां क्षण[5]मीश ! जाड्यम् ॥ १७ ॥
अवाप यस्यामुदयं विहाय तां मामथासावपरां सिषेवे ।
इत्याद्धानेव रुषं हिमांशौ पुरन्दराशाऽरुणतां जगाम ॥ १८ ॥ 20
स्फुटं स्फुटत्कुड्मलकोशनिर्यद्विलोलरोलम्बमिषेण हर्षात् ।
समागमे पत्युरिनस्य पश्[6]याऽस्राणीव मुञ्चन्ति सरोरुहिण्यः† ॥ १९ ॥
क्वापि ह्रदे व्योमसरिद्वरायाः पतिर्नदीनामनुबिम्बितः किम् ।
यद्वारि भान्तीह तमस्तरङ्गाः[7] प्रत्यूषरागोऽपि तदन्तरा[8]ग्निः ॥ २० ॥
एषाऽहमेतच्च गृहे तवैवागन्तव्यमेवाशु पुनः प्रियेण[9] । 25
इत्युक्तिपूर्वं परिरभ्य गाढं[10] षिङ्गान् प्रहिण्वन्ति पणैणनेत्राः ॥ २१ ॥
प्रकाशकल्पे[11]ऽपि सहस्ररश्मौ वारांनिधिश्चापलमुत्ससर्ज ।
हंसे प्रकाशं यति यत् सतीव जडेऽपि शान्तत्वमुपैति मूर्त्तम्[12] ॥ २२ ॥

---

1 K °केलिं । 2 K सुप्त° । 3 K °भोग्यः । 4 K असेवनाऽसौ चतुरो° । 5 K क्षणमत्र । 6 K पश्य विमुञ्चतेऽश्रूणि सरोजिनीयम् । † एतत्पद्यं सप्तविंशतितमपद्यानन्तरं वर्त्तते K आदर्शे । 7 K °रङ्गा प्रत्यूष° । 8 K °न्तरग्निः । 9 K प्रसद्य । 10 K दोर्भ्यां । 11 K शेषेऽपि । 12 मूर्त्तिम् ।

विच्छायतां भूरितरामुपेता दूरीभवत्पुष्करकोशवासाः ।
काले कलौ सन्त इवोडवोऽमी क्वचित् क्वचिन्नेत्रपथं प्रयान्ति ॥२३॥
लोलत्तनूनां मथनेन दध्नस्तनूदरीणां कबरीमिषेण ।
ध्वान्तावलीकुट्टनजातकार्ष्ण्याः स्फुरन्ति दण्डा इव चण्डरश्मेः ॥२४॥
षिङ्गैर्निषिद्धैरपि दत्तदन्तपदालिचित्रेषु[1] रदच्छदेषु ।
संभ्रान्तचित्ताः पतिदृष्टिपाताद्[2] ददत्यलक्तं कुलटा नतास्याः ॥ २५ ॥
स्मराहवे स्मेरतरे प्रवृत्ते पलाय्य पृष्ठे मलिनो यमस्थात् ।
इत्यात्तकोपा इव केशपाशं गाढं निबध्नन्ति सरोरुहाक्ष्यः ॥ २६ ॥
काञ्चीगुणस्य ग्रथनप्रयासे प्रकोष्ठभूषा गणसिञ्जितेन ।
मुक्तिं भजेथाः पुनरेव शीघ्रमित्यादिशन्तीव तमाम्बुजाक्ष्यः ॥ २७ ॥
शिला लिहन्तोऽग्रगसैन्धवानां वक्त्रोष्मभिर्ध्मा[3] मलयन्ति वाहाः ।
निःश्वासवातैरिव पाणिगानाऽऽदर्शान्निशाभोगवियोगिनार्यः ॥ २८ ॥
समूलमुन्मूल्य तमःसमूहं लोके प्रवेशं सृजतो दिनस्य ।
माङ्गल्यहेतो रविबिम्बदम्भात् नीराजनामाचरतीव पूर्वा ॥ २९ ॥
षिङ्गैर्वितीर्णा[4]नणुवित्तवैरा दिवाप्रभातं भृशमर्दिताङ्ग्यः ।
सर्वाङ्गसंस्पृश्यति भानवीयकरोत्करे जाग्रति नो भुजिष्याः ॥ ३० ॥
घूकादिवेन्दोरिव नीलनीररुहादिवाकृष्य विभातकालः ।
रथाङ्गनामार्कसरोरुहेषु मुदं प्रकाशं श्रियमादधाति ॥ ३१ ॥
पत्यू रुचीनामहिताद् भयेन तमःसमूहो विरहय्य धात्रीम् ।
निशाटनेत्राणि विवेश नूनमुत्पश्यतैतेषु कुतोऽन्यथाऽभूत् ॥ ३२ ॥
विभावरीयाय विनाशमेषा मुदं दधस्वेत्यसुवल्लभा स्वा ।
विबोध्यते द्वन्द्वचरेण यावत् सा तावदागात् स्वयमेव पार्श्वम् ॥३३॥
क्रुधेव ताम्रं वपुरादधानमायान्तमालोक्य सहस्ररश्मिम् ।
निलीयते श्वश्यदितस्ततोऽपि भिया तमिस्रं गिरिगह्वरेषु ॥ ३४ ॥
इत्यद्भुतैर्वाक्यभरैर्विबोधकैः समाख्यातविभातकालः ।
तदर्हकृत्यं विरचय्य दानकेलिं कुमारः कलयाञ्चकार ॥ ३५ ॥
विभूषितास्थानसमं शुभैषी *श्रीजैत्रसिंहं* रिपुकुम्भिसिंहम् ।
गत्वा कुमारोऽथ मुदा नमस्यामासानणीयस्तरभक्तिनम्रः ॥ ३६ ॥
कृतप्रणामं तमवेक्ष्य हृष्यद्रोमा पुलोमारिरथो धरित्र्याः ।
रहस्युपानीय रहस्यवेदी जगाद निस्तन्द्रतरास्यचन्द्रः ॥ ३७ ॥

---

1 K °विश्रेषु । 2 K पतितो भयेन । 3 P हि ध्मा । 4 K °वितीर्णोत्तरवित्त° ।
5 P °श्रासु ।

साम्राज्यलक्ष्मीकरपीडनाय [1]जातप्रवीणप्रतिमे तनूजे ।
विद्वांवरेण्ये क्वचनापि नास्मद्वं[2]श्याः प्रशस्या विष[3]माभिवश्याः ॥ ३८ ॥
विध्वस्तबाह्यारिचयोऽप्यजित्वाऽन्तरङ्गशत्रूनतिमात्रशक्तीन् ।
बाह्येतरारीन् जितवत्सु तेषु स्थितः कथङ्कारमहं चकास्मि ॥ ३९ ॥
कियद् वराकाः सविशेषमाहू राज्यं नृपाणां विगलत्कृपाणाम् ।
इदं तु योगप्रणिधानभाजां यावद् वराकाः सविकाशमेवं* ॥ ४० ॥
बाह्याः शरीरे किल शैशवीया भावा यथाऽत्याजिषतात्ययेऽस्य ।
हातुं तथाऽभ्यन्तरगानपीमान् उदासते हन्त ! किमत्र सन्तः ॥ ४१ ॥
शक्तावसत्यां विषयाभिलाषो विडम्बयत्येव जनान् प्रयोक्तॄन् ।
शान्तोऽनलः फूत्क्रियमाण उच्चैः किं पूरयत्याशु न भस्मनाऽऽस्यम् ॥४२॥
अपास्तलज्जं बहुदैन्यमस्मानकामयन्त स्मरकातरा याः ।
ताः कामयेम ह्यधुना मृगाक्षीर्वयं हहाऽतोऽपि विडम्बना कि[4]म् ? ॥४३॥
मलातुराणामशुचौ शुचौ वा यथाप्रदेशे न विचारणाऽस्ति ।
स्त्रीणां तथा मूत्रपुरीषपात्रे गात्रे नराणां मदनातुराणाम् ॥ ४४ ॥
यत्प्रेरणादुत्तरलीभवन्तः कृत्यान्यकृ[5]त्यान्यपि न स्मरन्ति ।
तदप्यहो ! यौवनमस्तमस्तु काऽद्यापि [6]तृष्णा विषयेषु निष्णा ॥ ४५ ॥
ये यौवनोन्मादभरे गतेऽपि कुर्वन्त्यखर्वं विषयेषु रागम् ।
निर्मांसमज्जाऽस्थिषु ये शृगाला लालारसास्वादनमाचरन्ति ॥ ४६ ॥†
सर्वाङ्गेषु निकृष्टमङ्गयुगलं स्त्रीणां तदुक्तं तयो-
राद्यं विड्विवरं प्रसिद्धमितरत् प्रस्रावरन्ध्रं पुनः ।
तन्मध्ये यदपत्यरन्ध्रमसकृद्विस्रस्रवच्छोणितं
ये तस्मादधुनाऽपि नान्यवदनास्तेभ्योऽपि निन्द्योऽस्तु कः‡ ॥४७॥
तद्राज्यकक्षीकरणान्ममैतामाज्ञां गुणैकालय ! पालयाशु ।
साहाय्यतस्तेऽयमुपेन्द्रसेवाहेवाकिचेताः सुखमस्तु भूपः ॥ ४८ ॥
वार्धक्यदोषोदयदुर्भगत्वान्मुक्त्वाऽद्य सद्यः कमलानिवास्मान् ।
पतिं द्विजानामिव सौम्यमूर्तिं साम्राज्यलक्ष्मीरुपतिष्ठतां त्वाम् ॥४९॥
सुधाकिराऽथैष गिरा स्वभक्तिवल्लीं प्रवेलन्नवपल्लवाढ्याम् ।
कुर्वन्निव व्यज्ञपयत् कुमारस्तातं जगच्छ्रेयतमावदातम् ॥ ५० ॥
द्वेधाऽपि राजन् ! नरकान्तमेतद् राज्यं न चेतो बहु मन्यते मे ।
द्युसद्मवीवद् विबुधालिसेव्या त्वद[7]ङ्घ्रिसेवा यदि लभ्यतेऽसौ ॥ ५१ ॥

1 K जाते । 2 P वंशाः । 3 K गृह्यासवश्याः । * पद्यमेतत् K प्रतौ नास्ति । 4 K का । † एतत्पद्यं K आदर्शे न विद्यते । 5 K कृत्यानि । 6 K निष्णा विषयेषु तृष्णा । ‡ नास्तीदं पद्यं K प्रतौ । 7 K त्वदंह्रि° ।

त्वत्पादपद्मे सदसद्विवेककृद् राज्यहंसत्वमभीप्सतो मे ।
हर्षाय सुव्यक्तकलङ्ककारि राजन्नराजत्वमिदं कदाचित् ॥ ५२ ॥
ज्येष्ठे तनूजे सति राज्यलक्ष्मीर्देया कदाचिन्न किलेतरस्मै ।
जानन्नपीत्थं नयवर्त्मसंस्थां मह्यं कथं दित्सति तामधीशः ॥ ५३ ॥
हम्मीरदेवाय वितीर्य राज्यं मदङ्घ्रिसेवानिरतो भवेति ।
स्वप्ने निशान्ते शयितं निशाऽन्ते मामाह विष्णुः करवै किमार्य ! ॥५४॥
निरुत्तरीकृत्य ततो हठेनानिच्छन् तमप्येनमतुच्छचित्तम् ।
हम्मीरदेवं नृपतित्वलक्ष्मीममीमनल्लातुमिलाविलासी ॥ ५५ ॥
ततश्च संवन्नव-वह्नि-वह्नि-भू(१३३९)हायने माघवलक्षपक्षे ।
पौष्यां तिथौ हेलिदिने सपुष्ये दैवज्ञनिर्दिष्टबलेऽलिलग्ने ॥ ५६ ॥
पुरा पुरोधास्तदनु क्षितीन्दुर्भूपास्ततोऽन्ये सचिवास्ततश्च ।
ततो महेभ्यास्तदनु प्रजाश्च तस्याभिषेकं रचयांबभूवुः ॥५७॥–युग्मम् ।
छायाकरैस्तस्य सितांशुशुभ्रं यदातपत्रं बिभरांबभूवे ।
छायाऽखिलस्यापि जगत्रयस्य बभूव तेनाद्भुतमेतदुच्चैः ॥ ५८ ॥
एवं पतिष्यन्त्यसकृत् पदेऽस्य क्षितिक्षितः ख्यातुमिवेति लोके ।
शिरोऽभितोऽप्यापतती नृपस्य तस्याथ बालव्यजने व्यभाताम् ॥५९॥
अपाठिषुर्बन्दिजनास्तदानीमराणिषुर्मङ्गलतूर्यकाणि[1] ।
अनर्तिषुर्नर्तविदश्च[2] गीतमगासिषुर्गायकमकण्डलानि[3] ॥ ६० ॥
पदे पदे वन्दनमालिकानां माला निबद्धा बभुरुल्लसन्त्यः ।
गृहावलीनां नयनायमानद्वारामिव भ्रूलतिकाः सलीलाः ॥ ६१ ॥
नरेन्द्रमार्गेष्वभितो विकीर्णा विस्मेरपुष्पप्रकरा विरेजुः ।
कान्तं नवीनं प्रति भूमिदेव्या हासा इव स्फारतरप्रकाशाः ॥ ६२ ॥
हर्षप्रकर्षेण समन्ततोऽपि सद्यस्कवाह्लीकजलप्रसिक्ताः[4] ।
नवे हृदीशे प्रकटीकृतात्मरागा इवद्रङ्गभुवो[5] विरेजुः ॥ ६३ ॥
प्रत्यालयोत्तंसितशातकुम्भमाञ्जिष्ठकौसुम्भिककेतुदम्भात्[6] ।
अधीश्वरं प्राप्य नवं हमीरदेवं विशङ्कं पुरमप्यरज्यत् ॥ ६४ ॥
साम्राज्यलब्ध्या मुदितोऽप्यमुष्य भूभङ्गमाशङ्क्य शिरांस्यधुन्वत् ।
वृथा व्यषीदत् फणिराड् विवेद *धृतां नतां तेन तदा त्वमेव ॥ ६५ ॥
हृत्वा श्रियं शात्रवकैरवाणां सुहृज्जनाम्भोजकुले दधानः ।
प्राप्तोदयो भूवलये स राजा न कस्य कस्याजनि विस्मयाय ॥ ६६ ॥

1 K मदंङ्गि° । 2 K नृत्तविदश्च । 3 K गायन° । 4 K सहावाः । 5 P इवोद्रङ्ग° ।
6 K °सम्भितशात° । * एतच्चिह्नान्तर्गतः पाठः P प्रतौ त्रुटितोऽतः K प्रतेरुद्धृतः ।

विश्रावणे कर्णनृपस्य नीतौ रामस्य शौर्ये च धनञ्जयस्य ।
काले कलौ पण्डितमण्डलीनां किं जायतोदाहरणं स मा स्म ॥ ६७ ॥
धर्मो जगर्जेव दरिद्रमुद्रा क्वचिन्ननाशेव बभाविव श्रीः ।
समुल्ललासेव नयद्रुमोऽपि शुभं ननर्तेव तदीयराज्ये ॥ ६८ ॥
कालानलो नाजनि नाभिरामो रामोऽभवन्नो भरतो रतोऽभूत् ।   5
आसीन्न चित्ते जनकोऽपि कोऽपि हम्मीरमालोकयतां जनानाम् ॥६९॥
अहानि तान्येव सुखावहानि हम्मीरदेवोऽजनि येषु भूपः ।
लोकास्त एवात्तशुभावलोका वक्त्राम्बुजं यैर्ददृशेऽदसीयम् ॥ ७० ॥
विकासिकाशाभिनवप्रवालजिद्दन्तदन्तच्छददीप्तिदम्भात् ।
हृद्युल्लसद्वाङ्मयरागसिन्धोर्विस्तारयँस्तारतरानिवोर्मीन् ॥ ७१ ॥   10
रुजार्दनादित्यथ जैत्रसिंहः स्वस्यावसानं निकटं विजानन् ।
स्नेहेन हम्मीरनृपाय राज्यशिक्षामिमां प्रारभत प्रदातुम् ॥ ७२ ॥
स्त्रीणां श्रियां वा क्वचनापि मा गा विश्वासमासां क्षणभङ्गुराणाम् ।
रक्ता विरक्ताश्च सतामपि स्युः पदे पदेऽमूर्विपदे यदाशु ॥ ७३ ॥
साम्राज्यमासाद्य महत्तमेषु स्म विस्मरो मा विनयं नरेश ! ।   15
पुमान् बृहद्भानुरिवाविनीतः कुलस्य सर्वस्य विनाशहेतुः ॥ ७४ ॥
अप्यार्यकार्याणि विचार्य कुर्वन् विवेकवानेष जगज्जनेष्टः ।
जगन्निवासा तदियं नृपत्वलक्ष्मीः कथं तं विजहाति तात ! ॥ ७५ ॥
शक्तोऽपि देहाप्रकटीकृतात्मशक्तिः पराभूतिपदं सदैव ।
कारीषवह्निर्वद वत्स ! कस्य कस्याशु न स्यादतिलङ्घनीयः ॥ ७६ ॥   20
सदा सदाचारपरो नरेन्द्रः सेव्यो मुनीनामपि निःस्पृहाणाम् ।
कुशीलताभाग् न वरं खलोपभोगाय तैलीव भवत्यवश्यम् ॥ ७७ ॥
धर्मार्थकामा इव सामदानभेदाः क्रमेणैव पुरा प्रयोज्याः ।
सर्वात्मनैषामसति प्रचारे धार्या[6] मतिर्मोक्ष इवाथ दण्डे ॥ ७८ ॥
अनन्तरो यो विषयेषु राजा [7]संवर्धितः क्लेशकरः स एव ।   25
गृहाङ्गणा[8]न्तर्विषवृक्ष उप्ते कालं कियन्तं कुशलं गृहस्य* ॥ ७९ ॥
राज्यस्य धर्माः किल पञ्च ये तान् पञ्चेन्द्रियाणीह वदन्ति सन्तः ।
प्रलीयमानेषु तदेषु राज्यमपि प्रलीयेत वपुर्यथैव ॥ ८० ॥

---

1 K स मास्म । 2 K कलोऽनलो । 3 K हम्मीर° । 4 K कदापि । 5 K किं तैलिकवद् भवेत । 6 K कार्या । 7 K स वर्धितः केशकरः स्वरेव । 8 K गणाग्रे । * एत-त्पद्यानन्तरं 'पुमान् विराद्धो°' इत्यस्यैव सर्गस्य द्व्यधिकशततमः श्लोक उपात्तो दृश्यते K प्रतौ ।

शक्तिं समासाद्य सदोद्यतेन कार्यो मतिर्विक्रम एव पुंसा ।
तिर्यक्षु भूरिष्वपि पश्य सिंहः पराक्रमादेव न किं मृगेन्द्रः ॥ ८१ ॥
नये धियं सम्यगनाशयित्वा युक्तः प्रयुक्तो न पराक्रमोऽपि ।
छलावलम्बेन विनैव तावत् सिंहोऽपि हन्तुं प्रविशेदिभं किम्? ॥८२॥
बुद्ध्यैव सिद्धिर्यदि तन्न पुष्पैरपि प्रहर्त्तव्यविधिर्विधेयः ।
पश्य प्रसूनैरपि युध्यमानः स्मरो हरात् कां गतिमाससाद ॥ ८३ ॥
शौर्यं च बुद्धिर्मिथुनं तदस्माददूषिताद् राज्यमुदेति नित्यम् ।
न चैकतो विश्वमपि प्रपश्य संजायते द्वन्द्वत एव सर्वम् ॥ ८४ ॥
जिगीषुणाऽरौ बलशालिनाऽपि यात्रा विधेया खलु जेय एव ।
ज्वालाजटालीकृतदिङ्मुखोऽपि नाम्बूनि दग्धुं क्रमते दवाग्निः ॥८५॥
रिपोरपि स्वाश्रयमागतस्य करोति सत्कारविधिं विधिज्ञः ।
तथा हि मीनांशमुपागतस्य नोच्चं पदं किं भृगुनन्दनस्य* ॥ ८६ ॥
यथा न पीडा भवति प्रजानां ग्राह्यस्तथा धीधनतत्करोऽपि ।
किं नाम पुष्पाणि चिनोति पुष्पलावी लतानां जनयन् विबाधाम् ॥८७॥
निवासिता येन स एव वेत्ति प्रायः प्रजानां सुखदुःखभावम् ।
वन्ध्या विजानाति किमङ्गगर्भप्रपोषणं वा वहनक्रमं वा ॥ ८८ ॥
धनं प्रजानामयथापराधं गृह्णन् विजानाति न तच्च ताः स्वाः ।
इदं नृपस्याशकुनं तथा हि राज्यस्य नाशोऽस्य न तच्च ताश्च† ॥ ८९ ॥
सर्वस्वनाशेऽपि कुले विरोधोद्बोधं सुधीर्नो विदधीत कश्चित् ।
कुले विरोधो रचितो निनाय सुयोधनं किं निधनं न सद्यः ॥ ९० ॥
प्रजासु पीडा स्वकुले विरोधः पक्षद्वयं पेषणयन्त्रमस्मिन् ।
चूर्णीकृतं धान्यमिव प्ररोढुं पुनर्न राज्यं समुपैति शक्तिम् ॥ ९१ ॥
स्वमेव पुष्णन् प्रभुवञ्चनेन नार्हत्युपेक्षामनुजीविवर्गः ।
कर्षद्रसाया रसमात्मने किं नोन्मूल्यते क्षेत्रगतं तृणादि ॥ ९२ ॥
मातेव राजा हितकृत् प्रजानां मातुः सपत्नीव नियोगिवर्गः ।
तयाऽर्पितानां च करे तदस्याः क्व वृद्धिरासां क्व च जीवितव्यम् ॥९३॥
स्वतः कुलीनोऽप्यधिको विधेयो राज्ञाऽनुजीवी न कदाचिदेव ।
यतो जडात्मा वटवत् प्रवृद्धः स राज्यसौधस्य विनाशहेतुः ॥ ९४ ॥
प्राज्ञः सपत्नैः परिभूयमानोऽप्युदीषिषन्न त्यजति स्वदेशम् ।
दिवाकराल्लुप्तकरोऽप्यनुद्यन्नभःशशाङ्कः पुनरभ्युदेति ॥ ९५ ॥

1 K निजजेय । * पद्यमिदं K आदर्शे नास्ति । † नास्त्ययं श्लोकः K प्रतौ ।

चिरन्तनान् मन्त्रिवरान् विहाय साम्राज्यभारो निहितो नवेषु ।
क्षणेन मूलादपि नाशमेति यथाऽविपक्केषु जलं घटेषु ॥ ९६ ॥
स्याद् राज्यमन्त्रेषु किलैक एव श्रेयानमात्यो न पुनर्द्वितीयः ।
आरोहणं यानयुगस्य तज्ज्ञा न प्राणसंदेहकरं स्मरन्ति ॥ ९७ ॥
यो यत्र रक्तो यदि वा विरक्तो भावे विवेको न हि तस्य तत्र ।
अतो न तन्मन्त्रविधौ विधेया शिक्षा तदीया सुविचक्षणेन ॥ ९८ ॥
मन्त्रान् बहूनामपि धीसखानां श्रेयस्तरान् नैव वदन्ति सन्तः ।
गर्भस्य मातुश्च कुतः शिवाय करा बहूनां बत सूतिकानाम् ॥ ९९ ॥
पूर्वं स्वहृद्येव विचार्य सम्यग् मन्त्रं ततः सम्मतिमाददीत ।
संवादिता चेत् तदिदं विधेयं नो चेत् तदूहैर्मतिराविरास्या ॥१००॥
विराद्धपूर्वः पुरुषः प्रधानपदे कदाचिन्न पुनर्विधेयः ।
तादृक् छलं प्राप्य तथाविधा हि द्रुह्यन्ति नूनं धृतगुप्तवैराः ॥१०१॥
पुमान् विराद्धो विजहाति नैव धीमान् युगान्तेऽपि विरोधभावम् ।
अद्यापि पश्यार्यमणं विधुं वा तुदन् निवर्तेत विधुन्तुदो न ॥ १०२ ॥
महाबलेनापि कलिर्न कार्यः समं शकेशेन लसच्छलेन ।
तथा समर्थोऽपि बलिर्विजिग्ये छलप्रधानेन जनार्दनेन ॥ १०३ ॥
पुरः पुरो जाग्रदुदग्रकष्टं दुरोदरं दूरत एव हेयम् ।
दुरोदरारम्भवशेन कां कां विडम्बनां पाण्डुसुता न जग्मुः ॥१०४॥
बलाबलं सूत्रगतं विचार्य सविग्रहां यो विदधीत वृत्तिम् ।
स एव तत्तद्गुरुगौरवार्हशास्त्रज्ञधुर्यत्वमुपैति तात ! ॥ १०५ ॥
दत्त्वेति शिक्षां शुभबद्धसख्यां गेहे च देहे च निरीहचित्तः ।
जैत्रप्रभुः स्वात्महितं चिकीर्षन् *श्रीआश्रमं* पत्तनमन्वचालीत् ॥ १०६ ॥
शिवाऽपि जम्बूपथसार्थवाही विराजते यत्र शिवः स्वयम्भूः ।
यो ध्यातमात्रोऽप्युरुभक्तिभाजां दत्ते न किं भुक्तिमिवाशु मुक्तिम् ॥१०७॥
मज्जच्छचीदृग्युगलीकुवेलविष्वग्गलत्कज्जलमेचकाम्बु ।
चर्मण्वती यत्र सरिद् वहन्ती पुण्यश्रियो वेणिरिवावभाति ॥ १०८ ॥
ज्वलिष्यदेतद्विरहाग्नितप्तमिवाम्बकाब्जस्रवदस्रुवर्षैः ।
पृष्टेऽथ हृत्सेसिचतः समेत्य व्यजिज्ञपन्नेनममात्यमुख्याः ॥ १०९ ॥

1 K कुतश्च! । 2 K स्याद्राज° । 3 K कस्य । 4 K वद । 5 K चेत्तदोहैः° 6 K निषेधः । † क्रमव्यत्ययेन दृश्यते K प्रतौ । 7 P °युगका° । 8 K °काम्बुः । चर्मन्वती । 9 P °वाविभाति । 10 K °मिवाम्बुकाब्ज° ।

साम्राज्यलक्ष्मीं विरहय्य पूर्वं मुमुक्षतोऽस्मानपि सम्प्रतीश ! ।
खद्योतवत् त्वद्[1]विरहान्धकारे भाग्यानि नो यान्ति पुरा प्रकाशम्॥११०॥
भवद्दृगालोकनमुक्तयोगं प्रपत्स्यतेऽदो नगरं नरेशः ।
रङ्गत्पतङ्गोज्ज्वलबिम्बडिम्बविवर्जितस्य श्रियमम्बरस्य ॥ १११ ॥
वृष्ट्या सुधाया इव सौम्यदृष्ट्या सिञ्चन्नथैतान् निजगाद भूपः ।
मा कार्ष्ट कष्टं विदुषामनिष्टं कृते मम स्वात्महितं चिकीर्षोः ॥ ११२ ॥
इदं पुरव्योममदंशुमालिप्रतापरोचिश्चयशून्यशोच्यम् ।
*हम्मीरचन्द्रे*ऽभ्युदिते प्रकामश्रीकं भविष्यत्यचिरेण नूनम् ॥ ११३ ॥
मद्वंशपाथोरुहराजहंसस्तैस्तैर्गुणैर्विश्वकृतप्रशंसः ।
संसेव्यमानोऽहमिव प्रसाददानैः सदाऽऽनन्दयितैष युष्मान् ॥११४॥
इत्थं सहैतान् विसृजन् अवापत्[2] *पल्लीं* पुरीं यावदसौ नरेशः[3] ।
लूता विनिर्गत्य पपात तावत् स्वयं च भेजे लघुदेवभूयम् ॥ ११५ ॥
असासहीभिर्विरहं प्रियाभिरष्टाभिरिष्टाभिरथान्वितस्य ।
तत्रैव संस्कारविधिर्विधिज्ञैः *श्रीजैत्रसिंह*ाधिपतेर्वितेने ॥ ११६ ॥
अथाभिषिञ्चन्[4] नवशोकभूपं नवावतारं हृदि बाष्पपूरैः ।
चकार मोहग्रहिलीकृतात्मा *हम्मीरदेवः* परिदेवनानि ॥ ११७ ॥
तातेति तातेति वचःप्रघोषशुष्यद्गलस्यापि ममावनीश ! ।
यद्दर्शनं न प्रददासि तत् का तवौचिती सङ्गतिमङ्गतीयम् ॥ ११८ ॥
विश्वत्रिलोकीतिलकायमानं व्यधाद् विधेयस्तव पाणिरेनम् ।
कथं स एवास्य विनाशहेतोः प्रागल्भ्यमभ्यस्यति [5]हे हताश ! ॥११९॥
हुताशनासज्जनकालकूटान् परन्तपोर्जी(ऽरी?)निति को व्यधत्त ।
श्रीजैत्रसिंहं नृपतिं प्रणिघ्नन्नजायतास्योत्तरमद्य वेधाः ॥ १२० ॥
धातर्विगर्ह्योदभितोऽपि लोकापवादतो यद्यपि नासि भीतः ।
तथाऽपि पाणी कथमुत्संहेतां[6] नृरत्नमेनं तव हन्त ! हन्तुम् ॥ १२१ ॥
केनापि शङ्के पविशैलसाराण्यादाय चक्रे हृदयं विधातुम् ।
क्रन्दत्यपीत्थं मयि मुक्तकण्ठं नाद्यापि यत्तत्करुणा रुणद्धि ॥ १२२ ॥
कण्ठस्य हा ! हेति वचांसि दृष्ट्योरस्रं कपोलस्य कराब्जकोशः ।
चित्तस्य शोकः शरणं *हमीरदेवस्य* तत्राहनि जायते स्म ॥ १२३ ॥

---

1 K ते विर° । 2 K अवाप्य । 3 K नरेन्द्रः । 4 K °चिक्षिव । 5 K ही हताश !
6 K °मुत्सहेते स्म रत्न° ।

इत्थं महाशोकसमुद्रमग्नमुद्धर्तुमेनं जनताहिताय ।
अकर्णधारीयत विप्रबीजादित्यादिभिर्ब्रह्मविदांवरेण्यैः ॥ १२४ ॥
जगाम तातो निधनं ममेति वृथा कृथा मा क्षितिपाल! खेदम् ।
कस्याप्यवश्या निधनस्य शश्वद्दृष्टाः श्रुता वा पितरोऽत्र विश्वे ॥१२५॥
श्वासावधि स्यात् खलु जीवितव्यं श्वासः प्रसिद्धः स तु वायुरेव ।
वायोरिहान्यत् तरलं न किञ्चिद् यज्जीव्यते तन्महदेव चित्रम् ॥१२६॥
क्रीडां करिष्यति कियच्चिरमेष हंसः
स्निग्धोल्लसत्कलरवोऽत्र शरीरवाप्याम् ।
कालारघट्टघटिकावलिपीयमान-
मायुर्जलं झगिति शोषमुपैति यस्मात् ॥ १२७ ॥
इयं मायारात्रिर्वहलतिमिरा मोहललितैः
कृताज्ञाना लोकास्तदिह निपुणं जाग्रत जनाः! ।
अलक्ष्यः संहर्तुं ननु तनुभृतां जीवितधना-
न्ययं कालश्चौरो भ्रमति भुवनान्तः प्रतिदिनम् ॥ १२८ ॥
लङ्काभर्तुर्निधनरुचिना चापहस्तेन येन
क्षिप्तास्तास्ताः पितृपतिमुखे कोटयो राक्षसानाम् ।
सोऽपि स्फूर्जद्दिवसरजनीघोरवक्त्रेण राम-
स्ताम्यन्मूर्तिर्झगिति गिलितः कालनक्रञ्जरेण ॥ १२९ ॥
सूनोर्मन्मनभाषितानि शिशुताहृद्यस्य जीवादिशे-
त्युक्तीर्यौवनगस्य यस्तव पिता माधुर्यधुर्याण्यपात् ।
क्व स्वर्गे वसुधासुधाकरसुधास्वादोऽधुना प्रीतये
तस्य त्वद्यशसैव तृप्तिरमरीगीतेन पीतेन चेत् ॥ १३० ॥
इत्थं स्मार्तविनोदमोदिहृदयप्रज्ञालवक्त्राम्बुज-
प्रादुर्भूतविशेषतत्त्वभणितिश्रेणीप्रबुद्धाशयः ।
शोकद्वेषिचमूरमूर्दलयितुं वीरं विवेकं सृजन्
वेश्मेव स्वमपालयत् क्षितितलं हम्मीरदेवस्ततः ॥ १३१ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये श्रीहम्मीरदेवराज्याभिवर्णनो नामाष्टमः सर्गः समाप्तः ॥

---

1 K धारायत विप्रवैजा । 2 K श्वासावधिः । 3 K ओगलितैः । 4 K कृतज्ञाना । 5 K °देवो नृपः ।

अथ नवमः सर्गः ।

अथास्य षड्गुणाँस्तिस्रः शक्तीर्भूपस्य बिभ्रतः ।
दिग्जयायानपायाय स्पृहयालु मनोऽभवत् ॥ १ ॥

ततो दैवज्ञविज्ञातलग्ने लग्नेद्धरुग्ग्रहे ।
वन्धाभिर्गोत्रवृद्धाभिः कृतयात्रिकमङ्गलः ॥ २ ॥

पश्चाद्[2]धृतोष्णरुग्बिम्ब ऊर्ध्वाकृष्टसमीरणः ।
नृपस्तुरङ्गमारुक्षत् पुर[3]स्कृतसितद्युतिः ॥ ३ ॥–युग्मम् ।

स्वतोऽधिकौजसं वीक्ष्य मा म्लासीदेनमुष्णरुक् ।
इतीवास्योज्ज्वलं शीर्षे छत्रं छायाकरैर्दधे ॥ ४ ॥

पास्यन्त्यस्याखिलं सैन्या मद्वारीति विशङ्किनी ।
तं वालव्यजनव्याजादागाद् गङ्गेव सेवितुम् ॥ ५ ॥

चम्पाया इव चम्पेशस्त्रिपुरस्त्रिपुरादिव ।
प्रकम्पयन् धरां धीरो निर्ययौ नगराद् बहिः ॥ ६ ॥

प[4]राग इव पाथोजात् पार्थपाणेः शरा इव ।
पुरतः स्फुरितोत्साहाः पृष्ठे सैन्या विनिर्ययुः ॥ ७ ॥

निर्मिमाणा मदाम्भोभिर्विष्वक्कर्दमिलामिलाम् ।
गर्जिसंतर्जितारातिशौण्डीर्या निर्ययुर्गजाः ॥ ८ ॥

[5]प्रखरप्रस्फुरत्पक्षा आरूढपुरुषोत्तमाः ।
चेलुस्तार्क्ष्याः परोलक्षाः प्रत्यक्षास्तार्क्ष्यका इव ॥ ९ ॥

उच्चैर्ध्वजाली[6]र्बिभ्राणैः प्र[7]शस्तैः[8]स्यन्दनैस्तथा ।
यथा तदन्तर्विक्षिप्तैस्तिलैर्भेजे न भूतलम् ॥ १० ॥

वियत्कुक्षिम्भरिस्फारहुङ्कारमुखराननाः ।
पत्तयो वल्गु वल्गन्तो नृपचित्तममूमुदन् ॥ ११ ॥

वात्याव्यतिकराक्रान्तपताकाऽर्पितदृष्टयः ।
मिथो ह हेति जल्पाका रेजिरे वैजयन्तिकाः ॥ १२ ॥

पदप्रतापप्रोद्भूतैरभितोऽपि रजोव्रजैः ।
छायार्थमिव सैन्यस्य प्रतेने दिवि मण्डपः ॥ १३ ॥

केचिद् गजानां केचिच्च पत्तीनां केऽपि वाजिनाम् ।
रथानां केचनावोचन् सैन्ये तस्य प्रभूतताम् ॥ १४ ॥

---

1 K °विज्ञस° । 2 K भूतोष्णरुग्बिम्बः पुरस्कृतसितद्युतिः । 3 K °ऊर्ध्वीकृतसमी-रणः । 4 K परागा । 5 K प्रक्षर° । 6 P °ली बिभ्राणैः । 7 K प्रसक्ते । 8 P स्यन्दनै° ।

परःसहस्रैर्गन्धर्वैः परोलक्षैश्च पत्तिभिः ।
क्रमात् क्रामन् धरां धीरः प्रापद् भीमरसं पुरम् ॥ १५ ॥
तत्र श्रिताभ्यमित्रत्वं गर्जन् अर्जुनभूपतिम् ।
कुट्टयित्वाऽसिदण्डेन स्वनिदेशवशं व्यधात् ॥ १६ ॥
ततो मण्डलकृद्दुर्गात् करमादाय सत्वरम् ।
ययौ धारां धरासारां वारांराशिर्महौजसाम् ॥ १७ ॥
परमारान्वयप्रौढो भोजो भोज इवापरः ।
तत्राम्भोजमिवानेन राज्ञा म्लानिमनीयत ॥ १८ ॥
ततोऽतिबलभारेण कासारितमहीतलः ।
व्यधादवन्तीं दन्तीन्द्रमदाक्रान्तकाननाम् ॥ १९ ॥
शिप्रां विप्राञ्जलित्यक्तैः सिक्तवप्रां पयःकणैः ।
दृष्ट्वा तस्याभवन् सैन्याः सज्जा मज्जनहेतवे ॥ २० ॥
विमुक्तबन्धनास्तत्र कृतमज्जनकौतुकाः ।
वाऽसन् रेवानदीसेवाहेवाकिहृदया गजाः ॥ २१ ॥
धुन्वन्तः कन्धराकेशान् वाजिनः स्नातनिर्गताः ।
आसारं तेनिरे तीरे तटिन्याः पटुकान्तयः ॥ २२ ॥
उन्मज्जत्कुम्भिकुम्भा सा स्रवन्ती सैनिकाशयम् ।
हरति स्म चकोराक्षी यथा पीनोन्नमत्कुचा ॥ २३ ॥
नृपोऽपि निर्मितस्नानो हितदानैकतानधीः ।
तत्रानर्च महाकालं कालं दुष्कर्मवैरिणाम् ॥ २४ ॥
प्रविश्य मध्ये मेध्यश्रीविशालां तां निभालयन् ।
नैकशो विक्रमादित्यं सस्मार स्मेरविक्रमः ॥ २५ ॥
विनिर्वृत्तस्ततो विश्वां विश्वां स्वकरवर्तिनीम् ।
सृजन् शौर्यवतां धुर्यश्चित्रकूटमकुट्टयत् ॥ २६ ॥
ततः स्फुटं नटन्मेदपाटपाटनपाटवे ।
प्राप्यार्बुदाद्रिं सान्द्रश्रीस्तत्रावासान् न्यवेशयत् ॥ २७ ॥
प्रतीभबुद्ध्या बिम्बान् स्वान् स्फाटिकीषु शिलास्विह ।
संपश्यन्तोऽभवंस्तस्य सिन्धुराः प्रधनोद्धुराः ॥ २८ ॥

1 K वाजिभिः । 2 K सिप्रां । 3 K किन्धरा° । 4 K विनिर्वृत्त° ।

हरिन्मणिगणस्यात्र प्रोल्लसन्त्यो मरीचयः ।
नवदूर्वावणभ्रान्तिं तद्धयानामजीजनन् ॥ २९ ॥

श्रमेण कर्मभिः सैन्यैरधिशाखं निवेशितैः ।
रेजिरे शैलराजस्य सुभटा इव शाखिनः ॥ ३० ॥

तत्र विश्रम्य विश्रम्य पादपानां तले तले ।
गीयमानानि भिल्लीभिः स्वयशांस्यशृणोन्नृपः ॥ ३१ ॥

घनधीध्याततन्नागप्रमोदिशिखिकूजितैः ।
जगाविवार्बुदोऽमुष्य दिग्जयप्रभवं यशः ॥ ३२ ॥

कुम्भिकुम्भमदाम्भोभिर्द्विगुणीकृतनिर्झरः ।
आरुह्य पृष्ठमस्याद्रेश्चारिमानमलोकत ॥ ३३ ॥[1]

वसतौ विमलात्माऽयं विमलस्यर्षभप्रभुम् ।[2]
ननाम नोत्तमानां हि चित्ते स्वपरकल्पना ॥ ३४ ॥

तत्र श्रीवस्तुपालस्य कीर्तनं कलिकर्त्तनम् ।
दृष्ट्वाऽसौ विस्मितो नैकवेलं मौलिमकम्पयत् ॥ ३५ ॥

प्रणम्य महतीभक्तिः सर्वदामर्बुदां ततः ।
आश्रमेऽरुन्धतीजानेर्विशश्राम क्षणं नृपः ॥ ३६ ॥

मन्दाकिन्यां विधायोच्चैः स्नपनं[3] शमनं रुजाम् ।
अपूजयज्जगत्पूज्यमथासावचलेश्वरम् ॥ ३७ ॥

साक्षाद्धनञ्जयस्येह[4] धारावर्षस्य[5] धन्विनाम् ।
निरीक्ष्य नृपतिर्जज्ञे विस्मयोत्तानलोचनः ॥ ३८ ॥

प्रचलद्बलपाथोधिमैनाकीकृतवैरिणः ।
अत्राभूत्[6] खर्वदो गर्वः[7] सर्वदोऽस्यार्बुदेश्वरः ॥ ३९ ॥

ततोऽवतीर्य वर्यश्रीर्निर्धनं वर्धनं पुरम् ।
चङ्गामपि[8] गलद्रङ्गां चक्रे चक्रेरि(श)विक्रमः ॥ ४० ॥

अजयोपपदं मेरुं मध्येकृत्य स कृत्यवित् ।
पुष्करं तीर्थमासाद्य दुष्करं पुण्यमर्जयत् ॥ ४१ ॥

आनर्च भूपस्तत्रादिवराहाख्याधरं हरिम् ।
चित्रं दशावतारोऽपि न यो दाहात्मतां गतः[9] ॥ ४२ ॥

---

1 K °माणमलोकयत् । 2 K विमलस्यार्षभ° । 3 K सवन । 4 K साक्षाद् । 5 P धारावर्षस्य । 6 K तत्र । 7 K खर्वदोर्गर्वः । 8 K चङ्गां च विमलश्रीं चक्रे चक्रेरि° । 9 K श्रितः ।

प्रयाणपटहध्वानप्रतिध्वनितकन्दरान् ।
पश्यन् स्वकीर्तिगानैकतानानिव धराधरान् ॥ ४३ ॥
ततः शाकम्भरीद्वारि वारस्त्रीवारलोचनैः ।
अभूत्पिपीतलावण्यसर्वस्वो वसुधेश्वरः ॥ ४४ ॥
अदसीयरिपुस्त्रैणगलल्लोचनवारिभिः ।
तद्वादिलवणस्येह मन्ये खानिरजायत ॥ ४५ ॥
ध्वस्तराष्ट्रं महाराष्ट्रं खण्डिलं खण्डितप्रभम् ।
चम्पां च विस्फुरत्कम्पां भूपस्तदनु तेनिवान् ॥ ४६ ॥
ककरालं करालश्रि कृत्वाऽथास्यात्र तस्थुषः ।
श्रीमांस्त्रिभुवनाद्रीशोऽमिलद्दत्तमहोपदः ॥ ४७ ॥
चतसृष्वपि दिक्ष्वेवं स्वाज्ञां राज्ञां स मौलिषु ।
मौलिलीलायितां बिभ्रन् स्वपुरोपान्तमासदत् ॥ ४८ ॥
अमान् पुरान्तरे पौररागाम्भोधिर्नृपागमे ।
वेल्लद्रक्तध्वजव्याजाद् दधावुद्वेलतामिव ॥ ४९ ॥
द्वारि निर्यज्जनप्रौढद्युतिदिव्यांशुकच्छलात् ।
पुरमप्यहसत् स्फीतप्रीतीवोपेयुषि प्रभौ ॥ ५० ॥
उदञ्चितकरैर्विप्रैर्दत्ताः शृण्वन्नथाशिषः ।
बन्दिवृन्दजयारावैर्मुखरीकृतदिङ्मुखः ॥ ५१ ॥
धर्मसिंहादिभिर्मुख्यैरभ्येत्य प्रणतक्रमः ।
पुरं प्राविशदुर्वीन्दुरतुच्छोत्सवसच्छविः ॥ ५२ ॥
उत्तम्भिता प्रतिद्वारं पौरैरुत्सववाञ्छया ।
कलशा रेजिरे सद्मश्रीणामुरसिजा इव ॥ ५३ ॥
स्फूर्जत्तूर्यावलीध्वानैराहूता इव सर्वतः ।
त्यक्तान्यकार्या नार्योऽथ द्रष्टुमेनं दधाविरे ॥ ५४ ॥
क्षिप्त्वैकं कुण्डलं कर्णे करेऽन्या बिभ्रती परम् ।
रेजे पुरःस्फुरच्चक्रा सेनेवानङ्गभूपतेः ॥ ५५ ॥
एकेनैव कटाक्षेण विश्वं जेतुमहं सहा ।
इत्याख्यातीत्यशोभिष्ट परैकाऽञ्जितलोचना ॥ ५६ ॥
असमाप्ततयाऽन्यस्या वेणिः पश्चाङ्गुलीधृता ।
पद्मकोशविनिर्गच्छद्भृङ्गश्रेणिभ्रमं दधौ ॥ ५७ ॥

1 P °भुवनाद्रीन्द्रो । 2 K बिभ्रत् । 3 K दृप्ता । 4 K °नङ्गचक्रिणः । 5 P °त्याख्यान्तीवेत्य° ।

दन्तक्षतार्द्रा कस्याश्चिद् दिद्युते वीटिका करे ।
भालेनास्या जिता कृष्णा कृशा लेखेव सीतगोः ॥ ५८ ॥
उपरुध्य करेणैव वेगान्नीवीमसंयताम् ।
प्रस्थिताऽभात् परा सादी वल्गावल्गत्करो यथा ॥ ५९ ॥
प्रसाधिकाकरात् पादं रभसादाक्षिप्य काचन ।
चचालालक्तकाङ्कानुमिताङ्घ्रिस्पृष्टभूतला ॥ ६० ॥
कुम्भिकुम्भेक्षणादात्मस्तनापहृतिशङ्किनी ।
काचिदन्वेषयामास पाणिना स्वमुरो मुहुः ॥ ६१ ॥
सव्याङ्गभूषणं सव्येतराङ्गे बिभ्रती परा ।
साम्यं मिथोऽनयोरेव स्माहेव जितविश्वयोः ॥ ६२ ॥
पश्यन्त्युदञ्चितग्रीवं पादाग्राक्रान्तभूः परा ।
विजेतुं कुम्भिनः कुम्भानिवाभादुन्नमत्कुचा ॥ ६३ ॥
धम्मिल्लबन्धे कस्याश्चिदङ्गुल्यन्तर्विनिर्गता ।
कलिका चम्पकस्येव रेजे पत्रावलीवृता ॥ ६४ ॥
कराब्ज एव बिभ्राणा रेजेऽन्या कनकावलीम् ।
यूनां नेत्रकुरङ्गाणां क्षेप्तुकामेव वागुराम् ॥ ६५ ॥
सुप्रसाधितसव्याङ्गी रणद्भिर्नूपुरैः परा ।
अर्धनारीश्वरालोकरागिणां रागमादधे ॥ ६६ ॥
शिरस्यपिहितेऽन्यस्या रक्षा वेणिमुखस्थिता ।
फणाभृतः फटाटोपे फणामणिरिवाबभौ ॥ ६७ ॥
तानवं प्रापयन्मध्यं वक्षोजौ गौरवं नयत् ।
स्त्रीणामूर्ध्वस्थितं रेजे प्रभुशक्तिमिवाश्रितम् ॥ ६८ ॥
दृग्द्वयेन पिबन्त्योऽस्यासीमं लावण्यवारिधिम् ।
जिग्युश्चुलुत्रयापीतससीमाब्धिं मुनिं स्त्रियः ॥ ६९ ॥
अवाप्तावसराः काश्चित् कटाक्षैर्विव्यधुर्नृपम् ।
ता धानुष्क इवामुष्य कामः काण्डैर्व्यडम्बयत् ॥ ७० ॥
पिबन्त्यो नृपलावण्यसुधां तृप्तिं न लेभिरे ।
तथाऽपि शिरसः कम्पं सद्यः काश्चन तेनिरे ॥ ७१ ॥
इत्थं पुरवराङ्गीभिर्मनोहृत्य दृगञ्चलैः ।
निपीयमानलावण्यः स स्वं प्रासादमासदत् ॥ ७२ ॥

---

1 P संयता । 2 P वल्गुवल्गत्करो । 3 K °ह्रिस्पृष्ट° । 4 K °सव्याङ्गि° । 5 K नयत् । 6 P चलुत्रया° ।

अहितापकरस्फारविक्रमाक्रान्तभूतलः ।
अच्युतस्थितिरप्यासीन्न स क्वापि जनार्दनः ॥ ७३ ॥
व्याख्या धर्मार्थकामाख्याः पुरुषार्थास्त्रयोऽप्यमी ।
यथायोगमवाप्तात्माऽवसरास्तं सिषेविरे ॥ ७४ ॥
अहिंसाटोपमाबिभ्रद्विलसत्सर्वमङ्गलः ।
महेश्वरोऽपि तद्राज्ये न विषादी जनोऽद्भुतम् ॥ ७५ ॥
कोटियज्ञफलं राज्ञा पृष्टोऽन्येद्युः पुरोहितः ।
*विश्वरूपा*ख्यया ख्यातो व्याचख्याविति तं पटुः[1] ॥ ७६ ॥
जित्वा भुजबलेनोर्वीं कोटियज्ञं यथोदितम् ।
निर्मिमाणो नृपः प्रीतिपात्रं स्यात् त्रिदिवश्रियाम् ॥ ७७ ॥
इति स्मृतिसुधाम्भोधिच्छटाच्छोटपटुच्छविम् ।
निशम्य तद्गिरं भूपस्तं क्रतुं कर्तुमैहत ॥ ७८ ॥
आहूताः पुरुहूतेन[2] ततो भूमेः प्रमोदिना ।
मिमिलुर्वाडवास्तत्र दुष्कर्मोदधिवाडवाः ॥ ७९ ॥
अन्तःस्फुरच्चतुर्वेदसुधाम्भोधेरिवोर्मयः ।
रेजिरेऽङ्गेषु विप्राणां गोपीचन्दनभङ्गयः ॥ ८० ॥
नित्यस्नानवशात् पिङ्गीभूतकुन्तलकैतवात् ।
बिभ्राणैः परमं तेजः शिरस्यन्तरमादिव ॥ ८१ ॥
द्विभ्रमक्षिप्तरुद्राक्षाक्षमालाव्यपदेशतः ।
भृङ्गैरिवाम्बुजभ्रान्त्या लीनैर्भूषितपाणिभिः ॥ ८२ ॥
अंहोराशिपरित्रासि*काशी*वासप्रकाशिभिः ।
आययानं परानन्दवर्षिभिश्च महर्षिभिः ॥ ८३ ॥
— त्रिभिर्विशेषकम् ॥
मारेर्निवारणं सप्तव्यसनानां च वर्जनम् ।
मोक्षणं गुप्तिगुप्तानां प्रावर्त्तत तदा पुरे ॥ ८४ ॥
तोरणभ्रूलतोत्तुङ्गकल्याणकलशस्तनी ।
शुशुभे वेदिका तत्र यज्ञश्रीरिव देहिनी ॥ ८५ ॥
धूमस्तोममिषाद् भूपकिल्बिषं विक्षिपन्निव ।
ज्वालाजिह्वोऽत्र जज्वाल ज्वालाजटिलिताम्बरः ॥ ८६ ॥
द्विजादेशान्नृपो यज्ञदीक्षा[3]मीक्षाकटाक्षितः ।
सुकृतोप[4]निषद्वेदी वेदीपार्श्वमशिश्रियत् ॥ ८७ ॥

---

1 K पट्टु । 2 K पुरहूतेन । 3 K भिक्षा° । 4 P सकृतोप° ।

मन्त्राहूतत्रयस्त्रिंशद्दनुजद्वेष्टिकोटयः ।
जुहुति स्म बृहद्भानौ वाडवा द्रव्यमण्डलम् ॥ ८८ ॥
वेदमन्त्रानुभावास्ता रुचिना शुचिनाऽमुना ।
पपिरे[1] सर्पिषां विप्रार्पिताः स्फीताः परम्पराः ॥ ८९ ॥
तदर्धास्यसुधात्यागाद्[2] दाहभीचकिता इव ।
आपतन्त्यपि हव्यानि तदा जगृहिरे सुराः ॥ ९० ॥
गायत्सु मधुरं वैदीऋचो विप्रेषु हर्षतः ।
चलत्कीलावलिव्याजान्ननर्तेव हुताशनः ॥ ९१ ॥
नृपपुण्यप्रभावेण निःप्रत्यूहं द्विजेश्वराः ।
ययुः क्रतुक्रियापारं भवपारं तपस्विवत् ॥ ९२ ॥
हाटकानां ततः कोटिं क्षोणीं चाक्षीणसम्पदम् ।
भूदेवेभ्यो नृदेवोऽदाद् दक्षिणां चारु[3]लक्षणाम् ॥ ९३ ॥
नृपविश्राणितस्वर्णकूटेषु नटतो द्विजान् ।
निरीक्ष्य निर्जरा मेरुक्रोडक्रीडामदं जहुः ॥ ९४ ॥
इहैष स्वर्णदानेन तथाऽतूतुषदर्थिनः ।
तान् विहायोच्चकैर्दातॄनुपास्थित[4] यथाऽर्थिता ॥ ९५ ॥
रत्नराशिप्रदं[5] केचित् केचित् पुष्कलनिष्कदम् ।
गजदं वाजिदं केचित् *श्रीहम्मीरं* तदाऽस्तुवन् ॥ ९६ ॥
विश्राणनं सृजन् चिन्ताकल्पनाकामना[6]ऽतिगम् ।
स चिन्तामणिकल्पद्रुकामकुम्भेष्वधाद् घृणाम् ॥ ९७ ॥
सितोपलामिलन्मुग्धदुग्धा[7]दिरसपेशलम् ।
राज्ञा तदा मुदा तेने प्राज्यं भोज्यं द्विजन्मनाम् ॥ ९८ ॥
ततः पुरोहितेनाऽभियुक्तो युक्तं पुरोहितम् ।
आददे नृपतिः प्रीतो मासमेकं मुनिव्रतम् ॥ ९९ ॥

इतश्च शत्रुहृच्छल्यां *दिल्ल्यां*[8] शकमतल्लिका ।
बभूवा*ल्लावदीना*ख्यो व्याख्यः शौर्यवतां धुरि ॥ १०० ॥
ज्ञातभूपस्वरूपेण तदा तेन स्वसोदरः ।
*उल्लूखाना*ख्यया ख्यातो जगदे जगदेकजित् ॥ १०१ ॥
*रणस्तम्भपुरा*धीशो *जैत्रसिंहो*ऽभवत् पुरा ।
प्रददौ स सदा दण्डं मम चण्डौजसो भयात् ॥ १०२ ॥

---

1 P पिपिरे । 2 P तदर्थास्यसुधात्याग° । 3 K चारुलक्षणः । 4 K °नुपास्था-दर्थिता यथा । 5 K राजवाहिप्रद° । 6 K °नाधिकम् । 7 P °मुग्धा । 8 P दिल्ल्यां ।

हम्मीरनामा तत्सूनुरखुनाऽखर्वगर्ववान् ।
दण्डं दूरत एवास्तु न वाक्यमपि यच्छति ॥ १०३ ॥
स महौजस्तया शक्यो जेतुं नाभूदियच्चिरम् ।
प्रतेस्थिधीतयेदानीं लीलयैव विजीयते ॥ १०४ ॥
तद् गत्वाऽस्य रणस्तम्भतलं देशं विनाशय ।
ध्वंस्ते देशे स संस्थातुं सासहिः कति वासरान् ॥ १०५ ॥
इत्यवाप्य प्रभोराज्ञामुलूखानोऽत्यमर्षणः ।
प्रतस्थेऽष्टायुतीमानाश्ववारस्फारविक्रमः ॥ १०६ ॥
रङ्गत्तुरङ्गतुङ्गोर्मिर्गर्जद्द्विरदवारिदः ।
शाणोल्लेखितशस्त्रौर्वो रेजेऽस्य बलवारिधिः ॥ १०७ ॥
भुग्नयन् बलभारेण फटाटोपं स वासुकेः ।
प्रवेष्टुमक्षमोऽभ्यन्तर्वर्णनाशातटे स्थितः ॥ १०८ ॥
ज्वालयन्नुद्वसान् ग्रामानाद्र्वलांश्च चारयन् ।
आसन्नाष्टादशान् घस्रान् सुखेनैषोऽत्यवाहयत् ॥ १०९ ॥
त्रिशुद्धयात्तव्रतत्वेन जोषं तस्थुषि भूपतौ ।
भीमसिंहोऽथ सेनानीर्धर्मसिंहधियोद्धुरः ॥ ११० ॥
उत्कालसमरोत्तालवीरवाराकुलं बलम् ।
सहादाय महावीर्यश्चचालारिबलं प्रति ॥ १११ ॥ – युग्मम् ॥
वाहमानबले वाद्यमाननिस्वाननिस्वनान् ।
निशम्य व्याकुलीभावं शिबिरे दधिरे शकाः ॥ ११२ ॥
वारणेष्वक्षिपन् केऽपि प्रखरान् प्रखरा रणे ।
वाहानभ्युद्यतोत्साहा मङ्क्षु पर्याणयन् परे ॥ ११३ ॥
अबध्नन् केऽपि तूणीरानगृह्णन् केऽपि मुद्गरान् ।
अकर्षन् केऽपि निस्त्रिंशानदधन् केऽपि खेटकान् ॥ ११४ ॥
चण्डदण्डप्रपातेन केचिद् वाद्यान्यवीवदन् ।
योद्धृन् ज्ञापयितुं योद्धुं संनद्धीभवितुं रयात् ॥ ११५ ॥
धीरत्वं प्रापयन् सैन्यानथोलूखाननायकः ।
निर्ययौ स्वयमारुह्य सिन्धुरं सिन्धुरौजसाम् ॥ ११६ ॥

---

1 K गर्वतः । 2 P प्रतेस्तिथीतयेदानीं । 3 P हते । 4 K °क्षमो ह्यन्त° । 5 K ज्वालयन्नुद्वसान् । 6 K वारुणे । 7 P पर्याण्यन् । 8 P °नदहन् केऽपि । 9 K वाद्यान्यवो° । 10 P सन्निधी ।

वंशाग्रलम्बितश्यामसितचामरकैतवात् ।
लक्ष्यगङ्गायमीलक्षमन्तरिक्षमजायत ॥ ११७ ॥
शकानां बाहुजानां च मिथोऽप्यथ निरीक्षणात् ।
अजागरीन्महावैरं दैत्यानां द्युसदामिव ॥ ११८ ॥
पदगः पदगं सादी सादिनं रथिनं रथी ।
निषादिनं निषादी चेत्यवृण्वन् सैनिका मिथः ॥ ११९ ॥
मा भूद् युद्धरसच्छेदोऽस्माकं तापनतापनात् ।
इतीव प्राग् भटास्तेनुर्गगने काण्डमण्डपम् ॥ १२० ॥
अङ्के लगन्तः प्रत्यर्थिपत्रिणो वीरकुञ्जरान् ।
सुखयामासुरेणाक्षीकटाक्षा इव कामिनः ॥ १२१ ॥
वीराः सर्वाङ्गसंलग्नै रिपुक्षिप्तैः शिलीमुखैः ।
रेजुर्जयरमाश्लेषसुखाद् रोमाञ्चिता इव ॥ १२२ ॥
नीरन्ध्रप्रसृतैर्बाणैः कल्पिते मेघमण्डले ।
युक्तमेवोदडीयन्त हंसा हृत्सरसोऽङ्गिनाम् ॥ १२३ ॥
वैरिवक्त्रसरोजेषु भ्रामयित्वा शिलीमुखान् ।
अपाययन् मनोहत्य तज्जीवितरसान् परे ॥ १२४ ॥
हर्षात् प्रनृत्यतां वीरकोटीराणां रणाङ्गणे ।
खाट्कारः खड्गदण्डानां कस्यासन् न मनोमुदे ॥ १२५ ॥
क्षणयायावरैः प्राणैश्चिरस्थास्नुयशोऽर्जनात् ।
भेजिरे भटकोटीरा दिव्यां व्यवहृतिक्रियाम् ॥ १२६ ॥
उत्प्लुत्योत्प्लुत्य धावन्तः सादिशीर्षच्छिदेच्छया ।
जीवन्तोऽपि यियासन्त इव स्वर्गं बभुर्भटाः ॥ १२७ ॥
विसृजारुणिता रेजुर्वीराणां तरवारयः ।
लोला इव पलादानां रणे कीलालपायिनाम् ॥ १२८ ॥
लग्नमात्रा अपि भटान् प्रापयन्त्यो यमोदरम् ।
यमदंष्ट्रा निजं नाम निन्यिरे चरितार्थताम् ॥ १२९ ॥
खड्गलूनपतन्मुण्डदन्तुरेऽपि रणाङ्गणे ।
धावन्तो नास्खलन् वीराः स्वशौर्यालम्बिता इव ॥ १३० ॥
त्वत्कुचोन्नतिहृत्कुम्भाः कुम्भिनोऽद्य हता रणे ।
इत्येके स्त्रीप्रतीत्यर्थं दन्तिदन्तानलासिषुः ॥ १३१ ॥

1 K कैतवान् । 2 P लग्नगङ्गा । 3 K रणरस° । 4 K यास्थरैः । 5 K प्रापयन्तो ।
6 P यमदंष्ट्रः ।

समप्रदेशमापन्नान् यवना वीक्ष्य बाहुजान् ।
अधावन्त पुरस्कृत्य वारणान् वीरवारणान् ॥ १३२ ॥
*चाहमानै*रुरःपूरं पूरिता मर्मभिच्छरैः ।
तस्थुरूर्ध्वक्रमा एव द्विट्गजाः स्तम्भिता इव ॥ १३३ ॥
तदा भटप्रकाण्डानां युद्धं किमिव वर्ण्यते ।
यद्युध्यन्त शस्त्राण्यप्यन्योऽन्यास्फालनच्छलात्[1] ॥ १३४ ॥
बलोच्छलितधूलीभिर्महाध्वान्ते प्रसर्पति ।
स्वान्योपलक्षणं जज्ञे केवलं स्वस्वभाषया ॥ १३५ ॥
एवं स्फुरति कीनाशकोटिहृत्तर्पणे रणे ।
धानापेषं स्म पिषन्ति *चाहमाना* द्विषद्दलम् ॥ १३६ ॥
शत्रुभीत्या कबन्धान्तर्निर्विष्टजनरक्षणात् ।
मृता अपि भटाश्चित्रं न शरण्यव्रतं जहुः ॥ १३७ ॥
हृढोपात्तातपच्छत्त्रैः[2] पर्यस्तैर्भटपाणिभिः ।
युयुत्सुरिव भाति स्म तदा समरभूरपि ॥ १३८ ॥
दन्तिदन्ते पदं दत्त्वा प्रहरन्तो निषादिनः ।
चेतांसि पातयामासुः[3] सादिनां रथिनामपि ॥ १३९ ॥
निषादिनो न ते ते न सादिनो न च ते भटाः ।
उरःपूरमपूर्यन्त *चाहमान*शरैर्न ये ॥ १४० ॥
हयान् केचिद् गजान् केचिच्छस्त्राण्येके रथान् परे ।
हायं हायं स्म[4] नश्यन्ति काकनाशं शकायुधाः ॥ १४१ ॥
केचित् तृणं दधुर्दन्तैर्निपेतुः केऽपि पादयोः ।
त्वद्गौरित्यवदन्[5] केऽपि जीवं त्रातुं शकब्रुवाः ॥ १४२ ॥
इत्थं भङ्क्त्वा शकानीकं[6] *भीमसिंहो* न्यवर्त्तत ।
अनुप्रतस्थे प्रच्छन्नम*ुलूखानो*ऽप्यमर्षणः ॥ १४३ ॥
बाहुजा लुण्टितानेक[7]स्वर्णकोटीरकङ्कटाः ।
जितकाशितया *भीमं* पश्चात् त्यक्त्वाऽगमन् पुरः ॥ १४४ ॥
अद्रिघट्टान् विशन् *भीमसिंहो*ऽपि परया मुदा ।
आच्छिद्य स्वीकृतान्युच्चैः शकवाद्यान्यवीवदत् ॥ १४५ ॥

1 K °स्फलन° । 2 P हढात्ततापत्त° । 3 K पातयामासुश्चाहमानास्तुरङ्गिणां । 4 K पलायन्त काकनाशं शकायुधाः । 5 K °रिति जगुः केचिज्जीवं । 6 P शत्तानीकं । 7 P लुण्ठिता° ।

यत्र यत्र स्वकातोद्यनिर्घोषः प्रसरत्यरम् ।
तत्र तत्र जयं मत्वा गन्तव्यं निखिलैरपि ॥ १४६ ॥
इति सङ्केतनाद् भ्रान्ता मन्वाना जयमात्मनः ।
तदा भाव्यर्थभावेन मिमिलुर्यवना जवात् ॥ १४७ ॥
मिलितं स्वबलं वीक्ष्य शको योद्धुमढौकत ।
ववले भीमसिंहोऽपि तादृशाः किमु कातराः ॥ १४८ ॥
तत्र कृत्वा महायुद्धं शकान् हत्वा परःशतान् ।
काण्डखण्डितसर्वाङ्गो भीमसेनो व्यपद्यत ॥ १४९ ॥
जितकाशी शकेन्द्रोऽपि शिबिरं प्राप्य सत्वरम् ।
बाहुजेभ्यः पुनर्बिभ्यद् ववले स्वपुरं प्रति ॥ १५० ॥
अथ पूर्णव्रतो धर्मसिंहमत्याऽद्रिघट्टकान् ।
हित्वाऽऽगतं नृपो भीमसिंहं मत्वा तमाह्वयत् ॥ १५१ ॥
स्फुटिते तद्दृशौ नूनं यन्नादर्शि शको बली ।
स्वयं पश्चाद् यदस्थासीस्तन्न पुंस्त्वमपि त्वयि ॥ १५२ ॥
साक्रोशमित्युपालभ्याभिसभ्यं भूपतिर्मुहुः ।
मुष्कयुग्मच्छिदा पूर्वं तद्दृशौ निरचीकसत् ॥ १५३ ॥
पण्डोर्विदुरवत् तस्य राज्ञोऽभूदनुजो जयी ।
भोजदेवाभिधः खड्गग्राहीत्यपरनामभाक् ॥ १५४ ॥
धर्मसिंहपदं तस्मै तुष्टोऽथ प्रददे नृपः ।
तं च निर्वासयन् देशादमुनैव न्यषिध्यत ॥ १५५ ॥
अथापमानात् सोऽभ्येत्य गुप्तवैरः स्वमन्दिरम् ।
अधीती भरते धारादेवीं नृत्यमशिक्षयत् ॥ १५६ ॥
तां च प्रेष्यानिशं नृत्यच्छलात् पार्थिवपर्षदि ।
वेश्मस्थोऽपि विदामास स सर्वां नृपतिस्थितिम् ॥ १५७ ॥
चिन्ताचिताङ्गी साऽन्येद्युरागता नृपपर्षदि ।
पृष्टाऽन्धेन जगौ चिन्ताकारणं हृद्विदारणम् ॥ १५८ ॥
ताताद्य वेधरोगेण मृताश्वश्रवणाद् विभोः ।
प्रीत्यै न गीतनृत्यादि चिन्ता तेनेयमुल्बणा ॥ १५९ ॥

1 K ज्ञात्वा । 2 K खानो । 3 K न्यषेध्यत । 4 P धारां देवीं । 5 K नृत्त° । 6 K नृपतेः कथाम् । 7 K प्रभो ! ।

श्रुत्वेत्यसाविमामाह चिन्ता मा स्म कृथा वृथा ।
[1]सं प्राप्तावसरा किन्तु पार्थिवं प्रार्थयेरिति ॥ १६० ॥
आसाद्यते विभो ! धर्मसिंहश्चेत् स्वपदं पुनः ।
मृतेभ्यो द्विगुणानश्वांस्तदसावानयेत् पु[2]नः ॥ १६१ ॥
ओमिति प्रतिपद्यैषा गता राज्ञे तदूचिषी ।
लोभात् सोऽप्यन्धमाहूयाध्यकार्षीत् स्वपदे पुनः ॥ १६२ ॥
विवेकदीपो दीप्येत तावद्धृदि सतामपि ।
तृष्णाझञ्झामरुद् यावन्न भजेदुन्मदिष्णुताम् ॥ १६३ ॥
तृष्णावल्लिरियं काऽपि नवैव प्रतिभासते ।
सद्विवेककुठारोऽगान्न वरं यत्र कुण्ठताम् ॥ १६४ ॥
बिन्दवोऽपि [3]स्फुरल्लोभमदेनान्धम्भविष्णवः ।
सपत्नान् सोदरीयन्ति सपत्नीयन्ति सोदरान् ॥ १६५ ॥
प्रचिकीर्षन्नथामर्षादन्धो [4]वैरप्रतिक्रियाम् ।
चक्रे तद्राज्यमुच्छेत्तुं स उपायान् दुराय[5]तीन् ॥ १६६ ॥
लोभदृष्टिं नृपं कृत्वा द्रविणादानवर्त्मना ।
स प्रजाः पीडयामास चण्डदण्डप्रपातनैः ॥ १६७ ॥
गृह्णन्नश्वधनेभ्योऽश्वान् धनवद्भ्यो धनानि च ।
क्रूरकर्मा स लोकानां क्षयकाल [6]इवाभवत् ॥ १६८ ॥
द्रव्यैः [7]संपूरयन् कोशं राज्ञोऽभूद् भृशवल्लभः ।
वेश्यानां च नृपाणां च [8]द्रव्यदो हि सदा प्रियः ॥ १६९ ॥
प्रजादण्डेन यत् तेन प्रतेने कोशवर्द्धनम् ।
तत् किं स्वस्यैव मांसेन न स्वदेहोपबृंहणम् ॥ १७० ॥
अथ स्वपदभोक्तृत्वाद् वृद्धवैरश्चिरं हृदि ।
स [9]भुक्तान्दव्ययादायशुद्धिं भोजमयाचत ॥ १७१ ॥
[10]क्रुद्धोऽन्धस्फूर्तिमालोक्य भोजदेवोऽथ सत्वरम् ।
गत्वा व्यजिज्ञपद् भूपं मौलिमौलीयिताञ्जलिः ॥ १७२ ॥
देवस्य यदि मे प्राणैः कार्यं गृह्णातु तर्हि तान् ।
न [11]सेहे परमन्धस्य वाक्यतोऽकदर्थनाम् ॥ १७३ ॥
निजगाद नृपो यस्य मयि भक्तिरनश्वरी ।
[12]न लुप्यतेऽत्र केनापि धर्मसिंहस्य शासनम् ॥ १७४ ॥

---

1 P °वसरं । 2 K ध्रुवम् । 3 K स्फुरल्लोभ° । 4 K वैरि° । 5 P °तयान् । 6 K इवाऽभवत् । 7 P संपूरयन् । 8 K प्रायो द्रव्यप्रदः प्रियः । 9 K भुक्त्वा । 10 K क्रुद्धोऽन्धः । 11 K न सेहे । 12 K न लङ्घ्यते त्र कुत्रापि ।

स्वामीव स्वामिनां मान्यः सेवनीयोऽनुजीविभिः ।
सुस्थिरस्थाणुसत्कारादनड्वान् किं न पूज्यते ॥ १७५ ॥
भाषणेनामुना रौद्रदृग्वक्त्रालोकनेन च ।
नृपं दुष्टाशयं ज्ञात्वा *भोजदेवः* स शुद्धधीः ॥ १७६ ॥
निरीहचित्तवत् तस्य सर्वस्वमपि दत्तवान् ।
मूलाद् विनष्टे कार्ये हि किं कुर्याद् बलवानपि ॥१७७॥ युग्मम्।
तथाप्येषोऽभिजातत्वादजहत् स्वामिभक्तताम् ।
योगीव परमं ब्रह्म *भोजो* भूपमसेवत ॥ १७८ ॥
अन्येद्युर्नृपतिर्वै*जनाथ*यात्रामुपागतः ।
दृष्ट्वा पृष्ठस्थितं *भोज*मन्योक्त्येदमभाषत ॥ १७९ ॥
सन्त्येवात्र पदे पदेऽपि बहवः क्षुद्रा निकामं खगा
नो कुत्रापि समोऽस्ति गर्ह्य इतरः काकात् वराकात् परम् ।
क्रोधाविष्टपटिष्ठघूकनिकरास्याग्रोत्थकोटिक्षतै-[1]
स्त्रुट्यत्पक्षचयोऽपि यस्तरुतटं नापत्रपः प्रोज्झति ॥ १८० ॥
अनयाऽन्योक्तिकौमुद्या *भोजो*ऽम्भोजमिवास्तरुक् ।
वेश्मागत्य रहः *पीथसिंहं* सोदरमब्रवीत् ॥ १८१ ॥
देवोऽद्य कल्य उत्पश्य वचनैर्दुर्मनायितः ।
सेवाहेवाकिनोऽप्यस्मान्न तृणान्यपि मन्यते ॥ १८२ ॥[2]
अवाप्तामेयसाम्राज्यमदमोहितमानसाः ।
यदि वा पार्थिवा नैव क्वचिदेकान्तवत्सलाः ॥ १८३ ॥
यात्राव्याजेन तद् यामो दिनानि कतिचिद् बहिः ।
कालक्षेपोऽशुभे श्रेयान्[3] नीतिविद्भिर्जगे यतः ॥ १८४ ॥
संमन्त्र्य सोदरेणैवं भूपं गत्वा[4] व्यजिज्ञपत् ।
काश्यां व्रजामि यात्रायै यद्यादिशति भूपतिः ॥ १८५ ॥
जगाद[5] भूपतिर्यासि परतः परतो न किम् ।
विना भवन्तमप्येवं[6] पुरं संशोभते पुरा ॥ १८६ ॥
इत्याक्रुष्टोऽपि कौलीन्यात् क्षमामेव क्षमापतौ ।
बिभ्राणः प्रचचालैषोऽनु *काशीं* सपरिच्छदः ॥ १८७ ॥

---

1 K °निकरस्त्रोत्थाग्र° । 2 K मन्यते न तृणेभ्योऽपि सेवाहेवाकिनोऽपि नः । 3 K श्रेयानिति नीतिविदो विदुः । 4 K गत्वा भूपं । 5 K भूपतिः प्रजगौ याथ । 6 K भवद्भिरप्येतत् ।

तस्मिन् गते क्षितिपतिः प्रसरत्प्रमोद-
हृद्य दण्डनाथकपदे *रतिपालवीरम्* ।
युक्त्याऽभिषिच्य जगदेकहितत्रिवर्ग-
संसर्गतोऽतिसरसान् दिवसाननैषीत् ॥ १८८ ॥

इति *श्रीजयसिंह*सूरिशिष्यमहाकवि*श्रीनयचन्द्र*सूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के *हम्मीरदेव*दिग्विजयवर्णनो नाम नवमः सर्गः समाप्तः ॥

अथ दशमः सर्गः ।

धरणीरमणापमाननादथ *भोजः* स *शिरोहमागतः* ।
परिभाव्य मुहुः स्वदुर्दशामभिमानेन हृदीत्यचिन्तयत् ॥ १ ॥
विततान विनाऽपि कारणं नरनाथो मम यां तिरस्क्रियाम् ।
विदधे यदि तत्प्रतिक्रियां न तदा केव मनस्विनां गतिः ॥ २ ॥
गुणवानपि वक्रतां गतः पुरुषश्चाप इवातिभीषणः ।
स शरैरिव दुर्जनैर्यतो गुणमुक्तैस्तनुतेऽतिपीडनम् ॥ ३ ॥
अपमानपरेऽपि यो नरे शममेव प्रयतोऽवलम्बते ।
अपि शूकशिखा ततो वरं व्यथयत्यङ्घ्रिमसौ[2] तदाऽहता ॥ ४ ॥
अपकारपरान् सहोदरान् अपि हन्यात् किल नास्ति पातकम् ।
अभिमानवतां नयोन्मुखैः स्थितिरेषा जगदे सनातनी ॥ ५ ॥
सुहृदां यदि वा विरोधिनां क्रिययैव क्रियते परीक्षणम् ।
सुहृदप्यपकारकृद् द्विषन्नुपकारी तु सुहृद् द्विषन्नपि ॥ ६ ॥
सहतेऽरिकृतं पराभवं ननु यः क्लीबमना मनागपि ।
जनिरेव जनिष्ट तस्य मा जननीयौवनगर्वगर्हिणी ॥ ७ ॥
परिपृच्छ्य ततः सहोदरं *पिथमं* सन्मतिवासमन्दिरम् ।
अगमलघु *योगिनीपुरं* यवनानां समगच्छदीश्वरम् ॥ ८ ॥
तादृक्कुलीनोऽपि स *भोजदेवो*ऽधुना ही कृतवान् यदेवम् ।
तन्म्लेच्छभूजृम्भितमेव तस्मात् सतां न तद्भूरपि वासयोग्या ॥ ९ ॥
तत्समागमनहर्षवशात्मा*ऽल्लावदीन*नृपतिः स ततोऽस्मै ।
वस्त्रनिर्वपणपूर्वमयच्छन्मुद्रलेशनगरीं *जगरां* ताम् ॥ १० ॥
तत्र चित्ररुचिभाजि[3] स *भोजः* सोदरं स्वमदरं परिमुच्य ।
आक् स्वयं पुनरुपेत्य च *दिल्लीं*[4] सेवते स्म शकनायकमेव ॥ ११ ॥

1 K धरिणी° । 2 K °त्यंह्रिमसौ । 3 K °चित्रभाज्यथ । 4 P डिल्यां ।

प्रौढमानमनुघस्रममानैः कान्तकाञ्चनहयादिकदानैः ।
तं तथाऽपुषदसावपि भूपो जायते स्म यथा निज एव ॥ १२ ॥
तं विपक्षमपि यत् सदकार्षीत् प्राक् शकस्तदुचितोचितमेव ।
अन्यथा कथमिवारिजयेऽसौ जागदीति निरपायमुपायम् ॥ १३ ॥
आत्मनीनमधिगत्य तमुच्चैरन्यदेति यवनेन्दुरपृच्छत् ।
ब्रूहि *भोज* कथमेष *हमीरो* जीयते युधि मया द्रुतमेव ॥ १४ ॥
सत्यमेव यदि पृच्छसि कार्यस्तर्हि नो मम गिरीश्वर! कोपः ।
इत्युदीर्य गिरमाहितभारामाततान गतभीरथ *भोजः* ॥ १५ ॥
शैथिल्यं *कुन्तलेषु* प्रसभमुपनयन् पीडयन् *मध्यदेशं*
स्थानभ्रष्टां च *काञ्चीं* विदधदुपचयन् काममङ्गेषु लीलाम् ।
यो भूमेश्चञ्चलाक्ष्याः पतिरिव तनुते भाग्यसौभाग्यलक्ष्मीं
स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ १६ ॥
दीपः पर्यायशेषः स्फुरदरुणमणी दीप्तिराकारशेषः
सूरोऽप्याख्यानशेषः प्रलयशिखिशिखाश्रेणिराभासशेषः ।
यस्य प्रौढप्रतापे प्रसरति नितमां क्षोणिपीठे क्षितीन्दोः
स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ १७ ॥
यस्मिन् शश्वन्निवासा ऋतव इव गुणा हायने षट् क्षितीन्दौ
श्रित्वा तिस्रोऽपि तस्थुः पुरुषमिव गुणा यं परं शक्तयोऽपि ।
अङ्गैः स्फीता यथोक्तैः प्रथयति पटुतां यस्य विद्येव सेना
स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ १८ ॥
यं व्यालोक्यापि खड्गग्रहणपटुकरं बिभ्यतां पार्थिवानाम्
निःश्वासो नासिदण्डो न च कुलममलं नापि शौर्यं न धैर्यम् ।
[5]किन्त्वेकं तूर्णमेवापसरणमयते ध्यानमार्गेऽध्वगत्वं
स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ १९ ॥
अश्रान्तस्राविदानोच्छलितपरिमलाकृष्टगुञ्जद्द्विरेफ-
श्रेणीद्विट्कुम्भिकुम्भस्थलदलनकलाकेलिकण्डूलहस्तः ।
सोदर्यो यस्य वीरव्रजमुकुटमणिर्वीरमो विश्वजेता
स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ २० ॥

---

1 K शीघ्रमेव । 2 P °मणेर्दीप्ति° । 3 K शीघ्रमेव । 4 K वैरभाजाम् नेश्वासो ।
5 P किंचेकं ।

त्वङ्खातुर्लुण्टितार्थोर्थननिबिडमतेर्मानमुन्मूलयन्तो
 निःशङ्कं मेनिरे त्वां[2] स्फुटसुभटतया ये तृणायापि नैव ।
औदीच्यास्तेऽपि सेवां विदधति *महिमासाहि*मुख्या यदीयां
 स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ २१ ॥

देशो यस्यानुघस्रं कृतसुकृतजनाचारचारुप्रदेशो
 दुर्गं दुर्ग्राह्यमेवाऽहितधरणिभुजां श्रेणिभिश्चेतसाऽपि ।
अन्योऽन्यस्पर्धिवीर्यार्जितशुचियशसोऽप्याहवे[4] वीरवाराः
 स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव ॥ २२ ॥

अङ्गो नाङ्गानि धत्ते कलयति न पुनर्युद्धलिङ्गं *कलिङ्गः*
 काश्मीरः[5] स्मेरमास्यं न वहति तनुते शौर्यसङ्गं न *वङ्गः* ।
गर्जि नो *गूर्जरेन्द्रः*[6] प्रथयति पृथुधीर्यस्य कौक्षेयकाग्रे
 स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते लीलयैव[7] ॥ २३ ॥

यस्याग्रे नैव किञ्चिद् रपति[8] नरपतिर्भीतिशुष्कोष्ठकण्ठो
 यं नाथत्यश्वनाथः प्रथितकृपणधीर्जीवरक्षामभीक्ष्णम् ।
आत्मक्षेमाय मन्त्रं जपति गजपतिर्यत्कटाक्षेण दृष्टः
 स *श्रीहम्मीरवीरः* समरभुवि कथं जीयते[9] लीलयैव ॥ २४ ॥

शूरः कश्चन कश्चनापि मतिमान् दाक्षिण्यवान् कश्चन
 प्राज्ञः कश्चन कश्चनापि सुकृती दाता पुनः कश्चन ।
इत्येकैकगुणप्ररूढमहिमा जागर्ति भूयान् जनः
 सर्वैः श्रेष्ठगुणैरधिष्ठिततनु*र्हम्मीरवीरः* परम् ॥ २५ ॥

एतस्याधिपतेस्तथोन्नतकराम्भोजप्रसादोदयात्
 दोष्मन्तः श्रियमाप्नुवन्ति तदिदं मंस्थाः स्म माऽत्यद्भुतम् ।
किं चिन्तामणयः स्फुरन्ति न नखाः किं कामधेनोः स्तना
 नाङ्गुल्यस्तलमस्य वा किसलयाः कल्पद्रुमाणां न किम् ॥ २६ ॥

सङ्ग्रामेऽस्य[10] तुरङ्गनिष्ठुरखुरोत्खातै रजोभिः क्षणात्
 पङ्कत्वं गमिते मिलद्रिपुशिरश्छेदोच्छलच्छोणितैः ।
व्योम्नो मध्यपथे रथस्खलनतामाशङ्कमानोऽर्यमा-
 ऽवाचीं[11] कर्ह्यपि चञ्चरीति भगवान् कर्ह्यप्युदीचीमपि ॥ २७ ॥

---

1 K °लुंण्ठिता° । 2 K त्वा । 3 K यशश्चाऽहवे । 4 K शीघ्रमेत्र । 5 K कश्मीरः । 6 P गुंबरेन्द्रः । 7 K सूर्णमेव । 8 "°पति नर°" इति पाठः P प्रतौ पतितः । 9 K जीयतां । 10 K यस्य क्षोणिपतेस्तुरङ्गमखुरो (आजौ यस्य तुरङ्गनिष्ठुरखुरा) । 11 K °ऽपाचीं कर्ह्यपि चञ्चुरीति ।

दीपस्येव समीरणः सरसिजश्रेणेरिवाम्भोधरः
सूर्यस्येव[1] दिनात्ययो यतिवरस्येवैणदृक्संगमः ।
देहस्येव गदोदयो गुणगणस्येवातिलोभाश्रय-
स्तद्राज्यस्य विनाशहेतुरधुनैकोऽन्धः परं दीव्यति ॥ २८ ॥
तदमुं[2] जिगीषसि यदीश ! सर्वथा त्वरया तदा प्रवितर प्रयाणकम् ।
यदमुष्य नीवृदधुना नवोल्लसत्सुमनःप्ररोहहरितीकृतावनिः ॥ २९ ॥
ननु तेषु मङ्क्षपि कथावशेषतां गमितेषु भूप ! भवदीयसैनिकैः ।
जहति प्रजा अमुमिता निराशतां गतनेत्रचण्डतरदण्डनात् पुरा ॥३०॥
आचम्यैत्थं तस्य वाचं शकानामीशोऽप्युल्लूखानमाहूय सद्यः ।
दत्त्वा लक्षं सादिनः सादितारीन् देशं येनाचीचलच्चाहमानम् ॥ ३१ ॥
उल्लूखानः पूरवत् सोऽथ वार्धवृत्तिं शत्रून् प्रापयन् वैतसीं स्राक् ।
क्षत्रोत्तंसान्[3] मन्यमानस्तृणांशान् हिन्दूवाटं प्राप तीव्रप्रतापः ॥ ३२ ॥
चरैरथोक्तारिसमागमोऽसौ हम्मीरदेवः क्षितिपालमौलिः ।
न्यपातयत् पर्षदि हर्षहेलामयेषु वीरेषु दृशं सभावाम् ॥ ३३ ॥
राज्ञश्चेष्टासौष्ठवं तद् विभाव्य हृष्यच्चित्ता वीरमाद्या अथाष्टौ ।
वीराः स्मेरास्याम्बुजा म्लेच्छभूभृत्सेनामेनामन्वधावन्त वेगात् ॥३४॥
दृष्ट्वा म्लेच्छान् मारितान् मत्प्रकाशे भूरीन्[4] भूवन् क्वाप्यमी माऽवसन्नाः ।
इत्थं ध्यात्वेवास भास्वान् प्रतीचीभूभृच्चूलाचुम्बिबिम्बस्तदानीम् ॥ ३५ ॥
जीवं[5] लात्वा द्राक् शका यात रे ! रे ! प्राप्ता ह्येते बाहुजास्तीव्रकोपाः ।
व्याचक्षाणानामितीव प्रकामं व्यापे विश्वं कूजितैर्व्योमगानाम् ॥३६॥
गलद्विचारोल्लसितानि भास्वद्रवां विनाशे रुचिरद्युतीनि ।
तमांसि संगन्तुमिव स्वबन्धून् शकान् प्रसस्रुर्भुवनेऽभितोऽपि ॥३७॥
श्रीवीरमेन्द्रो[6] दिशि माघवत्यां दिशि प्रतीच्यां महिमाख्यसाहिः ।
श्रीजाजदेवो दिशि दक्षिणस्यां दिश्युत्तरस्यामपि गर्भरूकः ॥ ३८ ॥
आग्नेयभागे रतिपालवीरः समीरभागे[7] तिचरः शकेशः ।
ईशानभागे रणमल्लमल्लः[8] श्रीवैचरो नैर्ऋतनामभागे ॥ ३९ ॥
इत्थं यथायुक्ति[9] कृतप्रतिज्ञा वीरा रणोत्साहलसच्छरीराः ।
हम्मीर हम्मीर इति ब्रुवाणाः शकाधिपीये शिबिरे निपेतुः ॥ ४० ॥

---

1 K सूरस्येव । 2 K तदिमं । 3 K क्षत्राङ्कूरान्मध्यमानस्तृणेभ्यो । 4 P सूरीन् ।
5 K जीवमाहं यात रे ! रे ! शकेशा आयान्त्येने । 6 K वीरमाख्यो । 7 K सामीर° ।
8 K मल्लवीरः । 9 P यथाशक्ति° ।

कुन्तैव केऽपि परिलासपूपुरमदहन् परे दलिककुर्गसुम्भितम् ।
न्यविशन्त चान्तरितरेऽतिवेगतः पटवासरज्जुनिचयान् परेऽलुनन् ॥४१॥

धीरं धीरं यात रे! माऽऽकुलत्वं चापाग्रे नो बाहुजाः सन्तु केऽमी।
कूर्वालावं मङ्क्षुपीमान् लुनीमः शब्दाद्वैतं जातमेवं शकानाम् ॥४२॥

केचित् कृपाणाँल्लगुडाँश्च केचिच्चापान् परे केचन मुद्गराँश्च ।
आक्रम्यमाणा नृपवीरवारैस्तदा शकेन्द्रा जगृहुर्जवेन ॥ ४३ ॥

श्रुत्वाऽखिलास्वपि ककुप्सु मृदङ्गनादान्
आतङ्ककम्पितहृदो यवना जवेन ।
संदेहमूर्जितमिता किल जीवितव्ये
कर्त्तः! किमद्य भवितेत्यवदन् सदैन्यम् ॥ ४४ ॥

श्रावं श्रावं सिंहनादान् भटानां भीताश्चक्रुः सारसीं यामिभेन्द्राः ।
तामाकर्ण्य त्रासवन्तोऽतिजीवग्राहं क्वापि क्वापि नेशुस्तुरङ्गाः ॥४५॥

कराग्रजाग्रन्निशितासिदण्डदीप्रप्रभाप्रज्वलितप्रदीपैः ।
उत्सारितध्वान्तचया वितेनुर्वीरा यथेच्छं रणरङ्गलीलाम् ॥ ४६ ॥

निष्कासयामास रणाय यो यः शकः क्रुधान्धो युधि यद् यदङ्गम् ।
तत् तल्लुनानाः किल तस्य तस्य न *चाहमानः* कुतुकाय कस्य ॥ ४७ ॥

भीता जीवाघातमाकर्ण्य सद्यो म्लेच्छा यावद् दिक्षु चक्षुः क्षिपन्ति ।
बाणास्तावत् प्रेरिता*श्चाहमानै*र्विध्यन्ति स्मैवाशु मर्माणि तेषाम् ॥ ४८ ॥

*चाहमान*भटपाणिपङ्कजोन्मुक्तमार्गणगणैश्चितीकृताः ।
रेजिरे करिवरा रणाङ्गणे पर्वता इव नवोल्लसच्छदाः ॥ ४९ ॥

सुभटप्रकाण्डघनकाण्डवर्षणातिकदर्थनेन भृशविक्लवाशयाः ।
यवना युगान्तपवना इवास्फलन् नितरां मिथोऽपि समराङ्गणे तदा ॥५०॥

शस्त्राशस्त्रि शराशरि कुन्ताकुन्ति गदागदि दण्डादण्डि ।
दन्तादन्ति भुजाभुजि वीराः केऽपि परे व्यदधन् रणलीलाम् ॥५१॥

खड्गक्षतारिकरिकुम्भमण्डलान्मुक्ताफलानि निपतन्ति रेजिरे ।
स्वेदोदबिन्दुनिवहा जयश्रियां वीरोपगूहनसमुद्भवा इव ॥ ५२ ॥

विगतद्युतीकृतपराननाम्बुजाः परिखण्डिताश्वतरवीचिसंचयाः ।
सुभटा गजा इव शकेशवाहिनीं सुतरां *हमीर*नृपतेर्जगाहिरे ॥ ५३ ॥

खड्गैः शकानां रुधिरापगाभिर्वार्धिस्तदा रक्तमयो व्यधायि ।
तदम्भसि स्नातविनिर्गतोऽसौ धत्तेऽरुणत्वं कथमन्यथेन्दुः ॥ ५४ ॥

---

1 K °[illegible]म् । 2 K धीरा धीरा । 3 P जीवं जीवग्राहं । 4 K [illegible] ।
5 K °कलस्सदाः । 6 P वि(व्य)दधू । 7 K नितमां ।

क्वचिच्छिरोभिः क्वचिदङ्घ्रिपद्मैः क्वचित् करैः क्वापि च बाहुदण्डैः।
आरेचिता सङ्गरभूरराजन्निर्माणशालेव जगद्विधातुः ॥ ५५ ॥
रङ्गत्तुरङ्गोत्करङ्गवीररसाम्बुपूर्णे रणपल्वलेऽस्मिन्।
सिताम्बुजानीव विरेजुरातपत्राणि कौक्षेयकपातितानि ॥ ५६ ॥
स्फूर्जद्भीर्यैर्बाहुजैर्दत्तदैन्यं दृष्ट्वा सैन्यं सर्वथाऽथात्मनीनम्।
काण्डैर्दण्डैस्ताड्यमानोऽपि जीवन्नुलूखानो नेशिवान् भाग्ययोगात्॥५७॥
केचिन्मम्लुः केऽपि जग्लुः परे च त्रेसुर्नेशुः केचन म्लेच्छपाशाः।
हाहारावं चक्रिरे केऽपि केचिज्जीवं त्रातुं प्राविशन् गुप्तदेशान् ॥५८॥
जितकाशिनोऽथ युधि वीरमादयः सुभटा वितीर्णरिपुराजिसंकटाः।
रणशोधने च शकसैन्यलुण्ठने त्वरयाम्बभूवुरभितोऽपि सैनिकान्॥५९॥
तुरगाभिपातिततुरङ्गिणः शिलीमुखलूनकेतुनिचयान् रथोच्चयान्।
करिणः पलायितनिषादिनो वसून्यमितानि तत्र सुभटा ललुस्तमाम्॥६०॥
तत्रैणनेत्रा यवनाधिपानां बध्वाऽत्यमर्षाद् रतिपालवीरः।
व्यचिक्रयत् ख्यातिकृते क्षितीन्दोस्तर्के प्रतिग्राममपूर्भिरेषः ॥ ६१ ॥
यवनाधिपसैन्यसागरं प्रविलोड्येति भटा मुकुन्दवत्।
परिरब्धजयश्रियो नृपं जयवार्त्ताभिरवर्धयन्नथ ॥ ६२ ॥
अथ क्षितीशो रतिपालशौर्यं अतीभमाकर्ण्य लसत्प्रमोदः।
मत्तो ममायं गज इत्यमुष्य पादेऽक्षिपत् काञ्चनशृङ्खलानि ॥ ६३ ॥
परेष्वपि प्रीतिकृदंशुकादि दत्वा विसृष्टेष्वथ मानपूर्वम्।
नृपेण पृष्टा यवनास्तथैव स्थिताः स्थितेः कारणमूचुरेवम् ॥ ६४ ॥
अस्मासु जीवत्सु यदीह भोजदेवः कृतघ्नो जगरां भुनक्ति।
वीरव्रतं तर्हि विलीनमेव संवीक्ष्यताम्मा कतरो नरेश! ॥ ६५ ॥
सहामहे यच्च दिनांस्तमेतावतोऽत्र हेतुस्तव बन्धुतैव।
त्वद्देशमन्वानयतोऽधुनाऽरिबलं विभो! का बत बन्धुताऽस्य ॥ ६६ ॥
तद्यात्रायै गन्तुमेते नरेश! प्रादिश्यन्तां तेष्विति प्रोक्तवत्सु।
भद्रा भद्रेण त्वरध्वं त्वरध्वं स्फीतप्रीतिस्तान् नृपो व्याजहार ॥ ६७ ॥
जयश्रियो मोहनमन्त्रवत् तमादेशमासाद्य नृपस्य तेऽथ।
भङ्क्त्वा पुरीं तां विनियम्य भोजबन्धुं समागुः सकुटुम्बमेव ॥ ६८ ॥

---

1 K क्वचिदंह्रि°। 2 P सर्वथाऽमा°। 3 K दैवयोगात्। 4 P °देशम्। 5 K °लुण्टनो। 6 K °न्यमितान्यमुत्र। 7 K °रमूमुदन्नथ। 8 K °वीर्यं। 9 K °विलीनमेव। 10 K वरध्वं।

इतश्च तस्मात् समराद् विनष्टः खानः स उलूपपदः कथञ्चित् ।
समेत्य दिल्लीं निजगाद राज्ञे तच्चाहमानप्रकृतं समस्तम् ॥ ६९ ॥
पलायितः कातरवद् भवान् किं ततः क्षितीशे गदतीति सोऽवक् ।
पलायनं चेन्नृप! नाकरिष्यं कौ[3]तस्कुतस्तर्हि तवामिलिष्यम् ॥ ७० ॥
निःशेषमिति तदुक्त्वा विरराम न यावदेव शकबन्धुः ।
मन्यूत्पीडग्रहिलः समेत्य तावत् स भोजदेवोऽपि ॥ ७१ ॥
विस्तार्य सिचयमग्रेऽग्रतः सरस्तत्तदद्भुतमतीनाम् ।
कटुकं विरटंस्तदुपरि सुतरां विलुलोठ भूतचान्त इव ॥ ७२ ॥
किमरे! किमरे! जातं पृष्टः शकभूभुजा जगादैषः ।
मरणावध्यपि स्वामिन्! न विस्मरेद् यत् तदद्य सम्पन्नम् ॥ ७३ ॥
हम्मीरवीरनुन्नो महिमासाहिः स[5] वीरकोटीरः ।
हत्वा जगरां बध्वा सपरिच्छदमेव सोदरमयासीत् ॥ ७४ ॥
ला[6]भाय यतां पुंसामभाग्यतः क्वापि मूलनाशः स्यात् ।
अद्यप्रभृति जनोक्तिर्मदुदाहरणा प्रववृतेऽसौ ॥ ७५ ॥
तत् किं करोमि कं वा श्रयामि यामि क्व वा किमु वदामि ।
हृदयं वातान्दोलिततूलतुलां कलयतीदमनुवेलम् ॥ ७६ ॥
लुठितोऽसि किमिह सिचयोपरीति पृष्टोऽमुना पुनः सोऽवक् ।
जानासि किं न निखिलामिलां जितां चाहमानेन ॥ ७७ ॥
रणभ[7]ङ्गाकुलसोदरपरिदेवनद[8]लिकसंकुले नितमाम् ।
नृपहृदि कोपहुताशे घृताहुतिर्भोजभणितिरभूत् ॥ ७८ ॥

तद्वाक्यश्रवणादथ प्रसृमरक्रोधप्रकम्पाधरो
बाहुष्टम्भनमासनं प्रतिलवं सव्यापसव्ये नयन् ।
प्रत्युत्क्षिप्य शिरोवतंसमवनीपीठे तथाऽऽस्फालयन्
चक्रे काव्यपरम्परामिति तदा म्लेच्छावनीवल्लभः ॥ ७९ ॥

रे रे भोज! विमुञ्च शोकमखिलं लज्जाकरं दोष्मतां
हे भ्रातस्तत कीर्तिकेलिसदनं स्थैर्यं त्वमप्याश्रय ।
दुःखेनैव सह क्षणेन युवयोरेतस्य सोऽहं बली
हम्मीरस्य समूलकाषमधुना मानं कषाम्युच्चकैः ॥ ८० ॥

---

1 K मणष्टः । 2 K ढिल्लीं । 3 P कौतस्तुत° । 4 P °गतः । 5 K समीरको° । 6 P लाभाय ततां । 7 K रणरङ्गा° । 8 K °दाहसंकुले ।

निद्रामुद्रणसान्द्रनेत्रयुगलः सिंहः समुत्थापितो
निर्मोकोज्झनतीव्रकोपफणिनो लातुं मणिः काङ्क्षितः ।
सर्वाङ्गं प्रचिकीर्षितं च हुतभुक्कीलापरिष्वञ्जनं
हम्मीरेण बताद्य कोपितवता म्लेच्छावनीवल्लभम् ॥ ८१ ॥

कः कण्ठीरवकण्ठकेसरसटां स्प्रष्टुं पदेनेहते
कुन्ताग्रेण शितेन कश्च नयने कण्डूयितुं काङ्क्षति ।
कश्चाभीप्सति भोगिवक्त्रकुहरे मातुं च दन्तावलीं
को वा कोपयितुं नु वाञ्छति कुधीरल्लावदीनं प्रभुम् ॥ ८२ ॥

देशो यद्यस्ति चञ्चत्तरसुकृतजनोद्यत्प्रदेशस्ततः किं
दुर्गं यद्यस्ति दुर्गं प्रतिभटनिकरैः कोटिभिर्वा ततः किम् ।
वीराश्चेत् सन्त्यनेके समरभुवि महावीर्यवन्तस्ततः किं
कोपिन्यल्लावदीने सकलमपि भजेद् व्यर्थतामेव सद्यः ॥ ८३ ॥

तावद् गर्जन्तु जाग्रन्मदभरतरलाश्चञ्चला वीरमाद्या
वीराः प्रत्यर्थिवीरावलिदलनकलाकेलिकण्डूलहस्ताः ।
ज्यारावैर्विस्फुरद्भिर्जगदखिलमपि प्रापयन्नेडभावं
यावन्नाल्लावदीनः किरति शरभरं प्रावृषेण्यच्छटावत् ॥ ८४ ॥

पाताले प्रविशत्यसौ यदि तदा नूनं खनित्वा ददे
स्वर्गं चेत् समुपैति सेन्द्रमपि तं संपातयाम्यग्रतः ।
दृग्भ्यां चेद् ददृशे न सङ्गरभरे मद्दोर्द्वयीविक्रमः
कर्णाभ्यामपि शुश्रुवे किममुना तर्हि क्षितौ न क्वचित् ॥ ८५ ॥

रे ! रे ! हम्मीर ! वीरस्त्वमसि परमसौ साम्प्रतं वीरता ते
नूनं व्यक्तीभवित्री मम नयनपथे प्राप्तपान्थव्रतस्य ।
भ्राम्यत्युच्चैर्वनान्ते मदमलिनकपोलस्थलो हन्त ! दन्ती
तावद् यावान् मृगेन्द्रः पतति न पुरतो जृम्भया व्यात्तवक्त्रः ॥८६॥

आसारः कमलाकरे मृगगणे सिंहः कुठारस्तरौ
भास्वान् संतमसे पविः क्षितिधरे दावानलः कानने ।
यत् कर्म प्रतनोति सङ्गरभरं प्राप्तस्तदेवाधुना
कुर्वेऽहं भटसंकुलेऽपि निखिले श्रीचाहमाने कुले ॥ ८७ ॥

---

1 K यमलः । 2 K °जातकोप° । 3 K को वाऽमी । 4 K भाजस्ततः । 5 K मौक्तटा । 6 K यावन्नला° । 7 K तद्दोस्त्वबायाऽऽनयामि स्फुटं । 8 K तत् संपातये [illegible] । 9 K [illegible] ।

तत्कालं यवनावनीपतिरथ प्रोल्लासिमानान् स्फुर-
न्मानान् स्वेन कराम्बुजेन[1] लिखितान् विश्राण्य संप्रेषितैः ।
देशेभ्यो निखिलेभ्य एव निखिलान् दूतैः प्रभूतैरसौ
वीरानाह्वयति स्म विस्मयकरप्रोद्दामदोर्विक्रमान् ॥ ८८ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये
वीराङ्के अल्लावदीनामर्षणो नाम दशमः सर्गः समाप्तः ॥

अथैकादशः सर्गः ।

अङ्गस्तिलङ्गो मगधो मसूरः कलिङ्ग-वङ्गौ भट-मेदपाटौ ।
पञ्चाल-बङ्गाल-थमीम[2]-भिल्ल-नेपाल-डाहाल-हिमाद्रिमध्याः ॥ १ ॥
इत्यादयोऽन्योऽन्यमहंयुताभिः सम्मेलित[3]प्रौढपताकिनीकाः ।
शकाधिनाथा निखिला अपीमां पुरीमथापुर्यवनेश्वरस्य ॥ २ ॥ –युग्मम् ।
वीरैर्जयश्रीकरपीडनाय लुण्टाकवृन्दैरपि लुण्टनाय ।
व्रजद्भिरन्यैः कुतुकेक्षणाय शून्यीभवन्ति स्म दिशां प्रदेशाः ॥ ३ ॥
याते मयीदं(त्थं?) बलभारभुग्नां कः सासहिर्धर्तु[4]मिमां धरित्रीम् ।
इतीव शेषाहिरमुष्य सैन्ये न केवलं गन्तुमना बभूव ॥ ४ ॥
साश्वद्विपेष्वेषु चलत्सु भूभृन्निदेशमात्रेण दिशो दशापि ।
दिग्दन्तिनो दन्तिषु यद्यतिष्ठन् भास्वद्रथाश्वाश्च तुरङ्गमेषु ॥ ५ ॥
पादातिकानां करिणां रथानां चया हयानां च तथा प्रसस्रुः ।
तैलं तिलस्यापि सुखानुमेयं रिक्तं यथा न क्वचिदास भूमेः ॥ ६ ॥
ततोऽनुजौ स्फारभुजौ शकानामधीश उलूगिसुरत्तखानौ ।
इदं महाचोर्वि वितीर्य सैन्यमचीचलज्जेतुममुं हमीरम् ॥ ७ ॥
शकेश्वरोऽद्यापि समस्ति पश्चात् सृजन्निति क्षत्रकुलेषु भीतिम् ।
शरीरमात्रं स्वयमत्र चास्थादहो शकानां नृपनीतिवित्त्वम् ॥ ८ ॥
लब्ध्वा सहायं निसुरत्तखानं ज्वलन् क्रुधोलूपपदः खखानः ।
इयेष मूलादपि वैरिवंशान् दग्धुं बृहद्भानुरिवाहिकान्तम् ॥ ९ ॥
बलं किलैतद् व्रजति स्म यत्र यत्रैष शेषोऽपि[6] च तत्र तत्र ।
महीतलध्वंसभिया प्रसर्पन्नासीच्छकाज्ञाप्रविलोपिधैर्यः[7] ॥ १० ॥

---

1 P कराम्बुजेन । 2 K थमीमडाहले° । 3 K संमीलित° । 4 P °विरता । 5 K °नाथिपत्र । 6 K द्विषोऽपि । 7 K °नाभूच्छका° ।

पद्भिः पतद्भिर्ध्रुवमस्मदीयैः शेषो धरां धर्त्तुमसौ न शक्तः ।
तन्वीं भुवीतीव वितेनुरेते गतिं तुरङ्गा गगने तु गुर्वीम् ॥ ११ ॥
धावद्धयालीपदपातजातरेणूत्करैः पूरिषताब्धयो मा ।
हेतोरिवास्माद् द्विरदा असिञ्चन् मन्दाम्बुपूरैरभितोऽपि भूमिम् ॥१२॥
सहाभविष्याम पुरा वयं चेत् किं बाहुजास्तर्हिं पराभविष्यन् ।
इत्यूचुषः कांश्चिदुपेतपूर्वा नाद्यापि किञ्चिद् गतमित्यथोचन् ॥ १३ ॥
गजाः कियन्तस्तुरगाः कियन्तो रथाः कियन्तः कति वा भटाश्च ।
जनैर्जनानामिति वादितानां संख्या नहीत्युत्तरमेकमेव ॥ १४ ॥
सर्वाङ्गसंनाहनिवेशलक्ष्यचक्षुर्द्वयीमात्रतयाऽतिरौद्राः ।
प्रधावमानाः सुभटा विरेजुर्लोहस्य गोला इव विस्फुरन्तः ॥ १५ ॥
क्षणात् शकानां कटकैर्निपीताशेषाम्भसामध्वनि निम्नगानाम् ।
गम्भीरमप्यास तलं सुदर्शं जडात्मनां वा न दुरापमन्तम् ॥ १६ ॥
भुक्तिं व्यधाद् यत्र न तत्र सुप्तिं यत्राततैतां न च तां च तत्र ।
अथेत्यविश्रान्ततरैः प्रयाणैर्लक्षीचकारैष विपक्षसीमाम् ॥ १७ ॥
सैन्यैः शकानां प्रसृतैः समन्ताद् देशः कृतः क्लेशवशंवदः सः ।
निर्नाथवन्मङ्क्षु पलाय्य जीवग्राहं प्रयाति स्म यतस्ततोऽपि ॥ १८ ॥
ततोऽद्रिघट्टान् प्रसमीक्ष्य पूर्वानुभूतभीसंस्मरणाद् भयालुः ।
आहूय खानो निसुरत्तखानं सहोदरं सुन्दरमित्युवाच ॥ १९ ॥
भ्रातः ! प्रवेशे विषमा गिरीन्द्रा भटास्तदीयाः प्रकटौजसश्च ।
तदद्रिघट्टान् विशतो बलस्य भवन्नपायः खलु नो हिताय ॥ २० ॥
तद्बाहुजान् सन्धिमिषेण विप्रतार्याद्रिघट्टेषु सुखं विशामः ।
उपायसाध्ये खलु कार्यबन्धे न विक्रमं नीतिविदः स्तुवन्ति ॥ २१ ॥
मते मतेऽत्रानुमतेऽमुनापि श्रीमोल्हणं प्राग् विधिनाऽनुशास्य ।
दिदेश संधानकृते हमीरभूभृत्समीपे कितवः प्रयातुम् ॥ २२ ॥
स्वयं च सन्नह्य बलान्यमुष्मिन्नेवं छलेनाविशदन्तरद्रि ।
मध्ये प्रविष्टः सुखसाध्य एवास्माकं भटैरित्थमुपेक्षितश्च ॥ २३ ॥
मुण्ड्यां[10] प्रतोल्यामनुजस्य शस्य[11]श्रीमण्डपे दुर्गवरे निजं च ।
सरश्च जैत्रं परितः परेषामतिष्ठिपत्[12] सैन्यमपास्तदैन्यः ॥ २४ ॥

---

1 K °भृश° । 2 P °पादजात° । 3 P °सन्नेह° । 4 K °जुरयोविकारा इव ।
5 P गभीर° । 6 P (राज्ञः स°) भूभृ° । 7 P प्रयातु । 8 K °क्षेव फलके प्राप्ति° ।
9 K सुखहस्य । 10 P मुख्यां । 11 K श्रीमेण्डपे । 12 K °मतिष्ठपत् ।

स मोल्हणः प्राप्य कथञ्चिदन्तस्ततः प्रवेशो नृपशासनेन ।
दृष्ट्वा रणस्तम्भपुरं तदुच्चैर्बभूव चित्रार्पितनेत्रपद्मः ॥ २५ ॥
वप्रे यदीये स्फटिकोद्भवानां माला लसन्त्यः कपिशीर्षकाणाम्[1] ।
दिगङ्गनानां वदनश्रियं स्वां विलोकितुं[3] दर्पणभावमीयुः ॥ २६ ॥
प्रदेशयोरप्युभयोर्मिलद्भिर्माणिक्यसोपानमयूखजालैः ।
विलासवापीषु पयश्चकासांबभूव यत्रेव निबद्धसेतु ॥ २७ ॥
यस्मिन् मृगाक्षीवदनेन्दुभाभिर्विसारिणीभिर्विजितः शशाङ्कः ।
खयाम्बुपूरे[4] प्रतिबिम्बदम्भात् किमेष दुःखात् प्रददौ न झम्पाम् ॥२८॥
त्यागाय भोगाय विवेकभाजा जनेन शश्वद् विधृता कराब्जे ।
लेभेऽवकाशं चपलाऽपि लक्ष्मीः पलायनं कर्तुमहो न यत्र ॥ २९ ॥
मरुत्तरङ्गप्रविकम्पितायां ध्वजावलौ इभ्यतमालयेषु ।
लीनेव यत्रास्थिरता न जातु रमासु रामासु समुल्ललास ॥ ३० ॥
जालैर्मणीनामधिकुट्टिमोद्यद्भासैः[5] समन्तात् प्रसरन्मयूखैः ।
प्रासादशृङ्गेषु दशेन्धनाली[6] निन्येऽवकेशित्वमुषासु यत्र ॥ ३१ ॥
यत्रोज्ज्वलस्फाटिकभित्तिभागे[7]ऽप्येणीदृशो दृष्टनिजाङ्गलक्ष्म्यः ।
माङ्गल्यहेतोर्नवरं निरीक्षाञ्चक्रुर्विभाते मुकुरेषु वक्त्रम् ॥ ३२ ॥
यत्रेभदन्तोद्भवचित्रजालवातायनस्थाः कृतदिव्यभूषाः ।
विनिद्र[8]पाथोजदृशो विमानमधिश्रिता देव्य इव स्म भान्ति ॥ ३३ ॥
नृपालयोत्तंसितशातकुम्भकुम्भप्रभा यत्र समुल्लसन्त्यः ।
अभ्युन्नतासन्नपयोधराणां वर्षासु पम्पासमतामगच्छन् ॥ ३४ ॥
अनारतं कौमुदमादधानाः संसेव्यमाना द्विजराजिभिश्च ।
मिष्टैः पयोभिः प्रतिभासमाना[9] विभान्ति यागा इव यत्तडागाः ॥३५॥
वातायनाः किं किममी विमाना जनैः समं तेष्विति संशयानः ।
अबोधि यस्मिन् मिथुनैस्तु तत्स्थैरेवानिमेषैश्च निमेषिभिश्च ॥ ३६ ॥
विलासि[10]वेश्मोदरदह्यमानसुगन्धिधूपोत्थितधूमसङ्घात् ।
व्यधायि यस्मिन्नपि किन्नरीभिरयत्नजन्या पटवासयुक्तिः ॥ ३७ ॥
महद्धिसंस्पर्धिविवर्द्धिकीर्ति परं पुरं किञ्चिदिहास्ति नो वा ।
इतीव यद्भ्रूभ्रशिरोऽधिरुह्य भुवं दृशा पश्यति गोपुरेण ॥ ३८ ॥
निवासवद्भिः सुमनोभिरेभिर्विमानताऽस्मासु कृतेति दुःखात् ।
नैवास्वपन् निश्यपि निर्निमेषकपाटपक्ष्माणि गृहाणि यत्र ॥ ३९ ॥

1 K कपिशीर्षकाणां 2 K स्फटिकोद्भवानाम् । 3 K निरीक्षितुं । 4 P °पुरप्रति° । 5 K कुट्टिमाद्यद्भासैः । 6 K °नालिर्निल्ये । 7 P यत्रोज्ज्वलत्स्फा° । 8 K निर्निद्र° । 9 K प्रतिभास° । 10 K विलास° ।

विसारिरत्नकान्तित्विषाभिभूतिद्विरेफितस्वर्णतुलासु यत्र ।
स्त्रीणां मुखानि प्रतिबिम्बितानि स्वर्णोत्पलानीव चमीषु रेजुः ॥ ४० ॥
सूर्याश्मकुड्यप्रतिबिम्बिनारीमुखानि यत्राब्जधिया वितर्क्य ।
दधुः सुकेश्यः पततो द्विरेफान् दशन् सखीवक्त्रममी स्म मेति ॥ ४१ ॥
कुशेशयाशालिदृशो निशायां रतौ ह्रिया यत्र निशम्य दीपान् ।
ध्वस्तेऽभवन् संतमसेऽवकेशियत्नाः स्फुरत्कुड्यमणिप्रभाभिः ॥ ४२ ॥
निशम्य यत्राविरतोत्सवेषु मृदङ्गनादान् ध्रुवमर्जितो यः ।
अद्याप्यमी गर्जिषु वारिवाहा विवृण्वतेऽभ्यासभरं तमेव ॥ ४३ ॥
हम्मीलनाकेलिषु यत्र बाला सखीप्रहातङ्कसु[1]निश्चलाङ्गी ।
पाञ्चालिकानां वि[2]तनौ निलीना दृष्टाऽपि [3]नाग्राहि सखीजनेन ॥ ४४ ॥

—महाकुलकम् ।

निभालयन् लोचनलोभिलक्ष्मि क्रीडानिकेतं पुरमेतदुच्चैः ।
नृपालयश्रीकरकैरवेषु दृशं भृशं स भ्रमरीचकार ॥ ४५ ॥
स्तम्बेरमाणां मदवारिभिन्नकुम्भस्थलीसंचरणप्रमत्ताः ।
झङ्कारवैर्यत्र सदा द्विरेफा वसन्तमाहुः स्म वसन्तमेव ॥ ४६ ॥
क्रीडागिरीन्द्रैरिव वीरलक्ष्म्या यदेकतोऽराजत वारणेन्द्रैः ।
गङ्गातरङ्गैरिव दत्तरङ्गैस्तथाऽन्यतोऽश्वैः पदखातविश्वैः ॥ ४७ ॥
भुजङ्गमाधिष्ठितचन्दनद्रुमिवासिहस्तं प्रकृतिप्रशस्तम् ।
पूर्वाद्रिचूलाश्रिततिग्मरश्मिमिवोरुसिंहासनसन्निविष्टम् ॥ ४८ ॥
सिंहासनान्तर्गतबिम्बदम्भाद् धराधिपैः शीर्ष इवोह्यमानम् ।
रत्नस्तरङ्गाङ्गरुचीचयेनेव खर्वयन्तं नवहेमगर्वम् ॥ ४९ ॥
नक्षत्रचक्रेष्विव शीतरश्मिममर्त्यचक्रेष्विव देवदेवम् ।
नरेन्द्रचक्रेषु विराजमानमनन्यजन्येन महामहिम्ना ॥ ५० ॥
निबद्धभूबिम्बितसभ्यदम्भात् सभामधस्तादिव कुर्वती गौः ।
अधिश्रितं तत्र सभां विभाव्य हम्मीरदेवं स हृदीति दध्यौ ॥ ५१ ॥
किमेष कामो न यतोऽननङ्गः किमेष दस्रौ न यदद्वितीयः ।
किमेष विष्णुर्न यतोऽद्विबाहुः किमेष वज्री न यतो द्विनेत्रः ॥ ५२ ॥
त्यक्तान्यकार्यैरथ वीरवर्यैर्विलोक्यमानो वदतीति किं किम् ।
प्रणम्य भूपं दरनम्रमौलिः प्रचक्रमे व्यक्तमिदं प्रवक्तुम् ॥ ५३ ॥
स्वतेजसैवारिगणं विजित्याकुतोभयं संसृजतः स्वराज्यम् ।
वृथैव वर्षासनमाददाना [4]लेलज्जिरे यस्य भटा निकामम् ॥ ५४ ॥

1 K विनिश्चलाङ्गी । 2 K वितती । 3 K नाग्राहि । 4 K [illegible]

दुर्गाणि दुर्ग्राह्यतराणि शाणोल्लीढानि शस्त्राणि भटा रणोत्काः ।
अभ्रंलिहाग्रा गिरयो यदग्रे न वास्तवीं वृत्तिमयुः कदाचित् ॥ ५५ ॥
दुर्गाणि दुर्ग्राह्यतराणि यः श्रीदेवाद्रिमुख्यान्यपि मङ्क्षु भङ्क्त्वा ।
अवीन्द्रमुद्यद्दरदन्तुराक्षी चकार कारायमितारिचक्रः ॥ ५६ ॥
दुर्गाणि दुर्ग्राह्यतराण्यरीणां भञ्जन्ननेकान्यपि लीलयैव ।
आजन्मभग्नत्रिपुरैकदुर्गे दुर्गापतौ योऽत्र घृणां बिभर्ति ॥ ५७ ॥
यद् यन्मनस्यप्यमुना नरेन्द्र! निधीयते तत् तदहो तदात्वम् ।
सम्पादयन् सोऽपि विधिर्विशङ्के न शासनं यस्य विहन्तुमीष्टे ॥ ५८ ॥
अल्लावदीनस्य नृपस्य तस्यानुजौ किलोलूनिसुरत्तखानौ ।
देशं तवाक्रम्य तदाज्ञयैव त्वामाहतुः स्मेति मदाननेन ॥ ५९ ॥
हम्मीर! राज्यं यदि भोक्तुमीहा तत् स्वर्णलक्षं चतुरो गजेन्द्रान् ।
अश्वोरणानां त्रिशतीं सुतां च दत्त्वा किरीटीकुरु नो निदेशम् ॥ ६० ॥
इदं विमुक्तं यदि वा परन्तु तथाऽस्मदाज्ञाप्रविलोपिनो द्वे ।
स्नाग् मुद्गलांस्तांश्चतुरोऽपि दत्त्वा क्रोडीकृतां क्रीडय राज्यलक्ष्मीम् ॥६१॥
त्यक्त्वा यथैतं तव दुर्गरोधं देशान् पुरः साधयितुं व्रजामः ।
न चेद् विधाता प्रतिघोषितं स्वराभ्यां तु तत् तेऽनुभवोऽभिधाता ॥६२॥
इत्येतदीयानि वचांसि भूपः श्रुत्वाऽथ भीमां भृकुटीं दधानः ।
नवोल्लसत्क्रुध्विषवल्लिसूनद्विरेफलीलाक्षरमित्युवाच ॥ ६३ ॥
वशिष्टयुक्त्या यदि नाभविष्यदाजग्मिवानत्र भवान् कथञ्चित् ।
तदा त्वयाऽगादि ययेदमर्वाग् जिह्वां ध्रुवं तां निरकासयिष्यम् ॥ ६४ ॥
दन्तौ द्विपस्येव मणिं भुजङ्गस्येवैणशत्रोरिव केशरालिम् ।
श्रीशाहमानस्य धनं बलेन न जीवतः कश्चन लातुमीष्टे ॥ ६५ ॥
स्वर्णं गजा दन्तितुरङ्गमाणां पदे प्रदेया यदि खड्गघाताः ।
भवत्प्रभू सूकरमांसमेव सद्यः स्वदेतां यदि जातु यातः ॥ ६६ ॥
द्विषामपि स्वाच्छरणागतानां रक्षासु मन्दोऽपि निबद्धकक्षः ।
तन्मुद्गलान् नो ननु याचमानौ न किं त्वदीशौ जडधीवतंसौ ॥ ६७ ॥
शतांशमप्येकविशोपकस्य न प्राणमोक्षेऽपि ददे बलेन ।
यद् रोचते नाम भवत्प्रभुभ्यां तत् तूर्णमेवाचरतां यथेच्छम् ॥ ६८ ॥
एवं विनिर्भर्त्स्य मुहुर्मुहुस्तं वशिष्टपार्श्वं गलहस्तयित्वा ।
निष्कासयामास पुराद् भटानां त्रातुं च दुर्गं ददिवान् विभज्य ॥६९॥

---

1 K मुख्यान्यपि । 2 K पुराणि । 3 K यो विलसोत्यकाम् । 4 K स्मदुक्तप्रवराज्ञाप्रविलोपिजीव् । 5 P त्वयोगादि । 6 K स्वर्णंकृजा । 7 P तौ मन्दु ।

उत्तम्भितान्युन्नतधर्मममिच्छिदेऽधिशालं पटमण्डपानि ।
दिवानिशं संगरजागरूकभुजैर्विरेजुर्निभृतं भृतानि ॥ ७० ॥
वप्रोपक्लिप्तस्फुटलोहबन्धदृढोल्लसद्दिक्कुलियष्टिदम्भात् ।
शालोऽपि युद्धाय विवृद्धमन्युः संवर्मयामास भुजानिव स्वान् ॥७१॥
रालाविलं तैलमयःकटाहे तप्तं प्रकामोत्कलिकाच्छलेन ।
दग्धुं युयुत्सून् प्रतिपक्षपक्षानलक्ष्यतौत्सुक्यमिवादधानम् ॥ ७२ ॥
चेतश्चमत्कारिकलोत्सृतानि संचक्रिरे भैरवयन्त्रकाणि ।
व्यामोहहेतोः स्फुटमिन्द्रजालानीवागतानां शकपुङ्गवानाम् ॥ ७३ ॥
दूतः प्रभूतप्रतिघोऽथ गत्वा निजप्रभुभ्यामखिलं तदुक्तम् ।
न्यवेदयत् तावपि निर्विलम्बं युद्धाय सैन्यं प्रगुणं व्यधत्ताम् ॥ ७४ ॥
अत्रैव मध्ये पुरमाहवाय ससर्ज यान् यान् नृपतिः प्रयोगान् ।
तांस्तानमर्षात् कुलिशाङ्गभूवत् सद्यः शकेन्द्रोऽपि बहिस्ततान ॥७५॥
शकेशवाद्येषु भृशाहतेषु दण्डैः स्वना ये प्रकटीबभूवुः ।
प्रतिस्वनैस्तांस्तिरयन् गिरीन्द्रो न स्वामिभक्तव्रतमुज्झति स्म ॥ ७६ ॥
निषादिनो दन्तिवरांस्तुरङ्गानप्यश्ववारा रथिका रथांश्च ।
समन्ततोऽप्यारुरुहुः पदातिपूगा वितेनुः श्रममाहवाय ॥ ७७ ॥
महीभ्रमभ्रङ्कषमप्यमुं स्ववीर्याग्रतः क्षुद्रमिवेक्षमाणाः ।
ढुढौकिरे योद्धुमतिप्रवृद्धोत्साहास्ततस्ते समरोत्कवाहाः ॥ ७८ ॥
समं छुटद्भिर्भटपाणिपद्माद् बाणैस्तमिस्रं ककुभां बभूव ।
निर्घोषपूरैरपि कार्मुकाणां विश्वं समग्रं बधिरत्वमाप ॥ ७९ ॥
नीरन्ध्रमाकाशमनुज्झितेषु काण्डेषु कूर्मास्बुदताण्डवेषु ।
आग्नेयबाणा भृशमुत्पतन्त आकालिकीकेलिकिलीबभूवुः ॥ ८० ॥
आकर्षतां संदधतां रयेण विमुञ्चतां बाणगणान् भटानाम् ।
विलोकमानैरपि निर्निमेषमलक्षि नैवान्तरमम्बरस्थैः ॥ ८१ ॥
तपात्ययाम्भोदपटुच्छटावद्बहुर्गादवर्षन् सुभटाः शरौघान् ।
कौक्षेयदार्ढ्येण मृणालनालवच्चिच्छिदुस्तान् यवना जवेन ॥ ८२ ॥
मिथोऽपि वीरव्रजपाणिमुक्तपृषत्कवक्त्रास्फलनप्रभूताः ।
रेजुः पतन्तोऽग्निकणाः प्रदग्धुं पलायितानामिव कीर्तिवल्लीम् ॥ ८३ ॥
क्षत्रप्रकाण्डप्रविमुक्तकाण्डपक्षोद्भवः कोऽपि स वायुरासीत् ।
यत्रोन्मदिष्णौ रिपुदर्पसर्पोऽप्यासीत् क्षणं व्याकुलचित्तवृत्तिः ॥८४॥

---

1 K °च्छिदे विशालं । 2 K शकनायकानाम् । 3 P शकेषु° । 4 P पदा (ति?) पू° । 5 K श्रममायुधौघैः । 6 K कूतां । 7 K मेषैरलक्षि । 8 K शरौघैः ।

आकर्णमाकृष्य भटैर्विमुक्तैरधोमुखैरूर्ध्वमुखैश्च बाणैः ।
उत्पातहेतोर्ववृषुः शकानामधोमुखा ऊर्ध्वमुखाश्च मेघाः ॥ ८५ ॥
शिलीमुखैर्धैर्यवनप्रणुन्नैर्वप्रः समन्ताच्छुशुभे चिताङ्गः ।
विगाहमानो रिपुदर्पसर्पविनाशहेतोरिव जाहकत्वम् ॥ ८६ ॥
भ्रमं भ्रमं वीरवरैर्निजाङ्गोपरि प्रणुन्नाः प्रतिशत्रुवीरान् ।
कुन्ता विरेजुर्निशिताः पतन्तः स्फुटाः कटाक्षा इव भानुसूनोः ॥८७॥
सधाम्निकैर्भैरवयन्त्रगोला मुक्ता मिथोऽप्यूर्ध्वमधः पतन्तः ।
अपि द्वयानामरुचन् भटानां पीना उरोजा इव वीरलक्ष्म्याः ॥ ८८ ॥
दूरोन्नमट्टिङ्कुलिकाग्रहस्ताः शौर्यश्रियः क्षत्रकुलोद्भवानाम् ।
समुत्पतद्गोलकदम्बदम्भात् पञ्चेटकैः पर्यरमञ्चिताः ॥ ८९ ॥
प्रक्षिप्तरालाविलतप्ततैलसंगज्वलत्कुन्तलकैतवेन ।
क्षत्रेषु कोपाग्निरमानिवान्तः शङ्के शकानां बहिरुल्ललास ॥ ९० ॥
प्राकारभित्तेः खनने प्रवृत्तान् शकप्रवीरान् कुशटङ्कहस्तान् ।
विभिद्य शूलैर्वटकानिवोच्चैरुच्चिक्षिपुः क्षत्रकुलावतंसाः ॥ ९१ ॥
उत्प्लुत्य शाखामृगवद् गिरीन्द्रमारूढवन्तः किल केऽपि वीराः ।
प्रचख्निरे शालतलं प्रविश्य केचिद् वराहा इव तीव्रकोपात् ॥ ९२ ॥
दुर्गस्थवीरव्रजमौलिमौलीनपाहरन् बाणगणाः शकानाम् ।
समीरगुञ्जा इव पादपानां पुष्पाणि शाखाशिखरोद्भवानि ॥ ९३ ॥
अचाक्षुषत्वं प्रगतांस्तनुत्वाद् घटैकदेशीयभटप्रणुन्नान् ।
नालीकबाणान् प्रविभिन्नगात्रानवक् शकानां परिणाम एव ॥ ९४ ॥
उत्खाय शालस्य शिलां प्रविश्य तदन्तरे बाहुजघातभीताः ।
स्थिता विरेजुर्यवना दिवान्धा इवातपत्रापनरश्मिसन्नाः ॥ ९५ ॥
निजप्रहारव्रणजर्जराङ्गान् शकान् गिरेर्निष्पततो निरीक्ष्य ।
वीरा हसान् यान् व्यदधंस्त एव हम्मीरवीरस्य यशांस्यभूवन् ॥ ९६॥
श्रित्वा नगागान् गरुडासनेन हृष्टा निविष्टा यवनेशयोधाः ।
विद्धाः शरैर्वीरवरैस्तथैव चित्रं प्रयाता इव रेजुरुच्चैः ॥ ९७ ॥
निःश्रेणिमालम्ब्य धृतासवोऽन्ये दन्तैरथारोहणमाचरन्तः ।
दुर्गे हता मूर्धनि मुद्गरेण दुर्गस्थितैः पेतुरमातयैव ॥ ९८ ॥
इत्थं सदाऽप्यौपयिकैरनेकैः परिस्फुरद्धौकनसाहसस्य ।
अगाच्छकानां क्षयकालरात्रिरिव त्रिमासी यवनाधिपस्य ॥ ९९ ॥

---

1 K मुखैः पृषत्कैः । 2 K प्राप्य भ्रमिं । 3 P °कुलोद्भवस्य । 4 K कोपाः । 5 K बाणभीताः । 6 K इवातपत्रापन° । 7 K सधोऽन्ये । 8 K समुल्लसद्धौकन° ।

प्रवर्तमाने समरेऽन्यदाऽथापस्फाल गोलः शकगोलकेन ।
प्रकम्पयता तच्छकलेन मूर्ध्नि हतो व्यनेशन्निसुरत्तखानः ॥ १००॥

अथ गतं सहसाऽपि परासुताममुमवेक्ष्य परिस्रवदीक्षणः ।
अविदितः परिदेवनसेवनं भृशमसौ शकपोऽतत मध्यमः ॥ १०१ ॥

प्रक्षिप्यैनं तदनु सहसा मध्यमोऽसौ शकाना-
मीशः स्वर्णस्फुटजटनतामञ्जुमञ्जूषिकान्तः ।
ढिल्ल्यां धृत्वा कथमपि धृतिं प्राहिणोत् प्राभृतं वा
क्षौणीभर्तुः स्वसकलकथाज्ञापनापत्रपूर्वम् ॥ १०२ ॥

एतद् वीक्ष्यासशोकः श्रुतरिपुजनिताशेषतत्तन्निकारः
कृत्वा तस्यान्तकृत्यं निखिलमपि यथायुक्तिकोपप्रकम्पः ।
वेगादागादमुत्र स्वयमथ यवनैकावनोऽल्लावदीनो
वीरंमन्याः सहन्ते रिपुजनजनितं क्वापि किं वा निकारम् ॥१०३॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के *निसुरत्तखान*वधवर्णनो नामैकादशः सर्गः समाप्तः ॥

अथ द्वादशः सर्गः ।

*अल्लावदीन*नृपतिं समागतं[2] श्रुत्वाऽथ जैत्रिरवनीवनीघनः ।
दुर्गोपरि प्रतिपदं मंदादसौ[3] शूर्पाण्यबीवधदुदारधीधनः ॥ १ ॥

दृष्ट्वा तदद्भुतमसौ शकेश्वरो विस्मेरविस्मयविकासिलोचनः ।
पप्रच्छ पाणितलचालसंज्ञयेत्येतत् किमङ्ग ! वरुणोपरिस्थितान्[4] ॥ २ ॥

श्रुत्वाऽदसीयभणितिं *हमीर* राट् हर्षप्रकर्षमतिमानमुद्वहन्[5] ।
प्रोदञ्चय वक्त्रकमलं हसन् मनाक् प्रोवाच वाचमिति तं शकाधिपम् ॥ ३ ॥

म्लेच्छावनीदयित ! चारु चारु भो ! चक्रे त्वयाऽऽगमदमुत्र यद् भवान् ।
पूर्णोऽसि प्रचुरवस्तुसंचयैर्भाराय किं भवति शूर्पसंचयः ॥ ४ ॥

उक्तिं निशम्य स इमां शकाधिपो राज्ञोदितां समुचितामदोऽवदत् ।
तुष्टस्तवोपरि *हमीर* भूपते ! याचस्व वाञ्छितमतुच्छविक्रम[6] ! ॥ ५ ॥

क्षत्रोत्तमोऽथ निजगाद यद्यदस्तर्हि प्रयच्छ समरं दिनद्वयीम् ।
आयोधनादपरमत्र दोष्मतां नो वाञ्छितं किमपि वल्गु वल्गति ॥६॥

---

1 K प्रकम्प्रः । 2 P तमागतं । 3 K पद्मादसौ । 4 K वरुणो° । 5 K मत्यहद् ।
6 K विक्रमः ।

तद्वचःश्रवणतः प्रकोपमः क्षात्रजते स्तुतिमुखो मुहुर्मुहुः ।
प्रातस्तदेव भवितेति भावुकः स्वायासमासददसादमानसः ॥ ७ ॥
प्रातर्भविष्यति कदेति[1] सत्वरं निध्यायतामथ[2] रणाय दोष्मताम् ।
भास्वान् प्रियार्थमिव पूर्वपर्वतस्योत्संगसंगसुभगं वपुर्दधौ ॥ ८ ॥
लक्ष्मीभराभिरमणीयतागुणं धर्तुं तदा प्रबलतामुपागमन् ।
पाथोरुहाणि सलिलाशयोदरे सैन्योदरे च सुभटाननेन्दवः ॥ ९ ॥
दोषोदयस्फुरितमूर्त्तिविद्विषद्ध्वान्तप्रजोर्जिततिरश्चिकीर्षया ।
सूरप्रकाश उपमानमानभित् प्रादुर्बभूव गगने बलेऽपि च ॥ १० ॥
व्युष्टोचितामुपचितां[3] बलिक्रियां युक्त्या वितत्य स ततः क्षितीश्वरः ।
संग्रामसंगमविनोदहेतवे सैन्यान् रयेण समनीनहत्तमाम् ॥ ११ ॥
अल्पेतरद्युतिविकल्पिताहवाः कल्पप्ररूढरुचिराङ्करोचिषः ।
षट्त्रिंशदायुधभृतो धृतोदया वीरा विनिर्ययुरजीर्यविक्रमाः ॥ १२ ॥
शृङ्गारतः समरसंभवो रसो नूनं विशेषमधुरत्वमञ्चति ।
हित्वा प्रियाङ्कपरिरम्भणादरं वीरा रणाय यदमी प्रतस्थिरे ॥ १३ ॥
संग्रामसंगमविनोदहेतवे स्फातिं गतानि नितमां महीयसीम् ।
अङ्गानि वीरनिकरस्य नो तदा मान्ति स्म वर्मसु सुविस्तृतेष्वपि ॥१४॥
कश्चिद् विलोक्य कबरीं भियो[4]द्भ्रमत्सारङ्गशावकदृशः प्रकम्पिनीम् ।
ध्यानाध्वगीकृतरणाङ्गणोल्लसत्खड्गश्चचाल करवालमुद्वहन्[5] ॥ १५ ॥
अङ्गे लगन्त इषवः किमङ्गनाकाक्षाः किमङ्ग! नितमां प्रियङ्कराः ।
एतद्विवेचनविधानकौतुकी कश्चिन्महीरणमहीमभूषयत् ॥ १६ ॥
पूर्वं त्वदेकहृदयामरालयं गच्छाम्यहं ज्वलनवर्त्मनाऽमुना ।
किं वा मदेकहृदयोऽसि वर्त्मना त्वं काऽप्यवोचदिति सस्मितं हितम् ॥१७॥
संभाव्य वैरिकरिणां रणाङ्गणे कुम्भान् मम स्तनधियाऽतिकामुक! ।
मा भूरनङ्गरससंगकौतुकीत्येकं जगाद सुमुखी हसोन्मुखी ॥ १८ ॥
प्रेयांस्त[6]वास्मि यदि वल्लभा ततः स्वोत्खातदन्तिरदजातकङ्कणैः ।
पाणी विभूषय ममाद्य कश्चिदित्यूचे प्रियारचितसाचिलोचना ॥ १९ ॥
स्नेहातिरेक[7]वशतः स्वपाणिना माताऽभिमौलितिलकं यदाऽकरोत्[8] ।
शौर्यात् तदेव कवचाधिकं विदन् कश्चिच्चचाल किल वीरशेखरः॥२०॥
कृत्वा करे दलितखड्गमुद्धतं तात! प्रहन्तुमरिवीरकुञ्जरान् ।
एष्यामि नन्वहमपीति भावुकं कश्चिच्चचाल तनयं हसन् मुहुः[9] ॥ २१ ॥

---

1 K कदाऽथ । 2 K तामिति । 3 P "°मुपचितां' इति पाठशुद्धिः । 4 K भयो° ।
5 K मावहन् । 6 K प्रेयंस । 7 K प्रेमातिरेक° । 8 K यदाऽतनोत् । 9 K [illegible]

पुत्राद्य संगरमवाप्य सत्वरं विस्तारयेर्भुजपराक्रमं तथा ।
वीरप्रसूतिलकतां यथा श्रये कश्चिज्जगाद जननी प्रमोदिनी ॥ २२ ॥
मेदस्विवीररससंगसम्भवद्रोमोद्गमत्रुटितवर्म्मसंहतिः ।
मूर्त्तो भयानकरसः स्फुरन्निवाचालीत् परोऽक्रणितदारुणेक्षणः ॥ २३ ॥
विद्वेषिवीरजनमानदारणो मा भूत् प्रवृत्त ऋत एव मारणः ।
सम्भावयन्निति निशम्य काहलां प्रायात् परः समरजित्वरत्वरः ॥२४॥
गृध्रं भ्रमन्तमुपरीत्यवक् परः संवर्म्मयत्नयमिह प्रतीक्ष्यताम् ।
मूर्ध्नीतरस्य यदि वाऽऽत्मनस्तनौ श्रद्धां तनोमि फलिनीं तत्राधुना ॥२५॥
स्याज्जीवतो युधि यशो मृतस्य तु स्फीतं च तच्च सुरवल्लभा अपि ।
इत्यस्य वीरनिकरस्य निर्यतो जज्ञे न दुःशकुनमध्वनि क्वचित् ॥२६॥
कुम्भान् निधाय शिरसि प्रपूरितान् एलालवङ्गरसशीतलैर्जलैः ।
श्रीत्याऽनुयातुमसुवल्लभान् निजान् सज्जीबभूव निखिलो भटीजनः ॥ २७ ॥
*अल्लावदीन*विभुरप्यथोद्भटद्विड्प्रोन्मिमन्थिषुतयाऽकुलाशयः ।
संनह्य सैन्यमनुजादिभिर्वृतः स्थाने प्रतिश्रुतमशिश्रियन्मिथः ॥ २८ ॥
अन्योऽन्यवीक्षणवशोल्लसन्महाकोपप्ररूढमहिमप्रसृत्वराः[2] ।
वीरा रवाः प्रतिरवैक्ष्णादिभिर्[3]योगैर्द्विरुक्तिमिव धातवो ययुः ॥ २९ ॥
अभ्रङ्कषोल्लसितचारुचामरे कुक्षिम्भरिद्विरदबृंहिते दिशाम् ।
प्रस्पर्धयेव दधतुः परस्परं सैन्ये इमे श्रियमिहाधिकाधिकाम् ॥ ३० ॥
पुष्णन्त्यरं विनिमयेन संगरोत्साहं हृदि प्रधनकारिणां नृणाम् ।
तूर्याणि[5] पूरितहरीन्ति निःस्वनैः सैन्यद्वयेऽपि नितरा[6]मराणिषुः ॥ ३१ ॥
भङ्क्तुं विपक्षकरिकुम्भघर्षणैः कण्डूलतां स्वभुजदण्डयोरथ ।
चेलुर्भटा अपि बलद्वयाद् रणोत्साहत्रुटत्त्रुटदशेषकङ्कटाः ॥ ३२ ॥
पत्तिः पदातिकमियाय सादिनं सादी रथस्थितमहो महारथी ।
मातङ्गयानगमनो निषादिनं द्वन्द्वाहवोऽजनि तदेति दोष्मताम् ॥३३॥
ऊर्ध्वीभवन्त उरुविक्रमैः शिरस्त्राणानि वीरनिकरस्य मूर्धजाः ।
स्मोच्छ्वासयन्ति[7] घनकालसंभवा भूस्फोटका इव महीप्रदेशकान् ॥ ३४ ॥
अन्योऽन्यजातहठतो गतान्तरं मुक्तैः पृषत्कनिवहै रणाङ्गणे ।
पाणिग्रहाय विजयश्रियो भटा यत्नेन मण्डपमिव व्यरीरचन् ॥ ३५ ॥
कोदण्डचण्डरुचिमण्डलादतो दीप्राः क्षुरप्रकिरणाः प्रपातिनः ।
प्रत्यर्थिवीरतिमिराणि वेगतोऽप्यानिन्यिरे युधि कथावशेषताम् ॥३६॥

---

1 K तवाविशत् । 2 °सृत्वरैः । 3 P "°णा°" इति पाठस्त्रुटितः । 4 P °काधिकम् ।
5 K सूर्याणि । 6 K नितमा° । 7 P स्मोत्स्वास° ।

मत्पावनोऽद्य समरे तनुत्यजां भावी समागम इति प्रमोदतः ।
स्पष्टान्तरभ्रमदिषुव्रजच्छलाद् रोमाञ्चिताङ्गमिव दिद्युते नभः ॥ ३७ ॥
वीरैः प्रकाममभिमुक्तपत्रिणां नीरन्ध्रमम्बरतले प्रसर्प्पताम् ।
अन्तःप्रकर्त्तनभयादिव क्षमः क्षेप्तुं न तीव्रकिरणोऽप्यभूत् करान् ॥ ३८ ॥
वीरव्रतस्य ददतोऽङ्कपालिकां मा स्मान्तरायमिह कार्षुरेतके ।
सान्द्रेऽपि बाणनिवहे निपेतुषि स्फारान् स्फरानिति न केऽप्यलासिषुः ॥ ३९ ॥
वायुं विजित्य तरसा पतत्स्विह श्वासैः पुरैव चलितं विरोधिनाम् ।
भित्त्वा तदङ्गमनवेक्ष्य तानि वैतत्पृष्ठ एव चलितं शरैरपि ॥ ४० ॥
पार्श्वद्वयस्थकरिदन्तभासुरस्तत्कुम्भपीठविलुठत्कराम्बुजः ।
शौर्यश्रियो भुजलतास्तनद्वयीसंस्पर्शसौख्यमितरोऽन्वभूत्समाम् ॥४१॥
प्रोतोऽरिणा सह शरेण वाजिनः पृष्ठे न शल्यभृदसन्निवेशनात् ।
संप्राप्तवानपि परासुतां परो नाश्वात् पपात युधि जीववानिव ॥ ४२ ॥
आरोढुमन्यसुभटे प्रलम्बितैकाङ्घ्रौ रदस्थितपराङ्घ्रिभासुरे ।
क्रोधाद् भ्रमन् करिवरो रणाङ्गणे शुण्डाद्वयीं दधदिव व्यभाव्यत॥४३॥
द्वैधीकृते शिरसि पाणिना धृते चोर्ध्वं निहन्तुमहितस्य चिन्तयन् ।
संधागतेऽन्यशरशल्यतः परो हृष्यन्नधावत नियोद्धुमुद्धतः ॥ ४४ ॥
ऊर्ध्वं विदारितमरातिना शिरो भ्रश्यन्नियोजितमपि द्विधाऽप्यधः ।
स्वेनैव भिन्नजठरादुपाददैरन्त्रैर्निबध्य युयुधे पुनर्भटः ॥ ४५ ॥
विस्मेरमारचरितां विकञ्चुकां स्नेहाधिकां विशदकान्तिधारिणीम् ।
छित्त्वा करं प्रतिभटस्य कोऽप्यलात् तद्वल्लभामिव कृपाणवल्लरीम्॥४६॥
आक्रम्य पादमुरुणैकमङ्घ्रिणा धृत्वा करेण च परं महाग्रहात् ।
लोकद्वयीमयमसाधयद् युधीत्याख्यन्निव द्विरकृतेतरं करी ॥ ४७ ॥
याभ्यामहारि मम वल्लभास्तनश्रीस्ताविमाविति परोऽत्यमर्षणः ।
कुम्भौ गजस्य समरे विदारयन्नाधोरणप्रहृतिमप्यजीगणत् ॥ ४८ ॥
अन्योऽन्यदत्तकरवालवल्लरीप्रौढप्रहारपरिभिन्नहृत्तया ।
कौचिद् गतौ युधि भटौ परासुतामालिङ्गिताविव मिथोऽपि रेजतुः॥४९॥
सद्वंशजोपनतकोटिभूषणा संलीनसायकसमुल्लसद्गुणा ।
दृष्ट्वा परस्य समरे धनुर्लता वेश्येव कम्पमतनिष्ट कस्य न ॥ ५० ॥
कस्याप्यसिर्द्विरदकुम्भमण्डलात् पीत्वा भृशं समितिशोणितासवम् ।
उन्मत्ततां गत इवाशु विद्विषां वक्षःस्थलीमभिनिपेतिवान् मुहुः ॥५१॥

---

1 K भिया द्विषाम् । 2 K °कांह्रौ । 3 K °पराङ्घ्रि° । 4 K °रानै° । 5 K [illegible]-भिकां । 6 K परासुतां भटावालि° ।

कूर्मोऽब्जजन्मनि पदद्वयेऽरिणा दन्तावलस्य पततः क्षितौ किल ।
उत्तम्भनाय निजमेव दन्तयोर्युग्मं बभूव किमिवान्यदीदृशम् ॥ ५२ ॥
प्रत्यर्थिमुक्तशरभिन्नपुष्करो लेभे न घातसमयेऽपि तां किल ।
अग्रे स्फुरन्तमपहर्त्तुमक्षमो लेभेऽत्र यां प्रतिभटं करी व्यथाम् ॥ ५३ ॥
दत्त्वा प्रहारमतिलाघवात् पुरः पृष्ठं श्रयत्यसकृदुद्भटे भटे ।
क्रुद्धो भ्रमन् समितितज्जिघृक्षया वात्या विनोदमभजत् परो गजः ॥ ५४ ॥
भित्त्वाऽखिलाङ्गमपि भूजुषेषुणा हत्वा करेणुमितरोऽभिपातुकम् ।
वर्त्मेव हंसगमनाय तेनिवान् क्रौञ्चं पराशरसुतो गिरिं यथा ॥ ५५ ॥
कस्यापि कुण्डलितचापमण्डलान्तर्वर्तिं वक्त्रकमलं बभौतमाम् ।
प्रत्यर्थिषु प्रबलबाणवृष्टये बिम्बं स्फुरत्परिधिशीतगोरिव ॥ ५६ ॥
द्वैधीकृतस्य सुभटस्य कस्यचित् सव्येतरार्धमवलोक्य वर्ष्मणः ।
लब्धोऽद्य शम्भुरुमया विनेत्यधावन्तामरेशदयितो दिशो दिशः ॥५७॥
जज्ञे तदा रणभृतां च रक्षसां यज्ञे महाहठभरः परस्परम् ।
यक्षे प्रथीयसितरामसृग्नदीं चक्रुः पराणि पपुरेव तत्क्षणात् ॥ ५८ ॥
निःसंख्यसंख्यविवरातिथीभवद्वीरातिथेयकरणैरिवातुरे ।
द्वीपान्तरं व्रजति तिग्मदीधितौ सैन्ये उभे अपि ततो विरेमतुः ॥५९॥

—इति प्रथमदिनम् ।

द्वितीयदिनयुद्धम्—

स्वप्नप्रसंगसमरैरनेकधा रात्रिं व्यतीत्य सुभटाः कथञ्चन ।
प्रातः पुनर्निजाधिपाज्ञया संग्रामसीमनि मनो व्यनोदयन् ॥ ६० ॥
सन्नद्धयोरथ च सैन्ययोर्द्वयोरानद्धहेममयकङ्कटैर्भटैः ।
स्वास्मिंस्तदा समरभूरपि स्फुटां प्राचीव काञ्चनरुचं दधौतमाम् ॥ ६१ ॥
मूर्च्छामितोऽपि किल कोऽपि विद्विषत्खड्गप्रहारवशतो रणाङ्गणे ।
तं लातुमागतसुरीकरामृतस्पर्शाद् विबुध्य युयुधे भृशं पुनः ॥ ६२ ॥
उत्प्लुत्य वीरकलशेन कोपिना मुक्तेन हस्तिपककुम्भभूमिदा ।
कुन्तेन भिन्न इतरः करी बभावालानलम्बित इवाहवाङ्गणे ॥ ६३ ॥
लग्नप्रतीभदर्शनद्वयीतया संरूढसिन्धुमितदन्तभासुरः ।
स्तम्बेरमो रणभुवीतरो भ्रमन्नैरावणेन सुलभां दधौ विभाम् ॥ ६४ ॥

---

1 K °दीदृशाम् । 2 P °मक्षमा । 3 P लेभे त्रपां । 4 K क्रोधावृन्न° । 5 K परासुर° । 6 K यम्ये । 7 P महाहटभरः । 8 P नःसंख्य° । 9 P कण्टकैर्भटैः । 10 P स्फुटं । 11 K मूर्च्छां सतो । 12 P °मरीकरामृतैः सिक्तः प्रबुध्य । 13 K रदचतुष्टयी° । 14 K °नैरावतो न ।

छन्नारिबाणगणलग्नवक्रणश्रेणिप्रमत्तकरिकुम्भमण्डलात् ।
धारा निपेतुरसृजो मदस्य च स्पर्धां दधत्य इतरेतरामिव ॥ ६५ ॥
कस्याप्युदग्रतरवारिदारितादन्त्राणि रेजुरुदरात् पतन्त्यधः ।
आदातुमेकपदमेव तं दिवः क्षिप्ताः सुरीभिरिव पाशपङ्क्तयः ॥ ६६ ॥
क्रुद्धे प्रधावति रणाय सिन्धुरे वाहानुपर्युपरि वीक्ष्य पातिनः ।
देवैरहासि यदहो तदेव तन्मौलौ बभूव सुमवृष्टिरुत्कटा ॥ ६७ ॥
उत्पाट्य बाहुमभिसन्निवेशात् कुन्तव्रणोच्छलितशोणितच्छटाः ।
वीरश्रियेव नवकुङ्कुमच्छटा दत्ता भटोरुषु विरेजिरेतमाम् ॥ ६८ ॥
स्वारोढुरुन्नततरान् निषादिनो हन्तुं सुखेन वितरन् प्रवीणताम् ।
श्रीवृक्षकी हयवरो रणाङ्गणे स्वामुन्नतिं प्रविदधौ फलेग्रहिम् ॥ ६९ ॥
उत्प्लुत्य भूत इभकुम्भमाश्रितः स्वोजोर्जिताद्भुतयशःसितद्युतिः ।
मेरुत्ययाश्च इव तुङ्गभूभृतः शृङ्गाग्रलीन इतरो व्यराजत ॥ ७० ॥
संग्रामभूपतितवीरमर्दनात् पादान्तलग्नलसदन्त्रकैतवात् ।
क्रीडन् परः समरपल्वले करी सेवालजालमिव बिभ्रदाबभौ ॥ ७१ ॥
एकः करी समरसीम्नि सादिनं चिक्षेप कन्दुकमिवाधिपुष्करम् ।
धृत्वा करेण च कटौ परो हयं प्रास्फालयद् रजकवस्त्रवद् भुवि ॥७२॥
धाराप्रपातकृतलोककौतुकस्तेजोवितानविलसच्छतह्रदः ।
कस्याप्यसिर्युधि पयोधरायितो युक्तं द्विषामजनि हंसनाशकृत् ॥७३॥
कस्याप्यपाकृतगुणोऽत्र मार्गणो लक्षाय धावति तदा स धावतु ।
कोटिद्वये सति ननाम यद्धनुः सद्वंशजस्य न तदस्य सांप्रतम् ॥ ७४ ॥
ज्योतिर्मयीभिरिह मूर्त्तिभी रणे व्याप्तेऽभितोऽपि गगने समित्कृताम् ।
नालक्षि दैवतगणैरपि क्षणं व्यक्तं सहस्रकिरणस्य मण्डलम् ॥ ७५ ॥
क्रोधारुणेक्षणरुचीचयाचितं कस्यापि कृष्टमरुचद् धनू रणे ।
कुण्डं हविर्भुज इव स्फुरज्जयश्रीकृष्टये रिपुपशून् जुहूषतः ॥ ७६ ॥
क्रोधप्रधावितरथाङ्घ्रिमर्दनात् त्रुट्यत्करङ्कसविकाशशब्दितैः ।
जीवत्यहो मयि कथं भ्रमन्त्यमी इत्यन्वशेत पतितः किलेतरः ॥७७॥
कुर्वद्भिरन्विह रणे पलायितान् धावद्रथस्खलनतां पदे पदे ।
वीरैर्जहे न बिरुदं पलायितप्राकार इत्यनुगतं मृतैरपि ॥ ७८ ॥
सङ्ग्रामसङ्गमविनोदिवारणप्रोत्क्षिप्तवीरवृतिलोलचेतसाम् ।
स्वर्योषितामपि तदा परस्परामाविर्जभूव दिवि दारुणो रणः ॥ ७९ ॥

---

1 P प्रधावणाय । 2 P मेचाद् प्रयोऽत्र° । 3 P °गुणोऽत्रमार्गणो । 4 K °रथाङ्घ्रि-मर्दनत्रुट्य ।

प्रागेव मा स्म सुरवल्लभा अमुं वृण्वन्निति स्फुरितवेगविस्तराः ।
आलिङ्ग्य वल्लभमपासुमप्युरस्तन्व्यश्रितां[1] प्रविविशुर्भुजाभृताम् ॥८०॥

छत्रैः सिताम्बुजमयीव कुत्रचित् कुत्रापि पल्लवमयीव[3] पाणिभिः ।
कुत्रापि शैवलमयीव[2] कुन्तलैर्भ्रष्टैर्बभौ रणभृतां रणावनिः ॥ ८१ ॥

शस्त्रप्रहारभृशजातमूर्च्छया स्वारोहकेषु पतितेषु भूतले ।
हेषारवैः समितिजातगौरवैर्दुःखाद् विलापमिव वाजिनो व्यधुः ॥८२॥

द्विट्कुम्भिकुम्भ[4]विनिपातिमौक्तिकश्रेणिप्ररूढरुचिराजिभूरभात् ।
वीरश्रियं प्रपरिरभ्य दोष्मतां शय्येव पुष्प[5]खचिता सुषुप्सताम् ॥८३॥

वीरैर्निहत्य विनिपातिता रणक्षोण्यौ[6] बभुः करिवराः पदे पदे ।
सेतोः कृते हनुमतेव चालिताः शैला इवार्धपथ उज्झिता भरात् ॥८४॥

जग्मुर्मृतिं दशशतानि भटा इहेति जल्पन्निवाततकरद्वितयाङ्गुलिभिः ।
नृत्य[7]क्रियामभजतैकतरः प्रवीरः कावन्धिकीमहितवीरविलूनमौलिः ॥ ८५ ॥

इति तिरस्कृतभारतसारते रणभरे स्फुरिते दिनद्वयीम् ।
दिनकरः प्रतिवक्तुमिवावधिं चरमभूमिधराग्रमसेवत ॥ ८६ ॥

शौर्येण प्रतिपक्षपक्षहृदयं स्वस्वामिभक्तव्रते-
श्चेतांसि स्वविभोरसिप्रहृतिभिर्द्विट्कुम्भिकुम्भानपि ।
अङ्गैरङ्गणमाहवस्य विलसत्कीर्त्या च लोकत्रयीं
वीरा व्यानशिरेऽत्र योद्धृविसरश्रेयस्करे संगरे ॥ ८७ ॥

एतस्मिन् समरे वीरा यवनानां महौजसः ।
पञ्चाशीतिसहस्राणि यमावासमयासिषुः ॥ ८८ ॥

म्लेच्छानामथ दोष्मतामधीशितारावादत्तावधिकालपालनासचित्तौ ।
वीरेन्द्रान् कथमप्यमून् निवार्य युद्धाद् भेजाते शिबिरं निजं निजं रयेण ॥८९॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के दिनद्वयसंग्रामवर्णनो नाम द्वादशः सर्गः समाप्तः ॥

---

1 K स्तन्यश्रितां । 2 K शैवलमयीव कुन्तलैः । 3 K पल्लवमयीव पाणिभिः । 4 K कुम्भतटपा° । 5 K पुष्परचिता । 6 K रणे क्षोणौ । 7 K नृत्त° । 8 K स्वःश्रीकरे । 9 K °वारूढावधि° । 10 K °मध्यभूध्रिवर्त्य ।

अथ त्रयोदशः सर्गः ।

अन्यदाऽथ क्षमानाथः स्फारशृङ्गारभासुरः ।
अलञ्चकार शृङ्गारचातुरीं चतुराशयः ॥ १ ॥
निरीक्ष्य सहसा यत्राम्भोभ्रान्त्या स्फाटिकीः शिलाः ।
वस्त्राण्युत्संवृणोति स्म प्रकृत्य न भयान्न कः ॥ २ ॥
रम्भा ग्रावोद्भवा यत्र वीक्ष्य साक्षाज्जनं स्मरन् ।
फलेभ्यः स्पृहयन्नुच्चैर्नैकशः करमक्षिपत् ॥ ३ ॥
यत्र स्तम्भेष्वराजन्त विचित्राः शालभञ्जिकाः ।
देव्यो नृदेवमालोक्य तद्गुणैः स्तम्भिता इव ॥ ४ ॥
यत्रोत्कृत्तेषु पद्मेषु सिस्वादयिषवो मधु ।
भृङ्गा निपत्य व्यर्थत्वाद् ह्रियेव शितितामगुः ॥ ५ ॥
यत्र स्फाटिकपाञ्चाल्यास्येष्[4]वब्जाध्याश्रितालिषु ।
चकोराः शशभृद्वीक्षा[5]श्रद्धामह्नयप्यपूपुरन् ॥ ६ ॥
यत्कुट्टिमे पदप्रान्तारुणिमप्रतिबिम्बनात् ।
रक्तं क्षौममिवास्तीर्णं पदन्यासाय भूभृतः ॥ ७ ॥
स्फारकर्पूरपारीकं चन्दनक्षोदमेदुरम् ।
मृगनाभिस्फुरन्नाभि यदङ्गणमराजत ॥ ८ ॥
नृपोरःस्थेन्द्रनीला[6]श्मदाम यत्स्फटिकाश्मसु ।
निरीक्ष्य बिम्बितं सर्पभ्रान्त्या लोका[7]श्चकम्पिरे ॥ ९ ॥
अधोनिबद्धभूभागप्रतिबिम्बिततामिषात् ।
भोगीन्द्राणामपि सभां विजेतुं प्रस्थितेव या ॥ १० ॥
*वीरमो*ऽभान्नृपात् तत्र दक्षिणे चारुलक्षणः ।
हासं हासं सृजन् गोष्ठीं *रतिपालो* रतिं दधौ ॥ ११ ॥
परीतो *महिमासाहि*स्त्रिभिरप्यनुजन्मभिः ।
व्यक्ततामभजत् तत्र परमात्मा गुणैरिव ॥ १२ ॥
मार्दङ्गिका मृदङ्गानि वीणामपि च वैणिकाः ।
अपि वैणविका वेणुं यथातालमवीवदन् ॥ १३ ॥
रणद्रेणुझण[8]त्कारानुकारिप्रसरत्स्वराः ।
गायना वीर*हम्मीर*कीर्तिस्फूर्त्तिमगासिषुः ॥ १४ ॥

---

1 P चतुरीं । 2 P उत्संवभार वस्त्राणि प्रकम्पनभयानकः । 3 K °मरन्दास्वा-दनेच्छया । 4 K °ब्जजाध्याश्रिता । 5 K वीक्ष्याप्रीतिमह्नयप्य° । 6 K °नीलाश्म° । 7 K के न चकम्पिरे । 8 K °कारनिकारि ।

मिथोऽपि स्पर्धया वर्धमानत्वादिव संयते ।
दृढं चोलान्तरीयाभ्यां स्तनश्रोणी प्रबिभ्रती ॥ १५ ॥
वपुर्वल्लिविलासेन मूर्च्छयन्तीव कामिनः ।
कूणिताक्षप्रपातेनोज्जीवयन्तीव मन्मथम् ॥ १६ ॥
प्रविश्य तत्र सभ्यानां मनसीव प्रमोदिनी ।
प्रवृत्ता नर्त्तितुं धारादेवी सोत्पश्य नर्तकी ॥ १७ ॥

त्रिभिर्विशेषकम् ।

तस्या लास्येन वेल्लन्तो रेजिरे पाणिपल्लवाः ।
मोहनव्रततेः कामं स्फुरन्तः पल्लवा इव ॥ १८ ॥
गोलकत्रितयोच्छालच्छलेन भुवनत्रयीम् ।
सा जगादेव लोकानां कृतां स्ववशवशायिनीम् ॥ १९ ॥
अङ्गुल्यग्रभ्रमच्चक्रदम्भेन युवतीजने ।
रूपलावण्यसौन्दर्यैः सा दधौ चक्रितामिव ॥ २० ॥
कर्णोपान्तभ्रमच्चक्रव्याजात् स्माहेव तां शशी ।
ममोपमा तवास्यस्य भ्रम एव विपश्चिताम् ॥ २१ ॥
कर्पूरपरि(र)माणूनां व्याजालग्नानि पादयोः ।
भ्रमिभिर्भ्रामयन्तीव रेजे यूनां मनांसि सा ॥ २२ ॥
मयूरासनबन्धेन नृत्यन्ती विलुलोप सा ।
वाच्यं विधेर्मयूरस्य दुःक्रमाधानसंभवम् ॥ २३ ॥
अङ्गहारतया हारलता तस्याः स्तनाग्रतः ।
रराज बिसवल्लीव चक्रचञ्चग्रसंस्थिता ॥ २४ ॥
लास्येन धनुषीवास्याः पश्चाद् वपुषि सन्नते ।
पार्ष्णिसंस्पर्शिनी वेणिर्जीवाभावमजीजिवत् ॥ २५ ॥
सभ्यानामसकृत् तस्यां दृष्टिरापादमस्तकम् ।
चक्रेऽवरोहमारोहं व्रतत्यां वानरी यथा ॥ २६ ॥
ताण्डवं निर्मिमाणेति सा तालत्रुटनक्षणे ।
अधःस्थाय शकेन्द्राय पश्चाद् भागमदीदृशत् ॥ २७ ॥
शकेशस्तेन दूनात्मा सभाध्यक्षमदोऽवदत् ।
धनुर्धरः स कोऽप्यस्ति वेध्यमेनां तनोति यः ॥ २८ ॥
अवदत् सोदरो राजन् ! गुप्तौ क्षिप्तोऽस्ति यः पुरा ।
उड्डानसिंहस्तं हित्वा नान्येनात्र प्रभूयते ॥ २९ ॥

1 K अपवादं विभेसत्य । 2 K किल ।

सद्यः शकेशोऽथानाय्य भङ्क्त्वा निगडसंचयम् ।
द्विधाऽपि स्नेहदानेन तं सज्जाङ्गमचीकरत् ॥ ३० ॥
ततः स सज्जीभूताङ्गोऽनन्यसाधारणं धनुः ।
आदायाहाय तां पापो विव्याध व्याधवन्मृगीम् ॥ ३१ ॥
मूर्च्छामतुच्छामृच्छन्ती बाणघातेन तेन सा ।
उपत्यकायां न्यपतद् दिवो विद्युदिव च्युता ॥ ३२ ॥
नृपादयस्ततो लोकाः क्षणं वैलक्ष्यलक्षिताः ।
धानुष्कतां स्तुवन्तोऽस्य मूर्धानं दुधुवुर्मुहुः ॥ ३३ ॥
तन्मर्म *महिमासाहि*र्बिभ्रद् हृदि परेदिवि ।
शकेशं वेध्यतां नीत्वा *हम्मीर*मिदमब्रवीत् ॥ ३४ ॥
यथादिशति भूनाथो मामिदानीं तदा रिपुम् ।
शरसात् तरसा कुर्वे राधामिव धनञ्जयः ॥ ३५ ॥
नृपो वक्ति हतेऽत्रामा रंस्येऽहं केन संगरे ।
हित्वा तं *महिमासाहे!* जज्जानं धनुर्धरम् ॥ ३६ ॥
शकेशवेध्येऽनासाद्यादेशं दूनमनास्ततः ।
हत्वा तं *महिमासाहि*र्धिगित्यौज्झद् धनुः करात् ॥ ३७ ॥
चकितस्तद्विनाशेन सद्यः सोऽपि शकेश्वरः ।
त्यक्त्वा सरः पुरोभागं तत्पृष्ठे शिबिरं न्यधात् ॥ ३८ ॥
ढौकनानि ततोऽभ्येत्य दायं दायमनेकधा ।
खिन्नोऽसौ दापयामास सुरङ्गां समया गिरिम् ॥ ३९ ॥
उपलैर्मृत्तिकापूरैर्दलिकैस्तृणपूलकैः ।
परिखां पूरयामास सोदरश्चान्यदेशतः ॥ ४० ॥
कियद्भिरप्यथो मासैः सिद्धेऽत्रौपयिकद्वये ।
शका डुढौकिरे योद्धुमादिष्टाः शकभूभुजा ॥ ४१ ॥
विज्ञाय *चाहमाना*स्तत्परिखां वह्निगोलकैः ।
अदहन् जतुतैलं च सुरङ्गायां प्रचिक्षिपुः ॥ ४२ ॥
तेन तैलेन पूर्णायां सुरङ्गायां द्विषद्भटाः ।
उदच्छलन् यथा मीनाः सरस्यां ज्वलदम्भसि ॥ ४३ ॥
चीत्कारान् मुमुचुः केऽपि कण्ठस्थैर्भापिता भटैः ।
यष्टिलोष्टकरैर्डिम्भैरिव श्वानोऽन्धुमध्यगाः ॥ ४४ ॥

1 K धूत्वाङ्घ्रः । 2 K नत्वा हम्मीरमब्रवीत् । 3 P धारामिव । 4 K छित्वा तदेनं जगत्यासौ जयधारशिरोहरः । 5 K °मनेकशः । 6 K चीत्कारानमुचन् । 7 K यष्टिलेष्टु° ।

तत्तैलदग्धसर्वाङ्गा बभूवुर्द्विषतां भटाः ।
क्षणारुणक्रमश्यामतप्तायोगोलसन्निभाः ॥ ४५ ॥
ज्वलदङ्गसमुद्भूतोच्छलत्कीलावलिच्छलात् ।
तेजांस्यपि शकाङ्गेभ्यो नेशुर्दाहभयादिव ॥ ४६ ॥
शकाधीशः शकैरेतां सुरङ्गां यैरचीखनत् ।
अपूपुरन् द्राग् दोष्मन्तस्तेषामेव कलेवरैः ॥ ४७ ॥
इत्थं दुर्गजिघृक्षायै यान् यान् यत्नान् शकेश्वरः ।
असृजत् सततं तांस्तानवकेश्यकरोन्नृपः ॥ ४८ ॥
ततो दुर्गं शकेन्द्रोऽसौ हातुमादातुमक्षमः ।
दिने दिनेऽप्यवासीदहुरगो गिरिकामिव ॥ ४९ ॥
दिवानिशं स योगीवाशेषसौख्यपराङ्मुखः ।
दृष्टिमेकां ददौ दुर्गे परां च क्षितिमण्डले ॥ ५० ॥
दुर्गाग्रहणदुःखाग्निप्लुष्टमस्याथ मानसम् ।
प्रसेक्तुमिव पाथोदः प्रोन्ननाम नभोऽङ्गणे ॥ ५१ ॥
बर्हिणो व्यदधन् केका उन्नीयोन्नीय कन्धराम् ।
आह्वयन्त इवाम्भोदं मिलितुं चिरमागतम् ॥ ५२ ॥
वीक्ष्याभ्युन्नतमम्भोदं केकाव्याजेन केकिनः ।
कदाऽगामीति पप्रच्छुर्हर्षादर्धोक्तिभङ्गिभिः ॥ ५३ ॥[1]
उद्गीते केकिभिर्गीते तूर्यिते घनगर्जिते ।
ननर्त्त नर्त्तकीवोच्चैस्तडिद्गगनमण्डपे ॥ ५४ ॥
सान्द्रोद्गमोल्लसन्नीलतृणश्रेणिच्छलात् क्षितिः ।
मेघप्रियागमप्रीता पर्यधादिव कञ्चुकम् ‡ ॥ ५५ ॥[2]
दधत्यम्बुनिधेः स्पर्धां सरांसीह रराजिरे ।[3]
त्रुटित्वा वारिभारेणाभ्राणीव पतितान्यधः ‡ ॥ ५६ ॥[4]
वियोगिनीनां नेत्राणि व्योम्न्यभ्रपटलानि च ।
मिथः स्पर्धां दधन्तीव वर्षन्ति स्माधिकाधिकम् ॥ ५७ ॥
किरत्यसूचीसंचारा धारा वारिधरे भृशम् ।
वियोगिनीनां लावण्यं जगालेति किमद्भुतम् ॥ ५८ ॥
शम्भोः परिभवात् त्यक्तमधुचापोऽधुना स्मरः ।
वर्षासखस्तडिद्दम्भादसिश्रममिवातनोत् ॥ ५९ ॥

1 K हर्षादर्धोक्ति । 2 P छलादिला प्रियाम्भोदागम । ‡ K प्रतौ श्लोकद्वयं पौर्वापर्येण विपर्ययरूपेणास्ति । 3 K विरेजिरे । 4 K °जलभारेणा° ।

वारिदेन तदा सिक्ता रराजे भूरि भूरियम् ।
कान्तकान्तोपभुक्तायाश्छायाऽन्यैव मृगीदृशः ॥ ६० ॥
अम्भोधरस्य ग्रीष्मर्तुं निर्जित्य विशतः सतः ।
स्फूर्जद्गर्जिच्छलात् प्रादुरासंस्तूर्यस्वना इव ॥ ६१ ॥
अङ्गानि कानि सिक्तानि कानि सेच्यानि वा भुवः ।
इति विद्युत्[1]प्रकाशेन ददर्शेव घनाघनः ॥ ६२ ॥
मालतीकुटजामोदहारी स्पृष्टपयःकणः ।
लतालास्यकलाचार्यो ववौ वर्षासमीरणः ॥ ६३ ॥
क्षेत्रग्रं च साग्रं च गात्रस्नायमपि क्वचित् ।
चेल[2]क्नोपं तदा वर्षन्नहो वन्ध्यं व्यधाद् घनः* ॥ ६४ ॥
यथा यथा जगर्जायं स्तनयित्नुस्तथा तथा ।
प्रियाः शकानां चक्रन्दुर्बाहुजैर्विधवीकृताः* ॥ ६५ ॥
इलामधः कर्दमिलां धारा[3]श्चोपरिपातिनीः ।
विलोक्य यवनाः सेवाव्रते वैराग्यमासदन् ॥ ६६ ॥
अमुञ्चंस्तुरगा रङ्गमगच्छन् कृशतां द्विपाः ।
अभ्युक्षन् स्यन्दना धात्र्यां जनान् दंशा उपाद्रवन् ॥ ६७ ॥
इत्यालोक्याम्बुमुत्कालं साक्षात् कालमिवागतम् ।
यथाकथञ्चित् संधानमचिकीर्षच्छकाधिपः ॥ ६८ ॥
आजुहाव ततो दूतं *रतिपालं* शकाधिपः ।
शकेशः किं किमाहेति *हम्मीरो* ऽप्यन्वमन्यत ॥ ६९ ॥
रतिपाले गते जाते संधाने चलिते शके ।
वृथा नो दोष्मतेत्याप *रणमल्ल*स्तदा रुषम् † ॥ ७० ॥
आयाते *रतिपाले*ऽथ स मायावी शकेश्वरः ।
उपावीविशदेनं स्वासनेऽभ्युत्थानपूर्वकम् ॥ ७१ ॥
अरञ्जयच्च कूटेन मानैर्दानैरनेकधा ।
कूटोपजीविनः किं वा कूटे मुह्यन्ति कुत्रचित् ॥ ७२ ॥
अपवार्य सभास्तारान् भ्रातृमात्रद्वितीयकः ।
रतिपालं जगादेष विस्तार्याग्रे सिचोऽञ्चले ॥ ७३ ॥
अल्लावदीन इत्याख्यः सोऽहं शककुलाधिपः ।
दुर्गाण्यनेकशो येन दुर्ग्राह्याण्यपि जिग्यिरे ॥ ७४ ॥

1 K संपाप्रकाशेन । 2 K चलत्कोपं । * K प्रतौ श्लोकद्वयं पूर्वापरविपर्ययेण लभ्यते । 3 P धाराउपरि । † नास्त्ययं श्लोकः K प्रतौ । 4 K तत्र वेश्येव शकेशो मायितां सृजन् ।

इदानीमस्वसात् कृत्वा यदि दुर्गं व्रजाम्यदः ।
ज्वलदश्युसवल्लीव तन्मे कीर्तिः कियच्चिरम् ॥ ७५ ॥
स्वसात् कर्तुं बलेनैतत् सहस्राक्षोऽपि न क्षमः ।
परं भाग्यात् त्वमायासीः सिद्धमस्मत्समीहितम् ॥ ७६ ॥
तद् यतस्व यथा तूर्णं यथा स्यां सत्यसंगरः ।
एतद् राज्यं तवैवास्तु जयेच्छुः केवलं त्वहम् ॥ ७७ ॥
दुराचारो यदाचारो माया यत्सहचारिणी ।
अनृतं यत्पदन्यासाः क्रोधो यत्पारिपार्श्विकः ॥ ७८ ॥
अत्रान्तरे कलिर्नाम लोभं कृत्वा तमग्रतः ।
विविशे *रतिपालस्य* मनोदुर्गं सुदुर्ग्रहम् ॥ ७९ ॥ *युग्मम्* ।
*रतिपाल*मनोदुर्गं बलाद् गृह्णंस्तदा कलिः ।
शकुन्यभूच्छकेशस्य *रणस्तम्भं* जिघृक्षतः ॥ ८० ॥
अन्तरन्तःपुरं नीत्वा शकेशस्तमभोजयत् ।
अपीप्यत् तद्भगिन्या च प्रतीत्यै मदिरामपि ॥ ८१ ॥
प्रतिश्रुत्य शकेशोक्तं ततः सर्वं स दुर्मतिः ।
विरोधोद्बोधिनीर्वाचो गत्वा राज्ञे न्यरूपयत् ॥ ८२ ॥
देवाहङ्कारलङ्केशो निजगाद शकेश्वरः ।
हम्मीरः किमयं मूढः पुत्रीं मे न प्रयच्छति ॥ ८३ ॥
यद्वा मा दादसौ किन्त्व*ल्लावदीनो*ऽस्मि नो तदा ।
पुत्रीमयच्छतोऽमुष्य नाददे यदि वल्लभाः ॥ ८४ ॥
किं जातं यद्यगुर्वीरा भूयांसोऽपि परासुताम् ।
किं द्वित्रिपदभङ्गेऽपि खर्जूरो याति खञ्जताम् ॥ ८५ ॥
किं जातं नीयते कोशो यदि निःकोशतां व्ययैः ।
किं शुष्यति समुद्रोऽपि वारिभिर्वारिदाहृतैः ॥ ८६ ॥
त्वं रे ! प्रयाहि यत्कर्त्ता कर्त्ता तद्भविता ध्रुवम् ।
भर्त्सनापरमेवं तं निर्भर्त्स्याहमपीयिवान् ॥ ८७ ॥
विशङ्के *रणमल्लो*ऽसौ रुष्टः केनापि हेतुना ।
तेनाज्ञायि ध्रुवं येन दृढां प्रौढिं वहत्यसौ ॥ ८८ ॥

---

1 K वल्लीवत् । 2 K श्याकसिद्धं समीहितम् । 3 P यत्पदं न्यासाः । 4 K गृह्णन् कलिस्तदा । 5 K भगिन्या । 6 P त्वरे ।

तत्सभ्यैर्जनैर्युक्तो गत्वा सायं तदालयम् ।
तं प्रसादय सद्योऽपि किंमान्नोऽसौ शकेश्वरः ॥ ८९ ॥
त्वरयित्वेति भूकान्तं रणमल्लानुरञ्जने ।
वीरमं निकषाभूय रतिपालो विनिर्ययौ ॥ ९० ॥
तदा चास्य मुखाद् गन्धः प्रससार मदोद्भवः ।
अङ्गादन्यप्रियाऽऽश्लेषसंशीत्वर्या इवानिलः ॥ ९१ ॥
दाक्ष्याद् विज्ञायते नैनं संगतं शत्रुभूपतेः ।
नृपं विज्ञपयामास वीरमो रहसि स्थितम् ॥ ९२ ॥
निर्यतोऽस्य मुखाद् राजन्! मदगन्धस्तथा ययौ ।
जाने यथैष पापीयान् निश्चितं संगतो द्विषः ॥ ९३ ॥
कुलं शीलं मतिर्लज्जाऽभिमानः स्वामिभक्तता ।
सत्यं शौचं च न क्वापि जृम्भते मद्यपायिनि ॥ ९४ ॥
अकृत्यकरणागम्यगमनाभक्ष्यभक्षणात् ।
मद्यं विशिष्यते यस्मादस्मात् संपद्यते त्रयम् ॥ ९५ ॥
तथा हि स ऋषिः पीत्वा मधु वेश्यामरीरमत् ।
असिस्वदच्च गोमांसं लिङ्गभङ्गमरीरचत् ॥ ९६ ॥
असिसात् क्रियते स्वामिंस्ततो यद्येष मेषवत् ।
शकेशो[3] निष्फलारम्भः सद्यस्तर्हि प्रयात्यसौ ॥ ९७ ॥
वाचमाचम्य तस्येत्थं विश्रम्य क्षणमायतौ ।
उपाददे नृपो वाचं वञ्चितामृतचञ्चुताम् ॥ ९८ ॥
उदेति काले कस्मिंश्चित् प्रतीच्यामपि भास्करः ।
भज्यमानं परं दुर्गं न तिष्ठेदिति मे मतिः ॥ ९९ ॥
तदस्मिन्निहते जाते दुर्गभङ्गे च दैवतः ।
लोकानिति प्रजल्पाकान् निरोद्धुं कतमः क्षमः ॥ १०० ॥
ध्रुवं सपरिवारोऽपि दुर्मतिर्विभुरेव नः ।
यदेवमविमृश्यैव रतिपालं प्रजल्पिवान् ॥ १०१ ॥
जीवत्यत्र दुर्गेऽस्मिन् विलसन्तीति किं शकाः ।
पारीन्द्रे सति किं तस्य गुहायां कोऽपि दीव्यति* ॥ १०२ ॥
हमूमदयनं यद्वदभविष्यज्जितेऽमुना ।
हतेऽत्र भविता तद्वद् रतिपालायनं क्षितौ ॥ १०३ ॥

1 P विज्ञाप° । 2 P यद्येवमेव तत् । 3 P स शकेशो निष्फलारम्भः । 4 K °मपि ।
5 K दुर्गे किं । * साविकालद्वितीयश्लोकान्तरं K प्रत्यायं श्लोकः—
कुलीनः पीड्यमानोऽपि कुलीनत्वं न मुञ्चति ।
अगुरुर्दह्यमानोऽपि सौरभं किं विमुञ्चति ॥

विरम्यतां तदेतस्माद् भाव्यमस्ति यदस्तु तत्[1]।
रावणादिभिरप्युग्रैर्न भाव्यं रुरुधे यतः ॥ १०४ ॥
उक्त्वेति विरते राज्ञि प्रससार पुरान्तरे ।
वार्ता नृपं शकाधीशो यत्पुत्रीमेव याचते ॥ १०५ ॥
इतश्च राजपत्नीभिरनुशास्य प्रणोदिता ।
पुत्री देवलदेवीति गत्वा[3] भूपं व्यजिज्ञपत् ॥ १०६ ॥
हा हा तात! मदर्थं किं राज्यं विप्लावयस्यदः ।
किं कीलिकार्थे प्रासादं प्रपातयति कश्चन[2] ॥ १०७ ॥
प्रभूता अपि पुत्राः किं कुर्युः पूर्वं ततोऽङ्गजाः[4] ।
परार्थमेव वर्धेत या क्षुद्रश्रीरिवान्वहम् ॥ १०८ ॥
मत्प्रदानेन[5] साम्राज्यं चिरं यत् क्रियते स्थिरम् ।
तत्काचखण्डदानेन रक्षा चिन्तामणेर्न किम् ॥ १०९ ॥
परासोर्यत्र कुत्रापि जीवन्ती[6] तनुजा वरम् ।
दृष्टा हि पुनरावृत्तिर्जीवतां न गतायुषाम् ॥ ११० ॥
नीतिः स्वहितमालोच्य[7] कार्यं कुर्याद् विचक्षणः ।
तत् तात! मयि दत्तायां किं किं भावि न ते हितम् ॥१११॥
जामाता भूपतिस्तादृक् सुखं स्वक्षितिरक्षणम् ।
खलूक्त्वा बहु सर्वेषां वयमपि किलोपरि ॥ ११२ ॥
त्यजेदेकं कुलस्यार्थे नीतिरित्याह वाक्पतिः ।
त्रातुमावर्धितक्ष्मां मां ददतस्तव का क्षतिः ॥ ११३ ॥
तन्निधेहि धियं तस्वे विधेहि समयोचितम् ।
पिधेहि मा च मद्वाक्यं शकेन्द्राय[8] प्रदेहि माम् ॥ ११४ ॥
अयशःपटनिर्माणतुरीं तच्चातुरीमिति ।
श्रुत्वा भृशं प्रजज्वाल[9] नृपतिस्तर्पिताग्निवत् ॥ ११५ ॥
जगाद च सुते! नैतद् ध्रुवं त्वन्मतिवल्गितम् ।
अस्पृष्टपापपङ्कानां कुमारीणां[10] न धीरिति ॥ ११६ ॥
शिक्षयित्वेति पापिन्या त्वमिह प्रेषिता यया ।
छिनद्मि रसनां तस्या बिभेमि स्त्रीवधाच्च चेत् ॥ ११७ ॥
त्वद्दानेन यदीप्स्येत[11] प्राज्यराज्यसुखासिका ।
तत् किं न जीवितव्याशा पुत्रकालेयभक्षणैः ॥ ११८ ॥

---

1 K यदस्ति । 2 K कश्चित् । 3 P गत्वा । 4 P ततोऽङ्गजाः । 5 K मत्प्रदानेन । 6 P जीवन्ति । 7 P स्वयं । 8 K शकेशाय । 9 P सजज्वाल । 10 P °णामधी° °णां न धी° । 11 P यदिप्स्येत ।

त्यजेदेकं कुलस्यार्थे इति नीतिं वदन्न्यधाः ।
शैशवात् तन्न तेऽद्यापि तत्परार्थे समर्थता ॥ ११९ ॥
त्याज्य एकः कुलस्यार्थे तस्माद्धीनतरः स चेत् ।
अहिदष्टो यथाङ्गुष्ठः छेद्यो जिह्वाऽपि किं तथा ॥ १२० ॥
सत्यामप्यासमुद्रोर्व्यां कुले सारं त्वमेव नः ।
न चेच्छकोऽपि तां हित्वा कथं त्वामेव याचते ॥ १२१ ॥
यदूचे मयि दत्तायां किं किं भावि न ते हितम् ।
तदेतदपि ते बाललीलोन्मीलितमङ्गजे ! ॥ १२२ ॥
सर्वात्मना निकृष्टाय पापिष्ठाय गवाशिने ।
शकाय त्वयि दत्तायां कुतो हन्त ! हितार्जनम् ॥ १२३ ॥
अयशःपटहो लोके परलोके च दुर्गतिः ।
स्वकुलाचारविध्वंसो धिङ् नृणां जीवितं ततः ॥ १२४ ॥
दुर्लभं नृभवं प्राप्य द्वयमेवार्जयेत् सुधीः ।
कीर्तिं धर्मं च तौ सम्यक्कुलाचारप्रपालनात् ॥ १२५ ॥
पूर्वाचारं निहत्योच्चैः सुखं हन्त ! चरन्ति ये ।
आज्ञालोपान्न किं पापैर्हतास्तैः पूर्वजा निजाः ॥ १२६ ॥
आचाहमानमप्याद्यैर्यन्नाकृत्यं कृतं पुरा ।
तत् कुर्वन्नधुनाऽहं तान् कथं वक्ता स्वपूर्वजान् ॥ १२७ ॥

[यतः –]

पितर्युपरते यस्तु नोद्वहेत् पैतृकीं धुरम् ।
तेन नैवोपदेष्टव्याः स्वस्य वंशस्य पूर्वजाः ॥ १२८ ॥
बज्रवाचं विधायेति प्रतीपोक्तिरङ्गितैः ।
स्वावासं प्रेषयामास सद्यस्तां क्षितिवासवः ॥ १२९ ॥
इतः स रतिपालोऽपि तूर्णं गत्वा तदालयम् ।
कलयन्नाकुलीभावं रणमल्लमभाषत ॥ १३० ॥
भ्रातः ! किं सुखमासीनस्त्वरस्व प्रपलायितुम् ।
सेवाहेवाकिनां शत्रुर्वञ्चुमभ्येति यद्विभुः ॥ १३१ ॥
सुधांशौ विषवत् तस्मिन्नेतत् सम्भाव्यते कथम् ।
इत्याक्षिप्तवचास्तेन रतिपालः पुनर्जगौ ॥ १३२ ॥
स पञ्चषैर्जनैर्युक्तो यदि सायं त्वदालयम् ।
एति तन्मे वचः सत्यमित्युक्त्वाऽसावगाद् गृहम् ॥ १३३ ॥

1 P [illegible] । 2 K °सेवार्जयत् । 3 K धुराम् । 4 K पूर्वजान् । 5 K प्रपलायसे ।

अथ दृष्ट्वा यथादिष्टमायान्तं स क्षितीश्वरम् ।
जातप्रतीतिरुत्तीर्य दुर्गाद् भीत्याऽमिलद् रिपोः ॥ १३४ ॥
उत्तीर्य *रतिपालो*ऽपि दुर्गात् स्वर्गादिवोच्चकैः ।
शिश्राय निरयावासमिवावासं शकेशितुः ॥ १३५ ॥
तयोस्तच्चेष्टितं दृष्ट्वा कलिं धिक् कलयन्नयम् ।
कोशेऽन्नं कियदस्तीति नृपः पप्रच्छ *जाहडम्* ॥ १३६ ॥
वदामि यदि नास्तीति तदा संधिर्भवेद् ध्रुवम् ।
भाव्यर्थभावाद् ध्यात्वेति जगौ न कियदित्यसौ ॥ १३७ ॥
कुर्वन्नपि हितं मूर्खोऽहितायैव प्रगल्भते ।
अत्रोदाहरणं व्यक्तं किं न पश्यत *जाहडम्* ॥ १३८ ॥
तद्गिरा चिन्तयाऽऽक्रान्तो भूकान्तोऽभ्येत्य मन्दिरम् ।
उच्चन्द्रे विगलत्तन्द्रश्चेतसीति व्यचिन्तयत् ॥ १३९ ॥
अमानैरपि सन्मानैर्दानैस्तैस्तैरनेकधा ।
पूजितौ सत्कृतौ शश्वद् यौ मया भ्रातराविव ॥ १४० ॥
यदि तावप्यहो स्वामिद्रोहमेवं प्रचक्रतुः ।
तदा स्वभावनीचानां परेषां गणनाऽस्तु का ॥ १४१ ॥
साजात्यात् तस्य संगम्य रिपोश्चेन्मुद्गला अमी ।
नियम्य मामदुस्तस्य महद् भावि विडम्बनम् ॥ १४२ ॥
यथा कथञ्चिदर्हास्तद् विसृष्टुं स्वपुरादमी ।
परः प्रेमपरोऽप्युच्चैः परत्वं यन्न मुञ्चति ॥ १४३ ॥
एतस्मिन्नन्तरे द्वाःस्थो विदग्धः कोऽपि मागधः ।
प्रत्यूषोन्मेषकं काव्यद्वयमेतदपीपठत् ॥ १४४ ॥

कोकीनिःश्वासवातज्वलिततमोऽङ्गारवैभातरागा-
र्चिष्मत्स्थव्योममूषाजठरविनिहितेऽपास्तनिःशेषदोषे ।
क्षिप्त्वा प्रत्यूषकल्कं शशभृति विशदे पारदे कालयोगी
भास्वन्तं निर्मिमीते नवमिव कनकं भूषणार्थं दिनस्य ॥ १४५ ॥
आयातेन वितन्वता हृदि करस्पर्शं भृशं प्रेयसो-
न्निद्रत्वं गमिताऽपि तिग्मरुचिना यान्तीव निद्रालुताम् ।
अप्रोढेव सरोजकोशविगलद्भृङ्गावलीझङ्कृतैः
सोत्कम्पं वितनोति पश्य नलिनी प्रोढाऽप्यहो हुङ्कृतिम् ॥ १४६ ॥

---

1 P परः प्रेमदुस्तस्य । 2 K सूक्तद्वयमेतदपापठीत् । 3 K निर्मिमीते ।

प्रीतस्तद्वचसारिम्या नृपस्तत्पारितोषिकम् ।
दत्त्वा क्षणमुपाक्रांस्त ब्राह्ममौहूर्तिकीं क्रियाम् ॥ १४७ ॥
अथ प्रातरधिश्रित्य सभां स क्षितिवल्लभः ।
स्वतत्सहोदराभ्यर्च्यं महिमासाहिमब्रवीत् ॥ १४८ ॥
प्राणानपि मुमुक्षामो वयमात्मक्षितेः कृते ।
क्षत्रियाणामयं धर्मो न युगान्तेऽपि नश्वरः ॥ १४९ ॥
स एव क्षत्रियः प्राणान्तेऽपि यो हुङ्कृतौ क्षमः ।
किं नोदाह्रियते व्यक्तमिह राजा सुयोधनः ॥ १५० ॥
यूयं वैदेशिकास्तद् वः स्थातुं युक्तं न सापदि ।
यियासा यत्र कुत्रापि ब्रूत तत्र नयामि यत् ॥ १५१ ॥
नृपस्य वचसा तेन प्रासेनेव हतो हृदि ।
मूर्च्छया प्रपतन्नुच्चैरवष्टब्ध इव क्रुधा ॥ १५२ ॥
एवमस्त्विति जल्पाको महिमाऽभ्येत्य मन्दिरम् ।
कुटुम्बमसिसात्[5] कृत्वा नृपं गत्वेदमब्रवीत् ॥ १५३ ॥
पाणिगृहीती त्वद्भ्रातुर्गन्तुमुत्कण्ठिताऽप्यसौ ।
इलाविलासिनी कान्तं मामाहेति सगद्गदम् ॥ १५४ ॥
कान्तैतावन्ति वर्षाणि तस्थिवांसो यदोकसि ।
[7]अप्यासानुभवं नैवास्माष्र्म शत्रुपराभवम् ॥ १५५ ॥
यस्य प्रसादैः सम्प्राप्तसौख्यलक्ष्मीर्निरन्तरम् ।
अबोधि नापि तिग्मांशुरुदितोऽस्तमितोऽथ[8] वा ॥ १५६ ॥
तमिदानीमदृष्ट्वैव यद्येवं नाथ ! गम्यते ।
पश्चात्तापहतं तर्हि मनः केनोपशाम्यति ॥ १५७ ॥
प्रसाद्यागत्य तत् सद्यो मन्दिरं मेदिनीपते ! ।
त्वदर्शनामृतैः पश्चात्तापतप्तां निषिञ्चताम् ॥ १५८ ॥
एवमभ्यर्थितस्तेन महिमासाहिना विभुः ।
आलम्ब्य तद्भुजादण्डं सादरं सानुजोऽचलत् ॥ १५९ ॥
आसाद्य तद्गृहं भूपो यावदन्तर्विशत्यसौ ।
कुरुक्षेत्रमिवाद्राक्षीत् तावत् सर्वं तदङ्गणम् ॥ १६० ॥
असृक्पूरे शिरांसीह शिशूनां योषितामपि ।
तरन्त्यवेक्ष्य मूर्च्छालः क्ष्मापालः क्ष्मातलेऽपतत् ॥ १६१ ॥

1 K मावद । 2 K स्थलिष् । 3 K तितिक्षामो । 4 K वचोपेव । 5 K °सात्कृत्वा ।
6 K कान्त° । 7 K अप्यासातु° । 8 P °अपि वा ।

बन्धूनां वीरमादीनां विमूर्च्छोऽधाश्रुसेचनैः[1] ।
लगित्वा महिमासाहेः कण्ठे व्यलपदित्यसौ ॥ १६२ ॥
हा कम्बोजकुलाधार ! हा कीर्तिकुलमन्दिर ! ।
हाऽनन्यजन्यसौजन्य ! हा धन्यतमविक्रम ! ॥ १६३ ॥
हा क्षत्रैकव्रतागार[2] ! हा विश्वजनवत्सल ! ।
कथंकारं भविष्यामि प्राणदोऽप्यनृणस्तव ॥ १६४ ॥
मत्तो नैवाधमः कोऽपि त्वत्तो नैवोत्तमः परः ।
अध्यायं[3] मन्दधीस्तादृगीदृक् प्रेम्ण्यपि यत् त्वयि ॥ १६५ ॥
प्रातिकूल्याद् विधेर्जाता ममेयं यदि दुर्मतिः ।
आश्चर्यमेतत् तत् किं त्वं यद्वा[4] भाव्यं हि नान्यथा ॥ १६६ ॥
पुमानात्महितं कर्तुं धियं ध्यायत्यनेकधा ।
सा[5] सतीव पतिं क्वापि भवितव्यं जहाति न ॥ १६७ ॥
अन्यथैव विचार्यन्ते पुरुषेण मनोरथाः ।
दैवादाहितसद्भावा कार्याणामन्यथा गतिः ॥ १६८ ॥
विनिवृत्तस्ततो मानमञ्जमालोक्य कोष्ठगम् ।
किमेतदिति पप्रच्छ जाहडं जगतीपतिः ॥ १६९ ॥
उक्तायामथ तेनात्मबुद्धौ प्रोवाच पार्थिवः ।
त्वन्मतौ[6] पतताद् वज्रं यया जज्ञे कुलक्षयः ॥ १७० ॥
ततः प्रदाय पौराणां मुक्तिद्वारं स युक्तिवित् ।
प्रवेष्टुं ज्वलने शिष्टमतिरादिष्टवान् प्रियाः ॥ १७१ ॥
स्वयं च कृतदानादिधर्मोऽर्चितजनार्दनः ।
क्षणं पद्मसरस्तीरे निषसाद विषादमुक् ॥ १७२ ॥
आरङ्गदेवीप्रमुखा[7] अथ ता दिव्यभूषणाः ।
तत्र स्नात्वा नृपं नत्वा तस्थुरूर्ध्वंदमाः पुरः ॥ १७३ ॥
कस्याश्चित् कर्णयोः स्वर्णकुण्डले रेजतुस्तमाम् ।
चक्रे इव जगज्जेत्रे रतिकन्दर्पचक्रिणोः[8] ॥ १७४ ॥
बभौ परस्याः कस्तूरीतिलकं कलिकाकृतिः ।
स्मरेण त्रिदिवं जेतुं संहितं धनुषीष्विह ॥ १७५ ॥
नासावंशाग्रतोऽन्यस्या मुक्तं मुक्ताफलं बभौ ।
तिलपुष्पाग्रतो यस्या वारिबिन्दुरिव स्फुरन् ॥ १७६ ॥

1 P °धाश्रु सेचनैः । 2 K °व्रताधार । 3 K अध्ययं । 4 P यद्वा । 5 K क्वापि छायेव सा क्वापि । 6 P त्वद्बुद्धौ । 7 P °देविप्र° । 8 P रतिवल्लभकामयोः ।

कस्याश्चिदुरसि स्फारा मुक्ताहारलता बभौ ।
वितता हासधारेव निर्याता सृक्किणीद्वयात् ॥ १७७ ॥
रेणुसंगभयात् कामस्यन्दनाङ्गमिवावृतम् ।
बभौ नीलदुकूलेन कस्याश्चिच्छ्रोणिमण्डलम् ॥ १७८ ॥
करद्वयाङ्गुलीयानां मयूखैर्वृत्तवर्तिभिः ।
परीता हरिचापाभ्यामिव काचिदराजत ॥ १७९ ॥
आच्छिद्याहितचक्राङ्कयाननाशभयादिव ।
रेजे नियन्त्रणाऽन्यस्याः पादयोर्नूपुरच्छलात् ॥ १८० ॥
ततस्तुष्टो नृपश्छित्त्वा कवरीं स्वां वरीयसीम् ।
मूर्त्तं शृङ्गारसर्वस्वमिव तासां व्यशिश्रणत् ॥ १८१ ॥
पुत्रीं देवलदेवीं च दोर्भ्यामालिङ्ग्य निर्भरम् ।
निर्तरां निःश्वसन् क्रन्दन् कष्टेन महता जहौ ॥ १८२ ॥
ऊचे च चेद् भवेत् पुत्री भूयात् तर्हि भवादृशी ।
परां कोटिं ययाऽनायि गौर्येव जनको निजः ॥ १८३ ॥
स्वर्नारीरूपलुब्धोऽसौ यदि न स्वीकरोति नः ।
तदाऽस्मै प्राक् प्रतीत्यर्थमिमां दर्शयितास्महे ॥ १८४ ॥
इति ध्यात्वेव तां वेणीं हृदि विन्यस्य सुभ्रुवः ।
ज्वलद्धनञ्जयज्वालाकरालां प्राविशंश्चिताम् ॥ १८५ ॥

[स्वःस्त्रीरूपवशीकृतो यदि कदाऽप्यस्मानयं स्वप्रियाः
स्वीकर्त्ता न तदा प्रतीतिमनयाऽस्योत्पादयिष्यामहे ।
ध्यात्वेवेति निधाय तां स्वहृदये वेणिं विभोस्ता ज्वलत्
श्रीखण्डाऽगुरुसारचन्दनचितां सद्योऽप्यविक्षंश्चिताम् ॥ १८६ ॥†]

विसृष्टोऽन्त्याञ्जलीन् तासां दत्त्वा जाजः स भूभुजा ।
आगाच्छित्त्वा द्रुतं क्षिप्ताष्टव्येकाङ्कजमस्तकः ॥ १८७ ॥
किमेतदिति राज्ञोक्ते सोऽवक् राजन्! यथा पुरा ।
रावणः शम्भुमानर्च तथा त्वामर्चयाम्यहम् ॥ १८८ ॥
तच्छिरांसि नवैतानि रक्षोहस्तपदे पुनः ।
शिरो ममेदमित्युक्त्वा से स्वं शीर्षमदीदशत् ॥ १८९ ॥

---

1 K स्फाणि । 2 K नीली° । 3 K शक्रचापा । 4 K दत्तचक्राङ्क । 5 P मूर्त्तं । 6 K नितरां । 7 K स्वस्त्रैणरूपलुब्धा । 8 K °ऽगुरुसारचन्द्रनिचितां । 9 K °विशंश्चि° । † '१८४, १८५' इत्यङ्कचिह्नितश्लोकद्वयस्य पाठान्तररूपोऽयं श्लोकः । 10 K आगाच्छित्त्वा...न शिरा° । 11 P सं च शीर्षं° ।

राज्यार्थी सोदरं हित्वा वीरमः स्थितवानिति ।
जनापवादभीतेन वीरमेण तिरस्कृतम् ॥ १९० ॥
वितीर्य जाजदेवाय ततो राज्यं मुदा नृपः ।
द्रव्यं क्व निक्षिपामीति चिन्तयन् निद्रयादृतः ॥ १९१ ॥
तदा पद्मसरः स्वप्नेऽभ्येत्य भूपमदोऽवदत् ।
म्लेच्छा धनं मयि क्षिप्तं लप्स्यन्ते नाप्यसुव्यये ॥ १९२ ॥
सर्वेऽपि रतिपालाद्या नीचा द्रोहमयासिषुः ।
एते भटा अहं दुर्गस्तुभ्यं द्रुह्यन्ति नो पुनः ॥ १९३ ॥
अथ निर्निद्रभूपालादेशात् सर्वं स जाहडः ।
प्रक्षिप्य सारं कासारे तमूचे किं करोम्यहम् ॥ १९४ ॥
उक्तो निदेशं देहीति श्रीहम्मीरेण वीरमः ।
कूष्माण्डवच्छिरस्तस्य छित्त्वा भूमौ व्यलोठयत् ॥ १९५ ॥
अथ श्रावणमासस्य सितषष्ठ्यां रवौ निशि ।
दिवि कीर्तिं कलन्तीं स्वां विलोकयितुमिवोत्सुकः ॥ १९६ ॥
अहंकारैरिवाध्यक्षैर्मूर्तैर्वीररसैरिव ।
अन्वितो नवभिर्वीरै रणं शिश्राय पार्थिवः ॥ १९७ ॥
आगाद्धम्मीर इत्युक्तिश्रुत्या व्यञ्जितविक्रमः ।
ससैन्यः शकराजोऽपि भेजे तत्राभ्यमित्रताम् ॥ १९८ ॥
एकस्तस्य नृपस्याग्रे वीरमौलिः स वीरमः ।
बभौ चम्पाधिपः प्रौढः कौरवाधिपतेरिव ॥ १९९ ॥
विशिखान् विकिरन् भूरीन् ध्वानयंश्चापमण्डलम् ।
क्षणात् स वीरकोटीरो व्याकुलं द्विट्कुलं व्यधात् ॥ २०० ॥
क्ष्वेडानादैर्द्विषच्चक्रं त्रासयंश्चैणयूथवत् ।
सिंह सिंह इवाध्यक्षो जज्ञे यज्ञेऽत्र वैरिणाम् ॥ २०१ ॥
नयनाग्निशिरोल्काभिः प्रतिवीराननङ्क्षताम् ।
टाको गङ्गाधरः स्वाख्यां सत्याख्यामिह तेनिवान् ॥ २०२ ॥
यवनानां स्फुरद्वक्त्राम्भोजानि म्लानिमानयन् ।
राजदो वा निजाभिख्यां सत्याख्यामिह चक्रिवान् ॥ २०३ ॥

---

1 K दुर्गे । 2 K न कश्चित् । 3 P अपापमिद्र° । 4 K व्यलोठयत् । 5 K [illegible] ।
6 K [illegible] । 7 K नयति स्म यथार्थताम् । † K प्रतौ श्लोकोऽयमधिको [illegible] ।

चत्वारोऽपि व्यराजन्त मुद्गलास्ते स्फुरद्बलाः ।
चतुरङ्गमपि द्वेषिबलं जेतुमिवोद्यताः ॥ २०४ ॥
परान् परःशतान् प्रेतपतेरतिथितां नयन् ।
परमारान्वयं चक्रे क्षेत्रसिंहोऽत्र[1] सार्थकम् ॥ २०५ ॥
रिपुप्राणापहाराय दण्डभृद् दूतिकास्विव ।
क्ष्वेडासु वीरैर्मुक्तासु चकितं दधिरे शकाः ॥ २०६ ॥
सा कीदृगस्ति स्वःश्रीर्या नृपः परिणिनीषते ।
इति द्रष्टुमिवायासीद् वीरमः प्राग् नृपाद् दिवम्[3] ॥ २०७ ॥
वीराः परेऽपि हम्मीरा निर्विण्णा इव जीविते ।
प्रभोः पूर्वं ययुः स्वर्गं स्थितिरेषा भुजाभृताम् ॥ २०८ ॥
मूर्च्छितं महिमासाहिं विभाव्य रिपुपत्रिभिः ।
युद्धाय स्वयमुत्तस्थावथ[4] हम्मीर भूपतिः* ॥ २०९ ॥
अतिधारानिषूनस्य वर्षतः शुचिनाऽमुना ।
शङ्के द्वेषो भवेन्नो चेत् कथमस्यायमन्तकृत् ॥ २१० ॥
संयत्येकोऽपि हम्मीरः परो लक्षत्वमाश्रयत्[5] ।
व्योमासिकृत्तैर्द्विड्वक्त्रैः पद्माकरमिवाकरोत् ॥ २११ ॥
हम्मीराग्निशरश्रेणिपरीताः परितः शकाः ।
अमंसन्त[6] प्रविष्टं स्वं मण्डलं चण्डदीधितेः ॥ २१२ ॥
एकोऽप्यसौ जिगायाशु प्रभूतानपि वैरिणः ।
एणव्यूहं जयन् सिंहः किं सहायमपेक्षते ॥ २१३ ॥
निषादी पदगः सादी रथी वा यो यथाऽमुना ।
निहतः[7] स तथैवास्थाच्चित्रन्यस्त इवोच्चकैः ॥ २१४ ॥
वरीवर्षन्[8] शरासारैस्तपात्ययपयोदवत् ।
नृपः कदर्थयामास वक्त्राम्भोजानि वैरिणाम् ॥ २१५ ॥
भृशं शरप्रपातेनाकुलयन् मत्तवारणम् ।
तदारोढुश्च तस्यापि मदं स उदतीतरत् ॥ २१६ ॥
रतिपालवदेतेऽपि जाता इत्यपवादतः ।
भीता इवास्यारात्यङ्गं भित्त्वा दूरं ययुः शराः ॥ २१७ ॥

---

1 K °सिंहोऽर्थं° । 2 K प्रष्टु° । 3 K दिवि । 4 K तस्थौ ततो । * द्विशताधिकाष्टमश्लोकानन्तरं K प्रतावस्याः प्रतेर्द्विशताधिकचतुर्विंशतितमः श्लोकस्तत उपात्तो लभ्यते । 5 P °माश्रयत् । 6 P अमंसत । 7 K निहितः । 8 K वरिवर्षञ्छरा ।

अत्यर्जुनं धनुर्विद्यावेदिनामपि विद्विषाम् ।
कोदण्डस्थं करस्थं च गुणं चिच्छेद पार्थिवः ॥ २१८ ॥
धनुर्गुणटणत्कारश्रुत्यैव त्यक्तजीविताः ।
द्विषो नान्वभवँस्तस्य शरप्रहरणव्यथाम् ॥ २१९ ॥
नृपेण मध्यतश्छिन्नैर्भूगतार्धैर्द्विषच्छिरैः[1] ।
रणाङ्गणमभाल्लूनतिलक्षेत्रमिवान्तकम् ॥ २२० ॥
शरौघान् क्षिपतस्तस्य शकराजवरूथिनी ।
वसुहीनस्य वेश्येव क्षणेनासीत् पराङ्मुखी ॥ २२१ ॥
नृपः कांश्चिदुरःपूरं पूरयामास सायकैः ।
दूर्वालावं लुलावोच्चैः कांश्चित् खड्गेन मध्यतः ॥ २२२ ॥
वीरोऽसौ समरेऽरीणां तथाऽत्र कदनं व्यधात् ।
यथाऽमीभिर्यमस्यापि संकीर्णमभवद् गृहम् ॥ २२३ ॥
सध्वजान् खण्डयन् दण्डान् व्यध्यन्[2]नश्वान् ससादिनः ।
द्विधाऽपि विग्रहं भिन्दन् [3]सोऽरेश्चक्रे चिरं रणम् ॥ २२४ ॥
अतिधारानिषून् वर्षन् रिपुक्षेत्रेषु भूरिषु ।
चाक्षुषः श्रावणो जज्ञे चित्रं हम्मीरभूपतिः ॥ २२५ ॥

*

श्रीहम्मीरोऽथ वीरव्रजमुकुटमणिर्म्लेच्छबाणप्रहारैः
सर्वाङ्गेषु प्ररूढैः क्षितितलमभितो भावितो[4] भीष्मकर्मा ।
जीवन्तं ग्राहिषुर्मा क्वचिदपि यवना मामिति ध्यातबुद्धिः
कण्ठं छित्त्वात्मनैव स्वमटति[5] च दिवं स्मात्तसूरातिथित्वः ॥२२६॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के हम्मीरस्वर्गगमनवर्णनो नाम त्रयोदशः सर्गः ॥ १३ ॥

1 K द्विषच्छैरैः । 2 K व्यधमश्वान् । 3 K सोऽरिश्चक्रे । 4 K मथितो भावितो ।
5 K स्वमटति शिवं ।

अथान्तिमश्चतुर्दशः सर्गः ।

हम्मीरगुणस्तुतिः ।

ताद्दक्षस्य विभोरथ प्रतिभटत्रासैकदीक्षागुरो-
हम्मीरावनिवासवस्य जगतीलोकंपृणप्रोन्नतिम् ।
श्रुत्वा केचन केचनापि सुतरामाकर्ण्य मृत्युं बुधा-
श्चक्रुः काव्यपरम्परामिति तदा कष्टैकमुष्टिंधयाः ॥ १ ॥ 5

धर्मः शर्मपदं मुमोच करुणारण्यं शरण्यं ययौ-
वौदार्यं विजगाल बाललुलितं शिश्राय वीरव्रतम् ।
नीतिर्भीतिमुपाजगाम कमला वैधव्यमुद्रां दधौ
श्रीहम्मीर! नृपालभालतिलक! स्वर्गं गतेऽद्य त्वयि ॥ २ ॥ 10

भूदेवानिदमादिकाञ्चनचयैः कः पूजयिष्यत्यहो
को वा नाम करिष्यति प्रतिपदं षड्दर्शनोपासनाम् ।
को वा पास्यति गोकुलं शककुलैराहन्यमानं रुषाऽ-
स्माकं का गतिरस्तु निस्तुषमते हम्मीर! हा त्वां विना ॥ ३ ॥

गीर्वाणद्रुमधेनुकुम्भमणयः काले कराले कलौ 15
नैव क्वापि किल स्फुरन्ति धरणावेवं यदाहुर्बुधाः ।
तत् सर्वं निरवद्यमेव नितमां मन्यामहे साम्प्रतं
श्रीहम्मीर महीमहेन्द्र! भवति प्राप्ते यशःशेषताम् ॥ ४ ॥

पाताले भुजगेश्वराः सुमनसां व्यूहाः सुपर्वालये
पुष्पौघाः प्रतिकाननं प्रतिसरस्ते राजहंसादयः । 20
एणाक्ष्यः प्रतिमन्दिरं प्रतिपुरं प्रेमातुरा नागराः
शोचन्त्येकमहो हमीर नृपतिं हा हा त्रिलोकीपतिम् ॥ ५ ॥

धैर्यं मेरुगिरिं मतिः सुरगुरुं गम्भीरता सागरं
सौम्यत्वं शशिनं प्रतापसरणिः सूरं हरिं शूरता ।
चिन्तारत्नमुदारता सुभगता शिश्राय कामं क्षणाद् 25
हम्मीरे सुरसुन्दरीस्तनमहाशैलस्खलच्चक्षुषि ॥ ६ ॥

किं कुर्वीमहि किं ब्रुवीमहि विभुं कं चानुरुन्धीमहि
व्याचक्षीमहि किं स्वदुःखमसमं कं वा बभाषेमहि ।
यन्निष्कारणदारुणेन विधिना ताद्दग्गुणैकाकरं
हम्मीरं हरताऽञ्जसा हृतमहो सर्वस्वमेवावनेः ॥ ७ ॥ 30

---

1 K रक्षिति । 2 K प्रोन्नतेः । 3 K नितमा° । 4 K नाशं । 5 K शर्मभरं । 6 P शिश्रीय । 7 K यदूचुर्बुधाः । 8 K °रुन्धेमहि । 9 K सदुःख° । 10 K हरता सता ।

लक्ष्मीर्यास्यति[1] सत्वरं मुररिपोर्देवस्य वक्षःस्थले
वीरश्रीरपि वीरवेश्मनि हरेस्तास्ताः[2] समस्ताः कलाः ।
पौलोमीकुचकुम्भपत्ररचनाचातुर्यचिन्तामणौ
श्रीहम्मीर नरेश्वर! त्वयि निराधारा ह हा भारती ॥ ८ ॥

सन्ति क्षोणिभुजः क्षितौ कति न ते ये स्वप्रियाप्रीतये
वाहं[3] वाहमनेकवाहनिवहान् प्रौढिं दृढां तन्वते ।
म्लेच्छातुच्छकिरीटकोटिघटनैर्यो दन्तुरं सत्वरं
चक्राणः क्षितिमण्डलं स तु परं हम्मीर एकः कलौ ॥ ९ ॥

एधन्तां प्रबलैर्बलैः स्वबिरुदान्नध्यापयन्तां[4] जनान्
गाहन्तां नयवर्त्म[5] मध्यमसमं स्फीतां वहन्तां मुदम् ।
बाधन्तां युधि बाहुजेशनिकरान् प्रौढिं भजन्तां दृढां[6]
एकस्मिंस्त्वयि वीर! नाकमविते स्वैरं वराकाः शकाः ॥ १० ॥

भोक्तुं[7] ध्वाङ्क्षमियेष विक्रमविभुः पङ्कं स जैत्रो जले
मज्जद्द्राग्मलयेणराङ्गरिपुपुरो मार्दङ्गिकत्वं दधौ ।
इत्थं स्वं स्म विडम्बयन्ति कति नो हम्मीर राजन्! परं
यत् त्वं चक्रिथ तच्चकार कुरुते कर्ताऽथवा कः कलौ ॥ ११ ॥

सन्ध्यावन्दनकर्मकर्मठधियो माद्यन्मराला इवा-
मज्जन् पद्मसरोवरे श्रितमुदो यत्रानिशं वाडवाः ।
निःशङ्कं यवना विगन्धिवसनास्तत्र प्रविश्याधुना
कूर्दन्ते महिषा इव क्षितिपते हम्मीर! हा त्वां विना ॥ १२ ॥

ईदृक्षं नरमौलिमण्डनमणिं हत्वा हहा हेलया
दुःसाधं यदसाधि नाम भवता धातस्तदाचक्षताम्[8] ।
नीचानां[9] यदि वेदृशी स्थितिरहो यत् ते प्रयोगं विनाऽ-
प्यन्येषां हितवस्तुराहृतिविधौ[10] शश्वद् यतन्तेतमाम् ॥ १३ ॥

नेत्रे निष्कशतां नितान्तबधिरीभावं भजेतां श्रुती
नो कार्यं युवयोरतः परमहो किञ्चित् क्वचिद् वल्गति ।
याभ्यामेष समीक्षितो गुणगणस्तस्याथवा संश्रुतो
लज्जेतामितरं हहा किमु न ते श्रोतुं तथा वीक्षितुम् ॥ १४ ॥

---

1 P °यांति । 2 K हरे! तास्ताः । 3 K वाहावाह° । 4 P °विरुदान्यध्या° । 5 K नयसिन्धुमनिशं । 6 P समां । 7 K ध्वाङ्क्षं भोक्तुमि° । 8 K तदाचक्ष्यताम् । 9 K पापानां । 10 K हि तु वस्तु संहृति° ।

लोको मूढतया प्रजल्पतुतमां यच्चाहमानः प्रभुः
श्रीहम्मीरनरेश्वरः स्वरगमद् विश्वैकसाधारणः ।
तत्त्वज्ञत्वमुपेत्य किञ्चन वयं ब्रूमस्तमां स क्षितौ
जीवन्नेव विलोक्यते प्रतिपदं तैस्तैर्निजैर्विक्रमैः ॥ १५ ॥
धिग् धिक् त्वां[1] रतिपाल! याहि विलयं रे सूरवंशाधम![2] 5
द्राग् वक्त्रं रणमल्ल! कृष्णय निजं पापिंस्त्वमप्युच्चकैः ।
एको नन्दतु जाज एव जगति स्वाभाविकप्रीतिभृत्
येनात्रायि दिवंगतेऽपि नृपतौ दुर्गं किलाहर्द्वयीम्[3] ॥ १६ ॥
राधेयः कवचं ददौ शिबिरहो[4] मांसं बलिर्मेदिनीं
जीमूतोऽर्धवपुस्तथाऽपि न समा हम्मीरदेवेन ते । 10
येनोच्चैः शरणागतस्य महिमासाहेर्निमित्तं क्षणा-
दात्मा पुत्रकलत्रभृत्यनिवहो नीतः कथाशेषताम् ॥ १७ ॥
द्वौ नञौ[5] प्रस्तुतार्थं प्रवदत इतिवत् क्ष्माभृता द्विः प्रयुक्ता-
मौचित्याद् याहि याहीति वचनरचनां स्वार्थसंस्थां विधाय ।
यस्तिष्ठन्नप्यलुम्पन्न खलु निजविभोः शासनं स्वामिभक्तः 15
ख्यातस्तेनैव नाम्नाऽपि च जयतु चिरं चाहमानः स जाजा ॥१८॥
श्रीकाम्बोजकुलाब्धिवर्धनविधुर्निर्व्याजवीरव्रतोऽ-
हङ्कारैकनिकेतनं स महिमासाहिः कथं वर्ण्यते ।
हित्वैकं तमलक्ष्यमक्षितनयं[6] हम्मीरवीरं तथा
प्राणान्तेऽपि पुरः परस्य न पुनर्यो नानमत्[7] स्वं शिरः ॥ १९ ॥ 20
नैव स्वं स्वेन हन्यादिति कुलचरितं पालयन् यो गृहीतो
जीवन् म्लेच्छाधिपाग्रे सदसि पदतलं दर्शयंश्च प्रविष्टः ।
कर्त्ता त्वं जीवितः किं मयि च तदुदितः प्रोक्तवान् यद्धमीरेऽ-
कार्षीस्त्वं तेन साम्यं कलयति महिमासाहिना कोऽत्र वीरः ॥ २० ॥
आजौ पादतलेन दर्शितवतो हम्मीरभूभृच्छिरः 25
पृष्टस्तेन[8] तदर्पितांश्च गदतस्तांस्तान् प्रसादानपि ।
खलं ते[9] रतिपाल! यच्छकपतिर्निष्कासयामासिवान्
तद् युक्तं त्वमिवान्यथा कति पुनर्द्रुह्यन्ति न स्वामिने ॥ २१ ॥

*

1 K धिक् त्वां रे! रति°। 2 P धीशूर!। 3 K द्वयम्। 4 K शबिरहो 5 K नञौ। 6 K तमलक्षमक्ष°। 7 K °नीनमत्। 8 K पृष्टांस्तेन। 9 K खलखलं रतिपाल! ते शक°।

काव्यकर्तुः प्रशस्तिः ।

जयति जनितपृथ्वीसम्मदः कृष्णगच्छो
विकसितनवजातीगुच्छवत् स्वच्छमूर्तिः ।
विविधबुधजनालीभृङ्गसङ्गीतकीर्तिः
कृतवसतिरजस्रं मौलिषु च्छेकिलानाम् ॥ २२ ॥

तस्मिन् विस्मयवासवेश्मचरितश्रीसूरिचक्रे क्रमात्
जज्ञे श्रीजयसिंहसूरिसुगुरुः प्रज्ञालचूडामणिः ।
षड्भाषाकविचक्रशक्रमखिलप्रामाणिकाग्रेसरं
सारंगं सहसा विरङ्गमतनोद् यो वादविद्याविधौ ॥ २३ ॥

श्रीन्यायसारटीकां नव्यं व्याकरणमथ च यः काव्यम् ।
कृत्वा कुमारनृपतेः ख्यातस्त्रैविद्यवेदिचक्रीति ॥ २४ ॥

तदीयगणनायकः क्रमनमज्जनत्रायकः
प्रसन्नशशभृत् प्रभुर्जयति वादिभेदिप्रभः ।
यदीयपदपङ्कजे भ्रमिरभृङ्गलीलायितं
श्रयन्ति महतामपि क्षितिभृतां सदा मौलयः ॥ २५ ॥

तत्पट्टाम्भोजचञ्चत्तरखरकिरणः सर्वशास्त्रैकबिन्दुः
सूरीन्दुः श्रीनयेन्दुर्जयति कविकुलोदन्वदुल्लासनेन्दुः ।
तेने[1] तेनैव राज्ञा स्वचरिततनने स्वप्नतुन्नेन कामं
चक्राणं काव्यमेतन्नृपतितितिमुदे चारु वीराङ्करम्यम् ॥ २६ ॥

पौत्रोऽप्ययं कविगुरोर्जयसिंहसूरेः काव्येषु पुत्रतितमां नयचन्द्रसूरिः ।
नव्यार्थसार्थघटनापदपङ्क्तियुक्तिविन्यासरीतिरस[2]भावविधानयत्नैः† ॥ २७ ॥

श्रीहर्षामरयोः कविप्रवरयोर्वाक्कल्पवल्लीं निजा-
मुद्यान्तीमभिवर्षतो नवनवैः पीयूषधारारसैः ।
मन्नाग्यानिलखेलनैरपहृता या विप्रुषः काश्चिद-
प्यासामेव निषेकशाद्वलतमः सोऽयं मदुक्तिश्रमः ॥ २८ ॥

जल्पन्त्येके कवीन्द्राः सरसमनुभवादेव कुर्वन्ति काव्यं
तन्मिथ्या हन्त! नो चेत् तदिह विदधतां तद्वतां येऽपि धुर्याः ।
एषोऽस्माकं प्रसादः सततमपि गिरां देवतायाः स्मृतायाः[3]
धत्ते लालित्यमुच्चैः खलु चपलदृशां पुण्यतारुण्यमेव ॥ २९ ॥

---

1 K तेनैतेनैव । 2 K °रसबोध° । † K प्रतौ सप्तविंशतितमे श्लोके पूर्वार्ध-उत्तरार्धयोर्वैपर्यत्यं लभ्यते । 3 P प्रतौ 'स्मृतायाः' इति पाठः पतितः ।

काव्ये काव्यकृतां न चास्त्यनुभवः प्रायः प्रमाणं न चेत्
प्राहुस्ते कविधर्म एष इति किं प्रत्याहतास्तार्किकैः ।
को नामानुबभूव चन्द्रसुरभिं कुन्दोज्ज्वलां कौमुदी-
सीतां कीर्तिमतोऽन्यथोदितगुणस्फीतामकीर्तिं च कः ॥ ३० ॥
वाणीनामधिदेवता स्वयमसौ ख्याता कुमारी ततः
प्रायो ब्रह्मवतां स्फुरन्ति सरसा वाचां विलासा ध्रुवम् ।
कुक्कोकः सुकृती जितेन्द्रियचयो हर्षः स वात्स्यायनो
ब्रह्माङ्गप्रवरो महाव्रतधरो वेणीकृपाणोऽमरः ॥ ३१ ॥
शृङ्गारेऽनुभवो व्यतर्क्यततमां मूढैरिहोच्चैर्यकः
सुप्तः किन्तु स कः पुरेषु यदयं नैकप्रकाशीप्रभा ।
तद्वन्ध्यासुतलालनामिव वृथा वैकल्पिकीं कल्पना-
माकल्पं परिकल्प्य जल्पततमां धैर्यं धियां केवलम् ॥ ३२ ॥
ये शृङ्गारकथां प्रथां विदधते वाचां विलासै रस-
प्रोल्लासान्न[1] समस्ति तेष्वनुभवो येष्वस्ति तेऽन्ये पुनः ।
वर्ण्या ये वदनेषु कुन्दविशदाः स्तम्बेरमाणां रदा
नैते चर्वणसाधनं तदिह ये दुर्लक्ष्यरूपा[2]स्तु ते ॥ ३३ ॥
काव्यं काव्यप्रकाशादिषु रसबहलं कीर्त्तयन्त्युत्तमं यत्
तन्नो भावैर्विभावप्रभृतिभिरनभिव्यक्तमुक्तैः कदाचित् ।
तेनेति व्यक्तमुक्तं सरसजनमनःप्रीतये काव्यमेतत्
कश्चिच्चेन्नीरसोऽस्मिन् भजति बत मुदं नो तदा कोऽस्य[3] दोषः ॥३४॥
वदन्ति काव्यं रसमेव यस्मिन् निपीयमाने मुदमेति[4] चेतः ।
किं कर्णतर्ण[5]र्णसुपर्णपर्णाभ्यर्णादिवर्णार्णवडम्बरेण ॥ ३५ ॥
रसोऽस्तु यः कोऽपि परं स किञ्चिन्नास्पृष्टशृङ्गाररसो रसाय ।
सत्यप्यहो पाकिमपेशलत्वे न स्वादु भोज्यं लवणेन हीनम् ॥ ३६ ॥
कविता वनिता गीतिः प्रायो नादो रसप्रदाः ।
उद्गिरन्ति रसोद्रेकं ग्राह्यमानाः पुरः पुरः‡ ॥ ३७ ॥
प्रायोऽपशब्दादिकृतोऽपि दोषो न चात्र चिन्त्यो मम मन्दबुद्धेः ।
न कालिदासादिभिरप्यपास्तो योऽध्वा कथं वा तमहं त्यजामि ॥ ३८ ॥
प्रायोऽपशब्देन न काव्यहानिः समर्थतार्थे रससेकिमा चेत् ।
वादेऽप्यसौ नो विदधीत किञ्चिद् यदि प्रतिज्ञा विरमेन्न विज्ञः* ॥३९॥

1 P प्रोल्लासोत्र । 2 K दुर्लक्ष° । 3 P कस्य दोषः । 4 K शममेति तापः । 5 K तर्णकर्ण° । † K प्रतौ द्वात्रिंशत्तमः श्लोको नास्ति । ‡ K प्रतौ सप्तत्रिंशत्तमः श्लोकश्चत्वारिंशत्तमश्लोकानन्तरमस्ति । * K नास्ति पद्यमिदम् ।

वाणी वाणीविलासात् प्रसरति विदुषां तेन शब्दापशब्दौ
प्रायश्चेतोविकल्पौ[1] कविमतवशगा शब्दशास्त्रेऽपि सिद्धिः ।
मन्त्वैवं[2] माऽपशब्दं वदत सहृदयाः प्रौढकाव्यप्रयुक्ता
द्वित्राश्चेत् तेन वृद्धिं भजति कथमसौ तर्हि वाग्ब्रह्मकोशः† ॥४०॥

भवन्ति काव्येषु महाकवीनां यत्नैव भावा अशुभाः शुभा वा ।
प्रदर्शितास्ते कतिचित् ततीह न चेन्महाकाव्यमिदं कथं तत् ॥ ४१ ॥

क्षन्तव्य एव कविभिः कृपया प्रमादात् काव्येऽत्र कश्चिदपि यः पतितोऽपशब्दः ।
प्रीतिर्यथाऽस्तु सुहृदामथवा सुशब्दैः किं सा तथास्त्वसुहृदाम[3]पि माऽपशब्दैः ॥

काव्यं पूर्वकवेर्न काव्यसदृशं कश्चिद् विधाताऽधुने-
त्युक्ते तोमरवीरमक्षितिपतेः सामाजिकैः संसदि ।
तद्भ्रूचापलकेलिदोलितमनाः शृङ्गारवीराद्भुतं
चक्रे काव्यमिदं हमीरनृपतेर्नव्यं नयेन्दुः कविः[4] ॥ ४३ ॥

हंसाः सन्तः क्व येषां गुणपयसि रतिर्नो रतिर्दोषवारि-
ण्यादर्शाः सन्तु किन्तु प्रतिफलति गुणो दूषणं वाऽपि येषु ।
तेऽमी तिष्ठन्तु दूरे क्वचन तितउवो दूषणं कीकसं[5] ये
बिभ्रत्युच्चैरधश्चोज्ज्वलगुणसमिता संचयं विक्षिपन्ति[6]‡ ॥ ४४ ॥

राजानो युधि बद्धविक्रमरसाः कुर्वन्तु राज्यं मुदा[7]
तेषां विक्रमवर्णने च कवयः शश्वद् यतन्तांतमाम् ।
अश्रान्तं च समुल्लसन्त्विह रसैर्वाचः सुधासेकिमाः
स्वादुंकारमिमाः पिबन्तु च रसास्वादेषु ये सादराः ॥ ४५ ॥

पीत्वा श्रीनयचन्द्रवक्त्रकमलाविर्भाविकाव्यामृतं
को नामामरचन्द्रमेव पुरतः साक्षान्न पश्येद् ध्रुवम् ।
आदावेव भवेदसावमरता चेत् तस्य नो बाधिका
दुर्वारः पुनरेष धावतुतमां हर्षावलीविभ्रमः ॥ ४६ ॥

॥ इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचन्द्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीराङ्के कविवाक्यवर्णनो नाम चतुर्दशः सर्गः ॥

॥ समाप्तमिदं श्रीहम्मीरमहाकाव्यम् ॥

---

1 P विकल्पः । 2 K मात्वैवं । † K प्रतौ चत्वारिंशत्तमः श्लोकः द्विचत्वारिंशत्तम-श्लोकानन्तरं विद्यते । 3 K °सुहृदामिह । 4 K नव्यं काव्यमिदं हमीरनृपतेश्चक्रे । 5 P कीकशं । 6 P विक्षिपन्ति । 7 K चिरं । ‡ '४३-४४' इत्यङ्कचिह्नितौ श्लोकौ पौर्वापर्येण लिखितौ लभ्येते K प्रतौ ।

शिष्यकृता काव्यकर्तृप्रशस्तिः ।

*

कार्यात् कारणसंविदं विदधते नैकान्तमुत्सृज्य यत्
तत् तेषामिव नोऽपि कर्हिचन किं चेतश्चमत्ताचिकीः ।
नैवं चेन्नयचन्द्रसूरिसुकवेर्वाणीं विधायामृतं
श्रीहर्षं तमथामरं तमपि तत् किं संस्मरेयुर्बुधाः ॥ १ ॥

काव्यानां त्रितयीं व्यरीरचदिमां यां कालिदासः कलां
सृष्टौ गाधिसुतस्य साऽर्हति न चेत् का नाम तत्रास्तु सा ।
चक्रुर्यां कवयो नयेन्दुरमरो हर्षश्च नानारसैः
सर्गे ब्रह्मण एव सा तु घटते तस्यैव संवादतः ॥ २ ॥

नयचन्द्रकवेः काव्यं रसायनमिहाद्भुतम् ।
सन्तः स्वदन्ते जीवन्ति श्रीहर्षाद्याः कवीश्वराः ॥ ३ ॥

लालित्यममरस्येव श्रीहर्षस्येव वक्रिमा ।
नयचन्द्रकवेः काव्ये दृष्टं लोकोत्तरं द्वयम् ॥ ४ ॥

काव्यं काव्ययशोऽर्थिनां रचयतां सम्यक् कृतत्वस्य नो
प्रीयेतोपचयो न चाप्युपचयः कश्चित् कवीनां स्फुटम् ।
यस्माच्छुद्धमशुद्धमाहुरनयोर्विज्ञापनाकारणं
तत् तेषां मनसैव रुद्धमभितः कुत्रावकाशस्तयोः ॥ ५ ॥

यशोऽर्थिनां काव्यकृतां कवीनां पुण्यं च पापं च न किञ्चिदेव ।
पुण्यस्य पापस्य च यन्निदानं मनस्तदेषां यशसैव रुद्धम् ॥ ६ ॥

संवत् १५४२ वर्षे श्रावणे मासि श्रीकृष्णर्षिगच्छे श्रीजय-
सिंहसूरिशिष्येण नयहंसेनात्मपठनार्थं श्रीपेरोजपुरे
हम्मीरमहाकाव्यं लिलिखे । कल्याणमस्तु ।
भद्रं भूयात् संघस्य । ग्रन्थाग्रः १५६४ ।

* *
*

हम्मीरमहाकाव्यदीपिका।

॥ स्वस्ति श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै श्रीविघ्नेशाय च नमः ॥

तरुणतरतरणिकिरणश्रेणीकरणिर्यदीयवाक्सरणिः ।
अज्ञानतिमिरचक्रे पतितस्य श्रीगुरुर्जयति ॥ १ ॥
तात इव सुधीः सर्गे पतिरिव वृत्तौ रसार्थहृद्वेदी ।
एतत्फलः प्रयासो वृत्तिकृतः सुकृतकीर्त्ती च ॥ २ ॥

इह हि श्रीश्वेताम्बरमतगगनकराः श्री**कृष्णर्षिगच्छाम्बुधिकुमुदबन्धवः श्रीजयसिंहसूरि**चरणरेणुपरमाणवः **श्रीमन्नयचन्द्रसूरयः** स्वकविचक्रचक्रवर्त्तित्वख्यापनार्थं श्री**हम्मीरकाव्य**सूत्रं सूत्रयांचक्रुः। तत्र चास्य विवरणकर्तुर्गुरुभक्तिपर्यवसाना श्रेयस्करी प्रवृत्तिराढौकते। अत एव प्रेक्षावत्प्रवृत्तेः प्रयोजनाविनाभूतत्वमभिद्योतितं भवति। संबन्धश्चात्र वाच्यवाचकलक्षणः सुव्यक्त एव। इत्थमत्र सर्वोऽप्युपोद्घातः शास्त्रमुखसंदर्भे प्रतीयमानः प्रकटीचक्रे। यदुक्तं तत्र कौमुद्यामुपोद्घातलक्षणम्—

स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम्।
संबन्धाद्यभिधानं च उपोद्घातः स उच्यते ॥ १

नायकश्चात्र **हम्मीरदेवः**। 'समग्रगुणः कथाव्यापी नायकः'—इति नायकलक्षणं श्रीहेमाचार्याः [प० १. १] प्रोचुः। नायकभेदश्चात्र धीरोद्धतः। तल्लक्षणं चेदम्—'शूरी मत्सरी मायी विकत्थनः छद्मवान् रौद्रोऽवलिप्तो धीरोद्धतः'—इति। प्रतिनायकश्चात्राल्लाव**दीनः**। रसश्चात्र युद्धात्मा वीरः अङ्गम्। अन्ये शृंगारादयोऽङ्गिनः। बीजं चात्र धर्मादिषु सकलपुरुषार्थेषु परमार्थभूतं श्री**हम्मीरदेवस्य** सत्त्वम्। एतस्मिन् महाकाव्ये प्रतिवृत्तं रसाः भावाः अलंकाराः तदाभासाश्च छंदांसि च यथावृत्तं समर्थयिष्यन्ते।

इह च शिष्टाचारपरिपालनाय शास्त्रादिमङ्गलप्रकटनाय प्रारब्धाविघ्नसमाप्तये च सकलपुरुषार्थफलदातारं समस्तदर्शनध्येयं निखिलवर्णज्ञातिप्रकृतिमनुजमान्यं भव्यान्तःकरणेषु साक्षादिव वसन्तं परमात्मानं श्रीपूज्याः प्रथमपद्ये प्रणिधानविषयीकुर्वते—

१. सदा चिदेति। तदिति कर्म। व(बु)द्धेः वक्तुं ज्ञातुं चाशक्यं परंज्योतिः परमात्मानं वयं उपास्महे। उपासनाविषयीकुर्महे। ननु विगतमानाभिनिवेशाः श्रीगुरवः, तत् कथमात्मानं बहुत्वेन ख्यापयांचक्रुः ? उच्यते। ते सर्वे धर्ममोक्षार्थिनः अहं च प्रक्रान्तशास्त्रसूत्रधारो **नयचन्द्राचार्यः** इति। युगपद्वचने 'परः पुरुषाणाम्' इति कुमारसूत्रेण सिद्धम्। तदुपासनाफल[प० २. १]गर्भितं परंज्योतिषो विशेषणमाहुः—सदेति। **सदा नित्यं चिदानन्दो** ज्ञानानन्दः कैवल्यमिति यावत्। तस्य **महोदयः** **महाप्रादुर्भावस्तस्मिन्**

एकः अद्वितीयः हेतुः कारणं निदानमिति यावत् । यद्वा, सदा चिदानन्दात् कैवल्यात् यो महोदयः मोक्षः तस्य एकहेतुर्मुख्यं कारणं समवायरूपं प्रधाननिमित्तरूपं वा यत् तत्, तत्० तत् । अत्र हेतुशब्दस्य नित्यपुल्लिङ्गत्वात् विशेष्यस्य नपुंसकत्वात् लिङ्गभेदेऽपि न दोषः । यदुक्तं श्री[हे]माचार्यैः—'तदार्जवमहौषध्याज्जगदानन्दहेतुना' इति । अथ उत्तरार्द्धे तदुपासनाफलगर्भितामुपमामाहुः । प्रथमार्द्धगतो हि 'तत्'शब्दो 'यत्'शब्दमपेक्षत इति । यस्मिन् परमज्योतिषि शिवश्रीर्मोक्षलक्ष्मीः रंरमीति । भृशामीक्ष्णतया रमत इत्यर्थः । यङ्लुगन्तं परस्मैपदमिति सिद्धम् । कस्मिन् केव? सरसि हंसीवेति साधर्म्योपमा । साधर्म्यं रमणक्रियापेक्षं चात्र । सर्वात्मकतया साधर्म्ये इदमुपमानमिदमुपमेयमिति द्वैतं संबन्धाभिव्यञ्जकं न स्यात् । सर्वथा ऐक्यापत्तेः । उपमालक्षणं तु 'हृद्यं साधर्म्यमुपमे'त्यूचु[ः] श्रीहेमसूरयोऽलंकारचूडामणौ । अत्र यत् हृद्यत्वं तदेवालङ्कारतया कल्पते । न तु केवलं साधर्म्यमिति परमार्थः । [पृ० २. २] केवलसाधर्म्याङ्गीकार(रे) चन्द्रमुखीवत् घटमुख्यपि स्यात् । वृत्तता-साधर्म्यस्य सत्त्वात् । परंज्योतिषः सरसश्च सश्लेषं विशेषणमाहुः—विशुद्धीति—विशुद्धिं आत्मनो वैमल्यं कृन्तन्ति छिन्दन्तीति विशुद्धिकृतो रागादयः तान् वारयितुं शीलमस्येति तत्, तस्मिन् । 'कृतैत् छेदने' तौदादिके क्विबा सिद्धम् । सरःपक्षे, विशुद्धिकृन्नैर्मल्यकृद् वारि यस्य तत्, तस्मिन् । अलङ्कारश्चात्रोपमा प्रागुक्तैव । रसश्चात्र शान्तस्तृष्णाक्षयं बीजम् । छन्दश्चात्र सर्गे इन्द्रवज्रोपेन्द्रवज्रयोः सांकर्यमुपजातिः । यदाहुः छन्दश्चूडामणौ श्रीहेमसूरयः—'तौ जागाविन्द्रवज्रा । जतजागावुपेन्द्रवज्रा ।' एतयोः परयोश्च संकरः उपजातिश्चतुर्दशधा सर्वजातीनामपीति वृद्धा इति । एतन्महाकाव्यं श्रव्यमित्यलङ्कारचूडामणौ । न तु प्रेक्ष्यम् । महाकाव्यलक्षणं चेदम्—'पद्यं प्रायः संस्कृतप्राकृतापभ्रंशग्राम्यभाषानिबद्धभिन्नान्त्यवृत्तसर्गाश्वाससन्ध्यवस्कन्धबन्धं सत्सन्धि शब्दार्थवैचित्र्योपेतं महाकाव्यमिति ।' ॥ १ ॥

पूर्वं सर्वसाधारणं परमात्मानं मङ्गलत्वेनाभिधाय तदनुस्वमतपरमतावपेक्ष्य द्वितीयपद्ये श्रीऋषभं ब्रह्माणं च मङ्गलत्वेनोपाददते—

२. तत् ज्ञानेति । स इति अनन्तगुणभृ[त]त्वाद् अस्मादृशां ज्ञानविषयात् परोक्षः । तच्छ[पृ० ३. १]ब्दस्य परोक्षत्वाभिव्यञ्जकत्वात् । नाभिभूः ऋषभः, नाभेः कुलकरात् भूरुत्पत्तिर्यस्येति । पक्षे, नाभेः विष्णुशरीरावयवाद् भवतीति नाभिभूः ब्रह्मा । वो युष्माकमाराधकानां शिवाय मुक्ताय कल्याणाय वा त्वरतां औत्सुक्याय कल्पतामित्यर्थः । श्लेषेन(ण) द्वयोरप्येकं विशेषणमाहुः—पद्माश्रयः—पद्मानि अतिशयात् देवनिर्मितानि आश्रयश्चरणापेक्षया यस्येति । पक्षे, पद्मं विष्णुनाभिकमलं आश्रयस्तत्र स्थितत्वात् यस्येति वा । पुनर्वैशिष्ट्यं कॢप्तेति—कॢ(कॢ)प्तं कृतं भवस्य संसारस्यावसानं प्रान्तो भक्तानामात्मनश्च येन सः । पक्षे, कॢ(कॢ)प्तं स्वचेतसा स्ववाचा च कल्पितं भवस्य शम्भोरवसानं लिङ्गप्रान्तो येनेति । यत्तदोर्नित्याभिसंबन्धात् स इति कः? सन्तः सुधियः यं परब्रह्ममयं परज्ञानमयं कैवल्य-

प्रधानं वाऽऽहुरूचुः । किंविशिष्टाः ? तदिति—तस्य परब्रह्मणो ज्ञानविज्ञाने कृतमवधानं सावधानता यैस्ते ॥ २ ॥

३. अथ च श्रीपार्श्वं विष्णुं च मङ्गलाय श्लेषेणाभिष्टुवन्ति—यशो० । श्रीपार्श्वः अर्हन् । पक्षे, श्रीर्लक्ष्मीः पार्श्वे समीपे यस्येति विष्णुः । अतन्वीं बह्वीं श्रियं मुक्तिलाभरूपां निजसायुज्यपददानरूपां वा वो युष्माकं सेवकानां तनुतात् विस्तारयत्वित्याशीः । विशेषण-[प० ३. २]चतुष्टयी श्लेषद्वये व्याख्यानीया । यशो-दयाभ्यां कीर्ति-कृपाभ्यां स्फीततरा अति-स्थूला प्रवृत्तिः प्रवर्त्तनं विहारो यस्येति । पक्षे, यशोदया नन्दपत्न्या हेतुभूतया कृत्वा योज्यम् । गौः स्वर्गः पृथिवी च तां पालयन्ति ये ते गोपालाः सुरनरेन्द्राः । तेषां माल्या तत्श्रेण्या पूजितचरणाम्बुजः । पक्षे, गाः धेनूः पालयन्ति ये ते गोपालाः बल्लवाः । श्रीवत्सः सामुद्रिकशास्त्रप्रसिद्धं महापुरुषकायलक्षणम् । स एव लक्ष्म चिह्नं यस्येत्युभयत्र तुल्यम् । पुरुषेषूत्तम इति सुबोधम् ॥ ३ ॥

४. उच्चैर्वृषो० । अथ पुनः श्रीवीरं शङ्करं च ऐहिकामुष्मिकविघ्ननाशाय प्रणि-दधति । श्रियं शं च करोतीत्येवंगुणविशिष्टो वीरविभुर्वर्द्धमानस्वामी, विभूत्यै विशिष्टभूत्यै मोक्षलक्ष्म्यै, भवत्विति क्रियापदं कर्त्तुः शक्तिबलाद् गम्यते । पक्षे, विशेषेण ईरयति गजपूषादीन् इति वीरः । एकरूपेण त्रि(त्रै)काल्यव्यापी विभुः । समस्तमूर्त्तसंयोगी वा विभुः । वीरश्चासौ विभुश्च सः । एवंगुणविशिष्टः श्रीशङ्करः श्रीमहेशः विभूत्यै लक्ष्म्यै अणिमाद्य-ष्टविधायै वा भवतु । अन्यद्विशेषणषट्कं पक्षद्वये योज्यम् । उच्चैरुन्नतः वृषो धर्मो महाव्रत-लक्षणो यस्येति स वर्द्धमानः । शङ्करपक्षे, उच्चैर्वृषो [प० ४. १] बलीवर्दो वाहने यस्य सः । दर्पकः कामः तस्य दर्पं मानं हरतीत्येवंश(शी)ल उभयत्र तुल्यम् । शिवैर्मङ्गलैरनुयातोऽनु-गतः । पक्षे, शिवया गौर्या । विलसन्ती विभूतिः श्रीरतिशयप्रातिहार्यादिका यस्मिन्निति । पक्षे, विलसन्ती विभूतिरणिमादिका, भस्म वा यस्मिन् । शुभ्रा निर्मला स्थितिराचारो यस्येति । पक्षे, शुभ्रोज्ज्वला स्थितिः कायसंस्था यस्येति । निर्दलितः क्षपितः स्वकायकान्त्या सूर्याचन्द्र-मसोर्युगपदागमनेन वान्धकारं तमो येन सः । पक्षे, निर्दलितान्धकस्य दैत्यविशेषस्यारो भ्रमणं येनेति ॥ ४ ॥

५. सच्चक्रेति । स इति स्मृतिविषयमुपनीतः । शान्ति[:] षोडशस्तीर्थकृत् । शम्या-न्मरकमित्याशास्यमानः शान्तिः । अघानि पातकानि शमयतु । शाम्यन्त्यघानि तानि शा-म्यन्ति(?) श्रीशान्तिः प्रयुंक्ते । प्रयोक्तृव्यापारे णिग् । 'शमोऽदर्शने' इति हैमसूत्रेण ह्रस्वत्वं सिद्धम् । पक्षे, भास्वान् सूर्यः अघानि शमयतु प्राग्वत् । किंभूतः श्रीशान्तिः ? भास्वान्—देदीप्यमानः भाः विद्यते यस्येति । किंभूतो भास्वान् ? सशान्तिः सह शान्त्या वर्त्तते इति । किं०ष्टः शान्तिः ? सत् शोभनं अमोघं चक्रं सार्वभौमचिह्नं यस्य सः । प्रीतिकरैः एवंभूतैः प्रभाविभिः सातिशयैः प्रभाविशेषैः [प० ४. २] कान्तिविशेषैः, सुभगंभविष्णुः—असुभगः सुभगो भवत्यनेनेति सुभगंभविष्णुः । 'नग्नपलिते'ति सूत्रेण सिद्धम् । सूर्यपक्षे, प्रभाः

चक्रवाकाः पक्षिविशेषाः । 'चक्रवाको रथांगाह्व' – इत्यभिधानचिंतामणिः । पु० किं०ष्टः ? सम्यक्प्रबोधस्य सम्यग्ज्ञानस्य यत् प्रथनं विस्तारः, तत्र प्रभूष्णुः–प्रभवितुं शीलमस्येति प्रभूष्णुः । भूजेः ष्णुरिति सिद्धम् ॥ ५ ॥

६. महेशेति । समुद्रजन्मा नेमीश्वरः । समुद्रात् यदुनृपात् जन्म यस्येति । शशभृत्- श्रिये चन्द्रलक्ष्म्यै अमृतकलायै स्तात् भवतु । श्रिये इति तादर्थ्ये चतुर्थी । पक्षे, शशिभृत् चन्द्रः श्रिये शोभायै स्तात् । किंभूतः ? समुद्रात् सागरात् जन्म आविर्भावो यस्य सः । विशेषणपञ्चकं पक्षद्वये योज्यम् । महान्तश्च ते ईशाश्च महेशाः । वृ(पृ?)षोदरादित्वात् सिद्धम् । महेशानां सुरनरेन्द्राणां चूडामणिभिर्मुकुटरत्नैः चुम्ब्याः चुम्बनार्हाः पादाः क्रमाः यस्य सः । चुम्बन इव परस्पराश्लेषत्वात् उपचारात् लक्षणया चुम्बनशब्दः प्रवृत्तः । पक्षे, महेशस्य शम्भोः चूडामणौ चुम्बनार्हाः पादाः किरणाः यस्य सः । अभ्रान्ता भ्रान्तिरहिता स्थितिर्व्यवस्था यस्य सः । पक्षे, अभ्रस्याकाशस्यान्ते स्थितिरवस्थानं यस्य सः । स्फीतः प्रवृद्धः आमेरोः शुभप्रचारः शुभगमनं यस्य सः । पक्षे, स्फीतः प्रवृद्धः सूर्यात् त्रयोदशगुणः सुतरां भेषु नक्षत्रेषु प्रकृष्टश्चारो यस्येति । महद्गुरु महस्तेजो यस्य सः । उभयत्र योज्यम् । तमः पातकम् । पक्षे, अन्धकारम् । शुभ्रशब्दस्य यमकश्लेषचित्रेषु बवयोर्डलयोः शसयोर्न[प० ५.१] भेदः इत्यदोषः । महामहेति 'आकारो महतः कार्ये'ति कुमारसूत्रेण सिद्धम् ॥ ६ ॥

स्वपरमतावपेक्ष्य देवसमुदायं संस्तूयाधुना शब्दाधिदेवतां नदीं च श्लेषेण मङ्गलाया- भिष्टुवन्ति –

७. लसत्केति । सरस्वती शब्दाधिदेवता नदी च । नोऽस्मान् गौणकर्मतापन्नान् प्रसत्तिं प्रसादं नैर्मल्यं च नयतात् प्रापयतु । द्विकर्म्मको धातुः । किं०ष्टा सरस्वती ? लसद्भिर्दीप्यमानैः कविस्तोमैः कविसमूहैः कृता उर्वी गरिष्ठा भक्तिर्यस्याः । नदीपक्षे, कं पानीयं विः पक्षी लसद्भिः कविस्तोमैर्जलपक्षिसमूहैः कृता उर्वी भक्तिर्विच्छित्तिर्यस्याः सेति । पु० किं०ष्टा ? अलीकलीलया मृषालीलया सुभगंभविष्णुः – असुभगा सुभगा भवति अन- येति सुभगंभविष्णुः । एवंभूता न, किं तु सत्येति । नदीपक्षे, नालीकं कमलं तेषां लीलया । 'बिश(बिस)प्रसूनं नालीक'मिति हैमकोशः । पु० किं०ष्टा ? स्वदर्शनेन आत्माविर्भावेन त्रिजगत् विश्वं पुनाना पवित्रयन्ती । पक्षद्वये तुल्यम् । पुनानेति – 'पूङ् यजः शानः' इति हैमसूत्रेण सिद्धः । अत्र वृत्तषट्के श्लेषोऽलंकारः । तल्लक्षणम् – 'अर्थभेदे भिन्नानां शब्दानां भंगाभंगाभ्यां युगपदुक्तिः श्लेषः' – इत्यलंकारचूडामणौ ॥ ७ ॥

८. आदिमंगलमभिधाय ग्रन्थकथासूचकं पद्यमाहुः – **मान्धातृ इति** । नाम इति संभवामि । क्षितौ भूमौ क्षितीन्द्राः नृपाः कति [प० ५.२] नासन् बभूवुः । मान्धाता कृतयुगे । शीताप्रतिः रामः त्रेतायुगे । कंको युधिष्ठिरः द्वापरे । मांधाता च सीतापतिश्च कंकश्च ते एव मुख्याः येषां ते । तेषु नृपेषु सत्त्वगुणेन निर्धारितः एषः समीपवर्त्ती कलि-

युगोत्पन्नः एकः हम्मीरमहीभृत् नृपः परं प्रकृष्टं स्तवार्हः स्तुतियोग्यो वर्तते इति योज्यम् ॥ ८ ॥

९. **सत्त्वैकेति**। किल इति सत्ये। यस्य **हम्मीरदेव**स्य सत्त्वगुणे एका वृत्तिः वर्तनं यस्य सः, तस्य । शकाय **अल्लावदीन**राज्ञे पुत्रीं **देवलदेवीं** शरणागतान् **महिमासाहि**-प्रभृतींश्च अप्रयच्छतः अददानस्य राज्यश्रियो राज्यलक्ष्म्यः विलासा भोगाः जीवितं चापि किं तृणमपि अभूवन् । अपि तु तृणमपि न बभूवुः । 'किं'शब्दो निषेधार्थः । अत्र सत्त्वगुणस्य अतिशयख्यापनात् अतिशयोक्तिरलंकारः । लक्षणं चेदम्—'विशेषविवक्षया भेदाभेदयोगायोगव्यत्ययोऽतिशयोक्तिः' ॥ ९ ॥

१०. **अत इति**। हेतुकथनम्। हेतुश्चात्र सत्त्वगुणव्यावर्णनात् पुण्यार्जनम्। अहं **नयचन्द्राचार्यः** अस्य **हम्मीरदेव**स्य। किंचित् स्तोकम्—किमप्यल्पं चिनोतीति किंचित्। चरितं आचारं राजन्यानां नृपाणां पुपूषया पवितुमिच्छया प्रवक्तुमिच्छामि । पुपूषयेति 'पूंङ्‌ पवने' इति धातोः सन्नन्तेन सिद्धम् । किल इति सत्ये । तदीयाः **हम्मीरदेव**सम्बन्धिनस्ते ते औदार्यादयो ये गुणाः तेषां गौरवं गुरुत्वं तेन । कर्णजाहं कर्णमूलं विगाह्य नुन्नः प्रेरितोऽहम् । कर्णजाहमिति [पा० ६. १] 'कर्णादेर्मूले जाह' इति सिद्धम् ॥ १० ॥

११. अथाचार्यः आत्मानं अल्पं ख्यापयन्नाह—**क्वैतस्येति**। एतस्य राज्ञो **हम्मीर**स्य सुमहत् सुतरां महत् गरिष्टं चरित्रं क्व । पुनश्चार्थे । अणुरेव सूक्ष्मैव एषा मे धिषणा प्रज्ञा क्व । क्व शब्दो महदन्तरे, विषमालंकारज्ञापकः । ततः किं सिद्धम्? अतिमोहात् अतिमौढ्यात् । मुग्धोऽहम् एकया भुजया बाहुना, एवशब्दोऽवधारणे, महासमुद्रं तितीर्षामि तर्तुमिच्छामि । भुजशब्दः पुंस्त्रीलिंगः । विषमोऽत्रालंकारः । लक्षणमिदम्—'क्रियाफलाभावोऽनर्थश्च विषमम्' ॥ ११ ॥

१२. यद्यशक्यानुष्ठानमेतत् तर्हि कथं कर्तुमुद्यत इत्यत्रार्थे हेतुमाह—**गुरुप्रसादादिति** । यदि वा पक्षांतरे। तदीयं—तस्येदम्। तदीयं **हम्मीर**सम्बन्धि यत् वृत्तं शीलं तस्य स्तवनं विधातुं कर्तुं गुरुप्रसादात् शक्तोऽस्मि । अत्र प्रतिवस्तूपमालंकारगर्भितम् । उत्तरार्द्धे प्रतिवचनमाह—सखेलं सलीलं यथा स्यादेवं तथा मृगो हरिणः ख आकाशे किं न खेलति? अपि तु खेलति । मृगस्य आकाशखेलने हेतुमाह—सुधाकरस्य चन्द्रस्य उत्संगे सरङ्गः सस्नेहलो यो योगः सम्बन्धः तस्मादिति। अलंकारः प्रा[ग्] उक्त एव। तल्लक्षणं वाग्भट आह—

अनुपात्ताविवादीनां वस्तुनः प्रतिवस्तुना ।
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ॥

१३. **हम्मीर**नराधिपः बभूव यत्, यत्तदोर्नित्याभिसम्बन्धात्, तद्धेतोः पुरा प्रथमं तदीयां **हम्मीर**सम्बन्धिनीं उत्पत्तिं प्रादुर्भावं अहं [पा० ६. २] **नयचन्द्राचार्यः** वच्मि ब्रवीमि । किं०ष्टः नराधिपः? श्री**चाहमानान्वयो** चाहमानवंशः तस्य मौलौ मस्तके

मौलिर्मुकुटं यः सः । कीदृशीमुत्पत्तिम् ? उत्पादितहर्षहेलाम् । उत्पादिता हर्षस्य हेला लीला यया सा, ताम् । कुतो वच्मि इत्याह — ऐतह्यतः पुरातनीवार्त्तायाः । 'वार्त्तैतह्यं पुरातनी' इति हैमः कोशः ॥ १३ ॥

१४. ऐतह्यमेवाह — **यज्ञायेति** । किलेत्याप्तप्रवादे । आदाविति युगादौ, कल्पादौ, पूर्वं वा । भ्रमतो विधातुर्ब्रह्मणः पाणिपद्मात् करकमलात् आशु तूर्णं पुष्करं कमलं प्रपेतिवत् पपात । 'तत्र क्वसु कानौ तद्वत्' इति हैमसूत्रेण परोक्षावत् सिद्धम् । विधातुर्भ्रमणे तु मंत(त्र?)गूढं तादर्थ्यमाह — क्वचन कस्मिंश्चित्स्थाने यज्ञाय यज्ञार्थं पुण्यं पवित्रं प्रदेशं क्षेत्रं ईक्षितुम् । उत्प्रेक्षते — पुष्करं अस्य पाणिपद्मस्य भासा कान्त्या पराभूतमिव जितमिव । अन्योऽपि पराभूतः पततीति वस्तुगतिः । उत्प्रेक्षालंकारः । लक्षणं चेदम् — 'असद्धर्म्मसंभावनमिवादिद्योत्योत्प्रेक्षा' इति अलंकारचूडामणौ सूत्रम् ॥ १४ ॥

१५. **तत इति** । ततः आनन्तर्ये । इह पुष्करपातलक्षणं शुभं स्थानं विभाव्य विमृश्य अयं ब्रह्मा स्थानलाता(भा)त् अपास्तदैन्यः गतदैन्यः प्रारब्धयज्ञः आरब्धयागश्च स्मेरस्य दीप्तस्य सहस्ररश्मेः सूर्यस्य सस्मार । सूर्यस्मरणे कारणमाह — किं कृत्वा ? दनुजव्रजेभ्यः दैत्यसमूहेभ्यः भीतिं भयं विशंक्य अनिष्टमुत्प्रेक्ष्य । दनुर्दैत्यमाता तया [प० ७. १] जाता दनुजाः, तेषां व्रजाः समूहाः, तेभ्यः । सहस्ररश्मेरिति स्मृत्यर्थे कर्म्मणि षष्ठी । दनुजव्रजेभ्य इति । पञ्चम्यपादाने इति । अपादानं भयहेतौ संभवति ॥ १५ ॥

१६. **अवातरदिति** । अथ अनन्तरं भासां पत्युः सूर्यस्य मण्डलतो बिंबात् पुमान् पुरुषः अवातरत् अवततार । कीदृशः पुमान् ? उद्यतः उत्पाटितो मंडलाग्रः खड्गो येन सः । तं च पुरुषं आतु(शु) शीघ्रं अदसीयरक्षाविधौ अभिषिच्य उत्तरसाधकीकृत्य एषः ब्रह्मा सुखेन विघ्नराहित्येन मखं यज्ञं व्यधाच्चकार । अमुष्यायं अदसीयः । अदसीयो यो रक्षाविधिः त्राणविधिस्तस्मिन् । 'दोरीयः' इति हैमसूत्रेण अदस्शब्दात् अदसीय इति सिद्धम् ॥ १६ ॥

१७. **पपातेति** । अत्र स्थाने पाणेर्हस्तात् पुष्करं कमलं पपात यत्, ततो हेतोः एतत् प्रसिद्धं समीपवर्त्ति पुष्करं तीर्थं ख्यातम् । च पुनः यद्धेतोः अयं पुमान् पुरुषः लघु शीघ्रं वीक्ष्यमाणः अभिलष्यमाणः अगात् आजगाम । अतः अस्माद्धेतोः स पुमान् **चाहमानः** इति अख्यायि पप्रथे । 'चाहीतउ' इति देशभाषया लोकोक्तिः ॥ १७ ॥

॥ **इति श्लोकचतुष्टये कथाकथनम्** ॥

*

१८. **तत इति** । ततः आनन्तर्ये । स **चाहमानः** क्षत्रियः चतुर्वक्त्रभवात् ब्रह्मोत्पन्नप्रसादात् सम्राजो भावः साम्राज्यं सार्वभौमत्वं आसाद्य प्राप्य गुरून् गरिष्ठानपि भूभृतो नृपान् आशु तूर्णं अर्कवत् सूर्यवत् पादाक्रान्तान् चरणमर्दितान् चक्रे चकार । [प० ७. २] यथा अर्कः सूर्यः भूभृतः पर्वतान् पादाक्रान्तान् किरणाक्रान्तान् करोति । उपमाश्लेषयोः संकरः । हेतोर्गम्यमानत्वात् । यतः अयं सूर्यः अस्य चाहमानस्य वप्ता जनयिता पितेत्यर्थः । पितुर्गुणविशिष्टः पुत्रो भवतीति न्यायः । उपमाश्लेषहेतूनां संकरोऽलंकारः ॥ १८ ॥

१९. **स्वदानेति** । स इति परोक्षकालवर्त्ती बलिर्वैरोचनिः दैत्यराजः यस्य चाह-मानस्य दानं समवेक्ष्य दृष्ट्वा पातालबिलं सिषेवे सेवयामास । पातालसेवाहेतुगर्भितं दानस्य विशेषणमाह—स्वदानेति । स्वदानात् जन्म यस्य तदेवंभूतं उरु गरिष्ठं यत् यशः तेन अर्जिता या श्रीः शोभा तां विलुम्पन्तीत्येवंशीलं यत्, तत् । अतिशयोक्तिः । अत्रार्थे अर्था-न्तरन्यासमाह—त्रपातुराणां लज्जार्त्तानां नीचैरवस्थानात् अपरा अन्या का गतिः? सैव गति-रित्यर्थः । अतिशयोक्ति-अर्थान्तरन्यासयोः संकरः ॥ १९ ॥

२०. **त्वमिति** । येन चाहमानेन रुषा कोपेन शशी चन्द्रः इति रुद्धः सन् दिव्यं प्रदातुमिव आत्मानं सत्यापयितुमिव । रवेर्बिम्बं मासि मासि प्रविश्य निर्गच्छति, अन्योऽपि दिव्य-दाता अग्नौ प्रविश्य निर्गच्छति । इतीति किम्? रे पाप! त्वं मदीयां कीर्त्तिं कामयसे अभिलषसि रमसे वा? अन्योऽपि परस्त्रीरन्ता पापशब्देन व्यपदिश्यते । भर्त्रा रुद्धश्च दिव्यं ददाति । अहं तव कीर्त्तिं न कामये इति दिव्यदाने हेतुः । कीर्त्तेर्हीनतरश्चन्द्रमा इति उपमातिरस्कारः । उत्प्रेक्षा-अतिशयोक्त्योः संकरः ॥ २० ॥ [पृ० ८. १]

२१. **प्रतापेति** । यस्यायं यदीयः । दोरीय इति । चाहमानसम्बन्धी प्रतापवह्नि-र्ज्वलितः सन् द्विषत्कीर्त्तिवनानि शत्रुकीर्त्तिवनानि तथा अधाक्षीत्, तथा दहति स्म । वह्नेर्वन-दहनस्वभावत्वात् । यथा येन प्रकारेण वियदाकाशं कालिमानं रागद्रव्यसंयोगं अद्यापि न जहाति न त्यजति । कुतः? तदुत्थधूमाश्रयतः । तस्माद् वह्नेः उत्थः उत्पन्नः यो धूमः वह्निचिह्नं तदाश्रयस्तत्सम्बन्धादिति हेतुकथनम् । पूर्वार्द्धे रूपकम्, उत्तरार्द्धे अतिशयोक्तिः ॥ २१ ॥

२२. **निशम्येति** । सुप्रीतमनास्तुष्टमनाः शेषो नागराजा महीतलध्वंसभिया भूतल-विनाशभयेन स्वं शिरः मस्तकं अकंपयन् अधुन्वानः तापं क्लेशं अवाप प्राप । सुप्रीतमनसः प्रीतिलक्षणमप्रकटयतः तापो भवतीति व्यवहारः । प्रीतमनस्त्वस्य यश(शो)गर्भितं हेतुमाह—यदीयां कीर्तिं निशम्य श्रुत्वा । कीदृशीं कीर्तिम्? विचित्रैर्नानाविधैः उरुभिर्गरिष्ठैः चरित्रैः रम्या या सा ताम् । अतिशयोक्तिरलंकारः ॥ २२ ॥

२३. **जयश्रिया इति** । यश्चाहमानः युधि संग्रामे अवाचीपवनायितोऽपि दक्षिण-दिक्वाताय(यि)तोऽपि मलयानिल इव आचरितोऽपि द्विजिह्वान् सर्पान् न सुखाचकार । न सुखाकरोति स्म । आनुकूल्येन सुखिनः करोति सुखाकरोति इति चित्रम् । 'प्रियसुखादानु-कूल्ये' इति हैमसूत्रेण सिद्धम् । अन्योऽपि मलयानिलायितः द्विजिह्वान् सुखाकरोति, अयं तु न तथा इति विरोधः । विरोधपरिहारे द्विजिह्वान् पिशुनान् इति । 'पिशुनस्सूचको नीचो [पृ० ८. २] द्विजिह्वो मत्सरी खलः ।' इति हैमः कोशः । विरोध-श्लेषयोः संकरोऽलंकारः । शतृप्रत्ययेन मलयानिलधर्मं कर्तरिशब्दशक्तिमूलेन ध्वनिना आरोपयति । निकाममत्यन्तं जयश्रिया जयलक्ष्म्या ध्वनिना भार्यारूपया प्राप्तो लब्धः महावियोगः आत्यन्तिकासंयोग-लक्षणः यैस्ते, तान् । एवंभूतान् वैरिगणान् संमूर्च्छयन् मूर्च्छापन्नान् कुर्वन् । मूर्च्छा व्याधि-विशेषः, तदधीनान् कुर्वन् । यः खलु मलयानिलः स स्त्रिया वियुक्तान् मूर्च्छयति ॥ २३ ॥

२४. प्रत्यर्थेति । यश्चाहमानः, किल इति निश्चये, अम्बुराशेः समुद्रस्य, गाम्भीर्य-लक्ष्मीं अमर्षात् इति हरति स्म । राज्ञः लक्ष्मीहरणे हेतुमाह — अस्य समुद्रस्य सूनुः शशी चन्द्रः मद्यशसा प्रस्पर्द्धते साम्यमभिलषति । अन्योऽपि यः राजगुणेन स्पर्द्धते स राज्ञः दण्ड्यो भवति इति न्यायगर्भितं तुर्यपादं अर्थान्तरन्यासमाह । किं न सुतापराध इति सुगमम् । गूढोपमा-अर्थान्तरन्यासयोः संकरः । 'तेन स्पर्द्धते, तेन द्वेष्टि, तत्तुल्यकक्षां विगाहते' इत्यादयः शब्दाः गूढोपमाव्यञ्जकाः ॥ २४ ॥

२५. तदाख्यया इति । तस्य चाहमानस्य आख्यया नाम्ना, चाहमानवंशोऽन्वयः अजायत उत्पेदे । त्रयाणां लोकानां समाहारस्त्रिलोकी । तया जनिता निष्पादिता प्रशंसा स्तुतिर्यस्येति वंशविशेषणम् । शश्वत् निरन्तरं, सुपर्वाणा देवाः, तेषां आवल्या श्रेण्या सेव्यमानः । नरा एव मौक्तिकानि तेषां उत्पत्तिहेतुः कारणम् । अत्र वंशशब्दः श्लेषेन(ण) वेणुना व्यपदिष्टः । [प० ९. १] वेणौ पर्वाणि ग्रन्थयः भवन्ति, मौक्तिकानामुत्पत्तिकारणं च । यदुक्तं रत्नकोशे — 'जीमूतकरिमत्स्याहिशंखवेणुवराहजाः ।

शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकजातयः ॥' श्लेषालंकारः ॥२५॥

२६. तस्मिन्निति । तस्मिन् वंशे चाहमानाख्ये, स्फुरद्विक्रमचक्रवालाः स्फुरत्पराक्रमसमूहाः, कति नृपालाः भूपालाः नो बभूवुः ? अपि तु बहवो बभूवुः । कीदृक्षाः ? त्रिवर्गेति विशेषणम् । त्रिवर्गस्य धर्मार्थकामलक्षणस्य संसर्गेण, पवित्राणि पूतानि यानि विचित्रचरित्राणि, तैः वित्रासितो ध्वस्तः पापभारो यैस्ते ॥ २६ ॥

२७. पराक्रमेति । क्रमेण चाहमानपरंपरया दीक्षितवासुदेवः नृपः अभवत् आसीत् । शका एव असुराः दैत्याः तान् जेतुं इह धरायां पृथिव्यां स्वयमवतीर्णः वासुदेव इत्युपमा । पराक्रमेति विशेषणं उभयत्र तुल्यम् ॥ २७ ॥

२८. सपत्नेति । यो दीक्षितवासुदेवः, अतिशयेन कुण्ठं कुण्ठतरं, असिं खड्गं निजे स्वकीये प्रतापवह्नौ, अभिताप्य उष्णीकृत्य, काममतिशयेन, तेषां शत्रूणां रमण्यः तासां दृशो नेत्राणि तासामम्बुजलं अर्थादश्रु, तद्रमणीदृगम्बु तत् । अपाययत् । पिबति खड्गः अम्बु तं पिबन्तं नृपः [प्रयुंक्ते] प्रयोक्तृव्यापारे णिगन्तः । यथा कश्चित् शस्त्रमार्जः कुण्ठतरं असिं वह्नौ अभिताप्य अम्बु पाययति — इति ध्वनिगर्भिता गूढोपमा, रूपकं वा । असिकुण्ठतरत्वे हेतुमाह — सपत्नानां शत्रूणां ये संघाताः समूहाः, तेषां ये शिरोधिसन्धयः ग्रीवासन्धयः, तेषां छेदः, सपत्नसंघातशिरोधि[प० ९. २]सन्धिच्छेदः । तस्मात् । अत्र विशेषणे अतिशयोक्तिरलंकारः ॥ २८ ॥

२९. छिन्नेति । यस्य दीक्षितवासुदेवस्य करे हस्ते, रणाजिरे रणांगणे, जयश्रीर्जयलक्ष्मीः, भृशं अत्यर्थम्, व्यक्तानुरागा इव प्रकटरागा इव, विरेजे शुशुभे । केन हेतुना ? छिन्नाः कृत्ताः द्विषन्मण्डलीनां शत्रुसमूहानां ये मौलयो मस्तकाः, तेषां यानि मूलानि आदयः,

तत्र यः असृक्पूरो रुधिरप्रवाहः, तेन दिग्धा असिलता खड्गलता, तस्याः छलेन हेतुना। 'अजिरं प्रांगणं चत्वरांगणे' इति हैमः कोशः। अतिशयोक्तिमूलः उत्प्रेक्षालंकारः ॥ २९ ॥

३०. **प्रवाद्यमानेति**। यः दीक्षितवासुदेवः सौ(शौ)र्यश्रियं सौ(शौ)र्यलक्ष्मीं, वेल्लदसिच्छलेन कम्पमानखड्गव्याजेन, रणरंगभूमौ संग्रामनृत्तभूमौ, अनर्त्तयत्। नृत्यति सौ(शौ)र्यश्रीः, तां नृत्यन्तीं नृपः प्रयुंक्ते। 'गतिबोधाहारार्थे'ति विकल्पनिषेधः। रणे यद् वाद्यवृन्दं वादित्रसमूहः रणनन्दीलक्षणम्, तस्मिन् प्रवाद्यमाने ताड्यमाने सति। नाटकशास्त्रोक्ता एषा रणनन्दी —

डक्का ढक्का डमरुय काहल भेरी य भाणगं पडहो।
युग संख करड पोग्गय मद्दल कंसाळ रणनंदी ॥

दिवः आकाशात्, सुरेषु संपश्यमानेषु सत्सु। संपश्यमान इति — 'समो गमृच्छिदृशी'ति कर्त्तर्यात्मनेपदम्। यथा कश्चिन्नटः रंगभूमौ नर्त्तकीं नर्त्तयति, तत्र द्रष्टारो वादित्राणि च भवन्ति। गूढोपमालंकारः ॥ ३० ॥

३१. **भास्वानिति**। यन्महसा यत्तेजसा जितो भास्वान् सूर्यः, अद्यापि इयद् यावत्, वारिराशौ समुद्रे, किं झंपां न ददाति? अपि तु दत्ते। अन्यो[प० १०. १]ऽपि केनापि जितः मुमूर्षुः झंपां ददाति। च पुनः अन्वहं अनुदिनं, व्याकुलितः मरणाद् भीतः उन्मज्जति। यः मुमूर्षुः स कथं उन्मज्जतीत्यत्रार्थे अर्थान्तरन्यासमाह — वा पक्षान्तरे, हतजीवितव्यं निन्द्यजीवितव्यम्, सुदुस्त्यजम् — सुतरां दुःखेन त्यज्यते इति सुदुस्त्यजम्। 'लिहादिभ्यो अच्' अनेन सिद्धम्। हत-हतकशब्दाः निन्द्यार्थाः। अहः अहं अनु अन्वहं। 'प्रतिपरोनोरव्ययीभावात्' इति सूत्रेण अदन्तता सिद्धा ॥ ३१ ॥

३२. **तदङ्गजन्मेति**। तस्य दीक्षितवासुदेवस्य अंगात् शरीरात् जन्म यस्य सः। **श्रीनरदेव**भूपः अजनि बभूव। श्रिय उपलक्षितो नरदेवभूपः श्रीनरदेवभूपः। 'दीपजन' इति सूत्रेण अचा सिद्धम्। किं०ष्टः? नाभिजन्मानो ब्रह्मणः अर्हणया पूजया चणो वित्तः विचारितः प्रतीत इति यावत्, नाभि०। 'तेन वित्ते चंचुचणौ' इति सूत्रेण सिद्धम्। तनूदरीणां कृशोदरीणां स्त्रीणां लोचनैर्लोभनीया या तनुश्रीः शरीरशोभा तया तर्जितं तिरस्कृतं कामरूपं कन्दर्प्परूपं येनेति ॥ ३२ ॥

३३. **अशात्रवमिति**। यत्र यस्मिन् क्रुद्धे भूपे, इदं विश्वम्, अशात्रवं शत्रुसमूहवर्जितं, विधातुं कर्तुं परिश्राम्यति सति, अरातयः शत्रवः, राज्यश्रियं पातुं त्रातुं, स्वकोशात् स्वभाण्डागारात्, वसूनि द्रव्याणि आचकृषुः आकर्षन्ति स्म। दण्डं दातुमित्यर्थः। स्वकोशात् स्वप्रत्याकारात्, खड्गान् न आचकृषुः। संग्रामाद्भीता इत्यर्थः। 'भाण्डागारं तु कोशः स्यात्, कोशः खड्गपिधानकम्।' इति हैमः कोशः। शत्रूणां समूहः शात्रवम्। स्वादिभ्योऽञ्। ततो नञ्तत्पुरुषः। [प० १०. २] तुर्यपादे श्लेषोऽलंकारः ॥ ३३ ॥

३४. संख्येष्विति । यस्य यदीयो बाहुः संख्येषु संग्रामेषु, पूर्वाचलशृङ्गशोभां कलयन् धारयन्, अतर्कि विचारितः । जनैरिति शेषः । बाहोः पूर्वाचलधर्ममारोपयति — यस्मिन् बाहौ, वैरिमुखाम्बुजानि वैरिमुखकमलानि, म्लानिं नयन् नवचन्द्रहासः रराज शुशुभे । बाहुपक्षे — चन्द्रहासः खड्गः । पूर्वाचलपक्षे — चन्द्रस्य हसनं प्रकाशकरणं यः हासः । चन्द्रोऽभ्युद्गच्छन् हसन्निवोदीर्यते । नयन्निति द्विकर्मकोऽयं धातुः । उपमा-श्लेषयोः संकरः ॥ ३४ ॥

३५. प्रतापेति । यदीयः प्रतापवह्निर्ज्वलितः सन्, यत् अन्यायवनानि अधाक्षीद् ददाह, इति स्थाने युक्तम् । तदेतज्जगज्जनाश्चर्यकरम् । यद्वैरिणां कम्पभरं ततान । वह्नेर्दाहकत्वं युक्तम् । ज्वलति वह्नौ यः कम्पः तदाश्चर्यम् । अत्र तु भयहेतुकः कम्पः सात्त्विको भावः । रूपक-विरोधयोः संकरोऽलंकारः ॥ ३५ ॥

३६. नखावलीनामिति । पुत्रपौत्रान्वितः सपरिवारः, एषः द्विजानां पतिः चन्द्रः नखावलीनां कपटेन छद्मना, यदीये पदपद्मयुग्मे उपेत्य आगत्य इति लग्नः । इतीति किम् ? एतद्यशसा अहं जितः । अन्योऽपि जितः जेतुश्चरणे लगति । गूढोपमाऽलंकारः ॥ ३६ ॥

३७. श्रीचन्द्रराजेनेति । ततः नरदेवानन्तरं, श्रीचन्द्रराजेन धरित्री पृथ्वी, विभरांबभूवे धारयामासे । किं०ष्टेन ? नयो न्यायः तस्य एकं द्वितीयं धाम इव धाम नयैकधाम, तेन । यः श्रीचन्द्रराजः वक्त्रेण मुखेन कीर्त्या च, निशाकरं चन्द्रं, द्विर्जयन् द्वौ वारौ जयन्, स्वनाम यथार्थं अतत अत[पृ० ११. १]नोत् । द्वौ वारौ द्विः । 'द्वित्रिचतुरः सुच्' इति अनेन द्विः सिद्धम् । चन्द्रश्च राजा च इति द्वौ वारौ चन्द्रनाम इति स्वनाम्नः द्विर्जेतृत्वम् । गूढोपमाऽलंकारः ॥ ३७ ॥

३८. यस्येति । यस्य राज्ञः प्रतापज्वलनस्य प्रतापाग्नेः, वस्तुरूपं पदार्थतत्त्वं किंचिदनिर्वाच्यं अपूर्वं नूतनं, एवावधारणे, अजनि प्रादुर्बभूव । अपूर्वत्वमेव दर्शयति — यद्यतो हेतोः सरसे धनार्गले शत्रौ प्रकाममत्यर्थं जज्वाल ज्वलति स्म । नीरसे निर्द्धने अस्मिन् शत्रौ सद्यस्तत्कालं प्रशशाम । अन्यो वह्निः सरसे आर्द्रे प्रशाम्यति, नीरसे शुष्के ज्वलति । अयं तु न तथेत्यपूर्वम् । विरोधोऽलंकारः ॥ ३८ ॥

३९. चापस्येति । यः श्रीचन्द्रराजः, रणे संग्रामे, शरौघान् बाणसमूहान्, क्षेप्तुं मनो यस्य एवंभूतः, स्वस्यात्मनः, चापस्य धनुषः, जीवाकृष्टिं ज्याकर्षणं चकार । यत् जवेन वेगेन शत्रून् रिपून् यमराजवेश्म अनैषीत् प्रापयति स्म । तदेतन्महच्चित्रम् । एव निश्चये । अन्यत्र यस्य जीवाकृष्टिः क्रियते स एव यमगृहे प्राप्यते; इह तु चापस्य जीवाकृष्टिः, शत्रूणां यमगृहप्राप्तिरिति विरोधः । विरोधपरिहारः — जीवा मौर्वी तस्या आकृष्टिः, न तु जीवस्यात्मनः । कर्तुं मनो यस्येति वाक्ये 'तुमश्च मनः कामे' इति हैमसूत्रेण अनुस्वारलोपः । विरोध-श्लेषयोः संकरोऽलंकारः ॥ ३९ ॥

४०. यस्येति । यस्य क्षितीशस्य राज्ञः, च पुनः, यन्महासेः यन्महाखड्गस्य अन्योऽन्यं परस्परं, सुमहान् अत्यर्थं, विरोधः विरुद्धक्रियाकर्तृत्वं आसीत् । एकः आद्यः

क्षितीशः, परेषां शत्रूणां दारेषु कल[प० ११. २]त्रेषु, विरागः विरक्तः समभूत् । परदारपराङ्मुख इत्यर्थः । च पुनः, अन्यो यत्खड्गः परेषां शत्रूणां, दारेषु विदारणेषु, सरागः रक्तः आसीत् । इति द्वयोर्विरोधः । श्लेष-विरोधयोः संकरोऽलंकारः ॥ ४० ॥

४१. तस्मादिति । तस्मात् चन्द्रराजात्, महिष्ठं महद्धाम तेजो यस्येति; महौजा महेन्द्र इव **अजयपाल**नामा अशोभिष्ट दीप्यते स्म । यः अजयपालः जगति लोके, सिद्धविष इति चक्री सार्वभौम इति प्रसिद्धिं जगाम । जितशत्रुसमूहः इति विशेषणपर्यायः ॥ ४१ ॥

४२. भिन्नेति । यस्य राज्ञः, आहवे संग्रामे, खड्गलता खड्गवल्ली, प्रतापाशुशुक्षणेः प्रतापाग्नेः, अर्चिरिव ज्वालेवोल्ललास उल्लसति स्म । अर्चिषो रक्तत्वं विशेषणेनारोपयति । भिन्ना भेदिता, द्विषतां शत्रूणां, या कुंभिघटा गजघटा, तस्याः कटाहाकारा ये कुम्भाः शिरःपिण्डाः, तेभ्य उच्छलत् यत् शोणितं रक्तं, तेन शोणा रक्ता शोचिः कान्तिर्यस्याः सा । उत्प्रेक्षा-रूपकयोः संकरः ॥ ४२ ॥

४३. अनेकेति । यो नृपः द्यूतकृद्वत् द्यूतकार इव, चतुरंगयुद्धक्रीडासु, परेषां शत्रूणां, अजेयः दुर्जयः समभूत् । चतुरंगयुद्धे गज-रथ-तुरगपदातिलक्षणे या क्रीडा तासु । पक्षे – चतुरंग इति क्रीडाविशेषः । यथा द्यूतकारः कश्चित् चतुरंगे अजेयो भवति । द्यूतकार-नृपयोर्विशेषणद्वारा अर्थद्वयेन श्लेषमाहुः । किंभूतः ? अनेकधा अनेकप्रकाराणि अष्टापदस्य स्वर्णस्य साराणि द्रव्याणि तेषां दाने दक्षः । द्यूतकारपक्षे – अष्टापदः सारिफलकं तत्र ये साराः सारयः अष्टापदसाराः, अनेकधा [प० १२. १] च ताः अष्टापदसाराश्च तासां दाने खेलने दक्षश्चतुरः । पुनः किंभूतः ? वशीभूततरः अत्यर्थवशीभूतः अक्षचारः इन्द्रियप्रचारो यस्य सः । द्यूतकारपक्षे – अत्यर्थवशीभूतः अक्षचारः पाशकप्रचारो यस्य सः । उपमा-श्लेषयोः संकरः ॥ ४३ ॥

४४. विदारेति । यस्य राज्ञः सम्बन्धिनि यदीये करे हस्ते, करवालवल्ली खड्गलता, जयश्रियः जयलक्ष्म्याः, हारलतेव रेजे शुशुभे । हारलताधर्मः केनेति हेतुनाऽऽह – विदारिता द्विःकृता ये अरातिकरीन्द्राणां शत्रुगजानां कुम्भाः, तेभ्यः विलग्नानि यानि मुक्ताफलानि तेषां यत् कैतवं कपटं तेन । उपमालंकारः ॥ ४४ ॥

४५. यत्कीर्त्तिपूरैरिति । यस्य राज्ञः कीर्त्तिपूरैः कीर्त्तिभरैः, परितः समन्तात्, विश्वत्रये त्रिभुवने, परीते व्याप्ते सति, सूरिभिः विद्वद्भिः, इत्यतर्कि इत्यूहामासे । इति किम् ? ध्रुवं निश्चितं, एतदीयैः एतद्राजसंबन्धिभिः प्रतापैस्तेजोभिः, तप्तमुष्णीभूतं, एतद्विश्वत्रयं नवचन्दनेन विलिप्तं किमु ? संशयद्योतकः किमुशब्दो गम्यते, संशयमूलत्वात् तर्कस्य । प्रतापस्य उष्ण-शोणत्ववर्णनम्, कीर्त्ति-यशसोः शीत-शुक्लत्ववर्णनम्, अतीन्द्रियस्वरूपमपि कविमतेनांगीकृतम् । यदाहुः कविशिष्या(क्षा)यां श्रीअमरचन्द्राः –

असतोऽपि निबन्धेन निबन्धेन सतोऽपि च ।
नियमेन च जात्यादेः कवीनां समयस्त्रिधा ॥ १ ॥ अतिशयोक्तिरलंकारः ॥ ४५ ॥

४६. यदीयेति । यदीया चासौ कीर्त्तिश्च यदीयकीर्त्तिः, तया । समन्तात् सर्वतः, अपहृतां निजां श्रियं शोभां, स्वर्गधुनी आकाशगंगा, विभाव्य [प० १२. २] विचार्य, काममत्यर्थं, अद्यापि इयद्यावत्, किं न पूत्करोति ? यस्य श्रीरपह्रियते स पूत्कुरुते इति व्यवहारः । केन ? पतन्, हिमाद्रेरधः पतन् यः प्रवाहः ओघः, तस्य यो ध्वनिः शब्दः, तस्य कैतवं छलं, तेन । अतिशयोक्तिरलंकारः ॥ ४६ ॥

४७. रणे इति । यस्य राज्ञः शिलीमुखाः बाणाः, समन्ततोऽपि सर्वतोऽपि, क्षीवा इव मदमत्ता इव, क्षोणितलं भूतलं यान्ति स्म । क्षीवानां क्षोणिपतनं जातिस्वभावः । किं कृत्वा ? रणे संग्रामे, अरीणां शत्रूणां, वदनाम्बुजेषु वदनकमलेषु, रक्तमधूनि रक्तमद्यानि, कणेहत्य तृप्तिशेषं, निपीय पीत्वा । कणेहत्येति – 'कणेमनस्तृप्ताविति' सूत्रेण सिद्धम् । अन्योऽपि शिलीमुखो भ्रमरः, अम्बुजेषु कमलेषु, मधूनि मकरन्दान्, तृप्तिशेषं निपीय क्षीवो भवति इति श्लेषेण ध्वनिः । उत्प्रेक्षा-श्लेषयोः संकरः ॥ ४७ ॥

४८. यस्येति । यस्य राज्ञः, संगरसंगतानां संगरे संग्रामे मिलितानां, प्रत्यर्थिनां शत्रूणां, खेदः प्रकम्पः बलहानिः, उच्चैरतिशयेन, अभूत् । कीदृशस्य यस्य ? प्रसर्पन्ति विषमानि दुस्सहानि आयुधानि दिव्यास्त्राणि यस्य सः, तस्य । कस्य कासामिव ? वल्लभस्य वधूनामिव । यथा वल्लभस्य भर्त्तुः संगरसं संयोगरसं गतानां प्राप्तानां, वधूनां स्त्रीणां, खेदः प्रकम्पो बलहानिश्च भवति । कीदृशस्य वल्लभस्य ? प्रसर्पन् प्रसरन् विषमायुधः कन्दर्पो यस्मादिति । खेदादयः सात्त्विकाः भावाः । बलहानिः प्रलये अन्तर्भवति । यदुक्तं अलंकारचूडामणौ – 'स्तम्भखेदरोमाञ्चस्वरभेदकम्पवैवर्ण्याश्रुप्रलया अष्टौ [प० १३. १] सात्त्विकाः' इति । पूर्णोपमा-श्लेषयोः संकरः ॥ ४८ ॥

४९. स्फुरद्धृतीति । यो नृपः कीर्तिं स्मरन्, परार्थहृतौ परद्रव्यापहारे, क्वापि कदापि, मतिं बुद्धिं न चकार । किंवत् ? सत्कविवत् । यथा सत्कविः परस्यान्यस्य कवेः, अर्थः अभिधेयो वाच्यमिति यावत्, तस्य हृतिर्हरणं स्वकाव्ये क्षेपस्तस्याम्, कीर्तिं स्मरन् मतिं न करोति । कुकविस्तु परार्थहृतेस्तस्कर इत्यपकीर्तिं लभते । कीदृशो नृपः ? स्फुरन्ती धृतिर्धैर्यं यस्य सः । सत्कविपक्षे–धृतिर्धारणं चतुर्थो बुद्धिगुणः । पुनः कीदृशः ? प्राप्ता लसन्ती प्रतिष्ठा येन सः । कविपक्षेऽपि तुल्यम् । पुनः की० ? विशुद्धैर्वर्णैः ब्राह्मणादिभिः स्पृहणीयं स्पृहार्हं वृत्तमाचारो यस्य सः । कविपक्षे–विशुद्धैर्निर्दोषैर्वर्णैरक्षरैः स्पृहणीयानि वृत्तानि काव्यानि यस्य सः । उपमा-श्लेषयोः संकरोऽलंकारः ॥ ४९ ॥

५०. विरुद्धेति । किल इति सत्यमेतत् । यस्य नृपस्य प्रतापः यत्प्रतापः तस्मात्, बिभ्यन् भयं कुर्वन्, वह्निरग्निः दारूणि काष्ठानि, इति प्रविवेश प्राविशत् । इति किम् ? विरुद्धे शत्रुगृहे वासः निवासः विरुद्धवासस्तस्मात् हेतोः । इह दारुणि मां न कोऽपि वेत्ति जानाति । अमुमर्थं द्रढयितुं हेतुमाहुः–नो चेत् न यद्येवं तर्हि, तद्घर्षणात् दारुघर्षणात्, तत्प्रभवो वह्निप्रादुर्भावः कुतस्तद्वासं विना स्यात् भवेत् । हेतुरलंकारः ॥ ५० ॥

५१. काममिति । काममत्यर्थं, यस्य राज्ञः ओजसस्तेजसः सृट् सर्गः यदोजःसृट् तस्मिन्, यत्तेजःसर्गे, वेधसो ब्रह्मणः स कोऽपि अनिर्वाच्यः, खेदोदयः प्रस्वेदप्रादुर्भावः [प० १३. २] आविरासीत् प्रादुर्बभूव । कार्यं कुर्वतः प्रस्वेदसंभवो युक्तः । येन खेदोदयेन नदीवत् प्रसर्प्पता अम्बुराशेरपि वारि क्षारमकारि । अतिशयोक्तिरलंकारः ॥ ५१ ॥

५२. तद्वास्त्विति । योऽजयपालः **अजयमेरुदुर्गं** अतिष्ठिपत् स्थापयति स्म । कीदृक्षम्? स्वर्गश्रियां स्वर्गलक्ष्मीनां, जित्वरकान्त्या जयनशीलकान्त्या, कान्तः मनोहरः, जित्वरकान्तिकान्तस्तम् । पुनः कीदृक्षम्? तस्य अजमेरुदुर्गस्य वास्तु गृहभूः तानि तानि च घनानि वस्तूनि तेषां सारप्राग्भारः, तद्वास्तुनः तत्तद्घनवस्तुसारप्राग्भारस्य च या वीक्षा दर्शनं तया स्तुतः धातुर्ब्रह्मणः सर्गः सृष्टिर्यत्र सः, तम् ॥ ५२ ॥

५३. अदीपि इति । तस्मात् अजयपालात् अदीपि दीप्यते स्म । दीपि जनीति कर्तरि ञिच् । पूर्वार्द्धं सुबोधम् । यस्य जयराजस्य कीर्त्तय एव चन्द्राः कर्पूराः तैः, दिशः प्राच्याद्याः ता एव कामिन्यः, तासां मुखमण्डलानि मुखसमूहाः, असुरभीणि सुरभीणि बभूवुः । कीर्त्तेः कर्पूरारोपः । दिशां मुखारोपः सुरभित्वारोपश्च । असतोऽपि निबन्धेनेति कविमतम् । कीर्त्ति-यशसोर्भेदस्त्वेवम्, यदुक्तं रत्नकोशे—

> दानपुण्यफला कीर्त्तिः पराक्रमकृतं यशः ।
> एकदिग्गामिनी कीर्त्तिः सर्वदिग्गामुकं यशः ॥ इति । रूपकोऽलंकारः ॥ ५३ ॥

५४. यशोवितानेति । यदीये जयराजसंबन्धिनि यशोविताने यशःसमूहे स्फुरिते सति, यदा शीतरश्मिश्चन्द्रमा व्यक्तः स्फुटं नालक्षि न लक्षते स्म । अहं एवं शंके । तदादि [प० १४. १] तद्दिनमारभ्य विधिना ब्रह्मणा, तदीयबिम्बान्तः तद्बिम्बमध्ये, अयं कलंकोऽभिज्ञानं व्यधायि अकारि । अनलंकारमपि रसबहुलत्वात् सुकाव्यमेतत् ॥ ५४ ॥

५५. यस्मिन्निति । यस्मिन् राजनि महीं शासति पालयति सति, तुङ्गसुरालयेषु उच्चैर्देवगृहेषु, राजमार्गप्रोलंघनं अभात् । न प्रजासु इति गम्यम् । राज्ञः चन्द्रमसो मार्गः ग्रहपन्था, भूमेर्द्विलक्षयोजनता तस्य प्रोल्लंघनम् । देवालयानां औन्नत्यव्यञ्जकं श्लेषवचनम् । प्रजापक्षे—राजमार्गो नृपकृता मर्यादा तस्य प्रोलंघनम् । अस्त्रेषु षट्त्रिंशत्सु निस्त्रिंशता खड्गभावः । न प्रजासु । प्रजापक्षे—निस्त्रिंशता निष्करुणता निर्दयता । द्विपेषु गजेषु मदः अवस्थाविशेषः । न प्रजासु । प्रजापक्षे—मदः उन्मादः सुरामत्तता वा । करग्रहः हस्तग्रहः करपीडनेषु विवाहेषु अभात् । न प्रजासु । प्रजापक्षे—करो दंडः अन्यायिनां दमनं तस्य ग्रहः ग्रहणम् । श्लेषालंकारः ॥ ५५ ॥

५६. जगदिति । जगतो विश्वस्य प्रदीपे दीपके, किमु इति वितर्के, यस्य प्रतापे भास्वान् भानुः पतङ्गपातं निपपात । पतंगवत् कीटवत् आभीक्ष्ण्येन निपतति स्म । पतंगपातं निपपात । 'विशपतपदस्कंदो वीप्साभीक्ष्ण्ये' इति णमा सिद्धम् । प्रतापे इति विषये सप्तमी ।

अन्यथेति—न चैवं चेत्, कवीन्द्राः अमुष्य भास्वतः पतङ्ग इति नाम कथं केन प्रकारेण, एतदामनन्ति अङ्गीकुर्वते । पतङ्गपातं पततीत्याशास्यमानः पतङ्ग इति निरुक्तेः सिद्धम् ॥५६॥

५७. सत्यमिति । सत्यमेतत् किलेत्याप्त..............[प० १४. २]

*

[अत्र मूलादर्शे १५ पत्रादारभ्य २६ पत्रान्तानि पत्राणि विनष्टानि तेषु प्रथमसर्गस्य इत आरम्य अन्तिमपर्यन्तानां पद्यानां तथैव द्वितीयसर्गस्य ४५ पर्यन्तानां आदिमकाव्यानां दीपिका विनष्टा ।]

[द्वितीयसर्गस्य ४६ तमाङ्कपद्यात् प्रारभ्याग्र इयं व्याख्या –]

४६. जेगीय इति । शेषो नागराजा निजकामिनीभिः नागस्त्रीभिः भृशाभीक्ष्ण्येन गीयमानम् । अन्यत्सुगमम् । अतिशयोक्तिरलंकारः ॥ ४६ ॥

४७. स्वकालिमानमिति । वणिक्कलायाः कौशले पाटवे केलिर्यस्य सः । खड्गदर्शनात् शत्रुमुखकार्ष्ण्यं युक्तमेव। लाभार्थी वणिग् एकं दत्त्वा द्वयं गृह्णाति । एवं खड्गोऽपि । प्रथमचकारः पुनरर्थः, अग्रचकारौ जीवयशसोः तुल्यत्वख्यापनार्थम् ॥ ४७ ॥

४८. गिरीशेति । गिरीशश्च कैलाशश्च सुधांशुश्च एतेषां श्रीः तां, समाकृष्य चतुर्णामपि एकत्रीकृत्य, अस्य नृपस्य ब्रह्मा यशश्चकार । किमिति संशये । हेतुना संशयं समर्थयन्ति । यद्धेतोः अस्य यशःपुरः एते गिरीशादयः पृथग्भावेन निःश्रीकतां धारयन्ति स्म । चतुष्टयसमाहृतश्रीकस्य पुरः एको निःश्रीक एव स्यात् । संशयोऽलंकारः ॥ ४८ ॥

४९. प्रोदंच्येति । मेरुच्छलात् हस्तमुत्पाट्य, इयं भूः इदं जगाद इवोत्प्रेक्षते । न सुषुवे न प्रसूतः । षूङ् प्राणिप्रसवे इति सिद्धम् । वा शब्दः चतुर्ष्वपि संबध्यते । उत्प्रेक्षालंकारः ॥ ४९ ॥

५०. त्रस्तेनेति । यद्वैरिनारी पलायितेन भर्त्रा अर्द्धमार्गे मुक्ता स्वदेशे [प० २७. १] स्थिताऽपि, स्वं आत्मानं नवं द्वीपान्तरं प्राप्तं मन्यते स्म । अमुमर्थं हेतुना द्रढयति—चन्द्रस्य तीव्रत्वात् । हेतौ तृतीया-पंचम्यौ स्याताम् । चन्द्रस्य तीव्रानुभवो विरहिणीधर्मः । हेमसूरिमते अनुमानालंकारः, वाग्भटमते हेतुः । उभयत्र न दोषः ॥ ५० ॥

५१. पर्यन्तशैल इति । कासारेषु सरस्सु सारं प्रधानं यत् तत्, तत् तडागमुख्यम् । यः आनलदेवः अचीखनत् खानयति स्म । णिगर्थे ङिप्रत्ययेन सिद्धम् । पुष्करवत् तीर्थविशेषवत् पुण्यं पवित्रं पारं तीरं यस्य तत् । शुचिः पवित्रः वारिणः पानीयस्य वारः समूहो यस्मिन् तत् । तत् पुनः । क्रीडारसेन क्रोडिता एकत्रीकृता दिग्द्विपाः दिग्गजाः येन तत् । दिग्गजानां क्रोडीकरणे हेतुमाह—पर्यन्तशैलानां समीपपर्वतानां प्रतिबिम्बच्छलात् । हेतुरलंकारः ॥ ५१ ॥

५२. **विस्मापक इति** । तस्मादानल्लदेवात् । विस्मापका विस्मयकारिणी श्रीर्लक्ष्मीः शोभा वा यस्य सः । पूर्वार्द्धं सुगमम् । यस्य नृपस्य मानसहितं दानं प्राप्य उर्व्यां भुवि वनीपकाः याचकाः किं न अधनदन्? किं न धनदायंते स्म? पूर्वं उपमार्थः । क्यङ्प्रत्ययः, ततो 'लुप् बहुल'मिति क्यङ्लोपः । क्यङ्लोपे 'शेषात् परस्मै' इति सूत्रे[ण]ह्य-स्तनीबहुवचने परस्मैपदं सिद्धम् । गूढोपमालंकारः ॥ ५२ ॥

५३. **सशोकेति** । यस्य नृपस्य ओजः प्रतापः स एव ज्वलनो वह्निः यत्प्रतापाग्नि-रिति यावत् । सद्यस्तत्कालं घनीभूय निबिडीभूय, यद्वा मेघीभूय, आसां रिपुस्त्रीणां दुर्दिनानि मेघान्धकाराणि, यद्वा दुरवस्था[प० २७. २]दिनानि, किं न तेने । रिपुस्त्रीणां श्वा(श्वा)-सपवनैर्मिलित्वा । कीदृशैः? शोक एव धूमः, अश्रूण्येव जलानि । पश्चाद् द्वंद्वः । सह शोकधूमाश्रुजलानि तैः । यथा ज्वलनः धूमजलसहितैर्वातैर्मिलित्वा मेघो भूत्वा दुर्दिनानि करोति । धूमादिसन्निपातो मेघः इति कालिदासमतम् । लोकव्यवहारः प्रत्यक्षप्रमाणं च । रूपक-श्लेषयोः संकरः ॥ ५३ ॥

५४. **त्यागेति** । त्यागे दानविषये विश्वं जगद् अतिक्रान्तं येन सः । तस्य एवं-भूतस्य राज्ञः, अंगुलीः पाणितलं नखांश्च विधातुमिच्छोर्विधेः ब्रह्मणः, स्वर्गौस्तनाः कामधेनु-स्तनाः, स्वर्द्रुमपल्लवाः, स्वर्म्मणिश्चिन्तामणिः पूर्वोक्तानां त्रयाणां सादृश्यभाजः एते त्रयोऽपि, किलेति संभाव्यते, अभ्यासकृते प्रथमा सृष्टिः । उपमातिरस्कारोऽत्र ॥ ५४ ॥

५५. **गुणानिति** । ब्रह्मा यत्संबन्धिनो गुणान् गणयन् संख्याविषयी कुर्वन् तं खेदं कलयति स्म, यस्य खेदस्य लेशमात्रं अंशमात्रं यल्लेशमात्रं तत् । तत् त्रैलोक्यविधानेऽपि अनुभवात् न विषयी बभूव ॥ ५५ ॥

५६. **ततः इति** । पूर्वार्द्धं सुगमम् । पाथसि पानीये रुहतीति पाथोरुट् कमलम् । यत्पाणिकमले वसुन्धराकर्णिकायाः बीजकोशस्य भावं पुष्णाति स्म । पृथिव्याः पाणिर्बहु-विषयः । ध्वनिनाऽपह्नुता गूढोपमा ॥ ५६ ॥

५७. **विदारितेति** । विदारितः भेदितः अरातीनां शत्रूणां करीन्द्रकुम्भः विदा०, तस्मात्, यानि मौक्तिकानि अत्र युधि संग्रामे पतन्ति स्म । यस्येयं यदीया, कीर्त्तिव्रततिः कीर्तिवल्ली, तस्याः वल्लेः, तान्येव मौक्तिकानि [प० २८. १] फुल्लानि कुसुमानि बभूवुः । प्रतिवस्तूपमा ॥ ५७ ॥

५८. **यदीयेति** । भृशमत्यर्थं, तपन् यः तापनः सूर्यः तस्य यत्तापनं प्रयोक्तृत्वं तेन हेतुना । हिमसंबन्धिनी हैमी । हैमी चासौ शिला च हैम० । द्रवीभवन्ती गलन्ती या हैमशिला तस्याश्छलेन । पूर्वार्द्धं सुगमम् ॥ ५८ ॥

५९. **गुणानिति** । यस्य राज्ञः गुणान्, कर्णेहत्य तृप्तिशेषं, काममत्यर्थं, निपीय कर्णाभ्यां श्रुत्वा, आनन्दितोऽपि देववर्गः स्वचेतसि, एतदेव वक्ष्यमाणं, कष्टं उवाह । यत् एषः अयं नृपः, देवभूयं देवत्वं देवभावं देवसायुज्यमिति यावत् न श्रितवान् । मनुष्यभावं श्रितवान् । 'भूयं भावे क्यप्' इति सूत्रेण दे[व]भूयमिति सिद्धम् ॥ ५९ ॥

६०. तस्मादिति । पूर्वार्द्धं सुगमम् । पदद्वयं प्रथमसर्गे कृतमेव । रिपुस्त्रीणां नेत्रजलैः स्रवद्भिः सद्भिः यदीयः यशोवृक्षः पल्लवितः । अन्यत्रापि जलसेकात् तरवः पल्लविताः भवन्ति । रूपकोऽलंकारः ॥ ६० ॥

६१. वृन्दानीति । यो नृपः बलिष्ठानां शत्रूणां वृन्दानि समरे संग्रामे दृष्ट्वा, च पुनः, कृशोदरीणां वृन्दानि अवरोधे अन्तःपुरे दृष्ट्वा, भृशमत्यर्थम्, कं प्रश्नयोग्यम्, दर्पं अहंकारं न अंगीचकार? अपि तु अंगीचकार । विश्वविख्यातेन त्रिभुवनविख्यातेन यशसा प्रकाशः उज्ज्वलः । श्लेषोऽलंकारः ॥ ६१ ॥

६२. दुग्धोदधीति । नागेन्द्रकन्याः यदीयान् गुणान् जगुः गायन्ति स्म । कीदृशान्? दुग्धोदधेः क्षीरोदस्य स्फीततराः स्थूलतरास्तरन्तः ये तरंगाः तेषां श्रेणिश्रीः श्रेणिकान्तिः, तासां [प० २८.२] वैभवस्य शोभातिशयस्य, जेत्री जयनशीला भाः कान्तिर्येषां ते, तान् । कथम्? रणन्तो ये वेणवो वंशाः तेषां रवैः अभिरामं मनोहरं यत् कर्म्म । इति क्रियाविशेषणम् । समासेन गूढोपमालंकारः ॥ ६२ ॥

६३. गांगेयवदिति । ततः **अजयपालानन्तरं,** वसुधायां सुधांशुश्चन्द्रमाः एवंभूतः **श्रीगंगदेवः** अभात् शुशुभे । गांगेयवत् पाण्डुपुत्रपितामहवत्, गेयाः गानयोग्याः गुणाः यस्य सः । यस्य प्रतापाग्निः रिपुस्त्रीणां प्राणवायुभिः ज्वलति स्म । 'दीपि जनबुधी'ति कर्त्तरि ञिच्, इति सिद्धम् ॥ ६३ ॥

६४. दोषाकर इति । दोषां रात्रिं करोति इति दोषाकरश्चन्द्रमाः । ध्वनिपक्षे— परमहत्त्वदर्शनात् यो मत्सरी स दोषाणां दूषणानां आकरः कथ्यते । ईदृग्विधश्चन्द्रमाः यत्कीर्त्तेर्गौरवं विलोक्य, मत्सरं धारयन्, यत्तमः गुणविशेषं राहुं वा अर्जयामास । मत्सर-तमसोरैक्यं कापिलः आह तत्त्वकौमुद्याम्—'सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः गुरुवरणकमेव तमः ।' इति । तत्तमः कलंकच्छलात्, इयद्यावदसौ चन्द्रमाः नोज्झति । अतिशयोक्ति-श्लेषयोः संकरः ॥ ६४ ॥

६५. पर इति । शतेभ्यः परे परःशतास्तेभ्यः । परः शताद्यास्ते येषाम् । 'परा संख्या शतादिकाः' इति हैमः कोशः । ईदृशेभ्यः शत्रुसमूहेभ्यः बर्ह्णीं देवलोकलक्ष्मीं यच्छन् । अर्थात् शत्रून् स्वर्गं प्रापयन् । एवंभूतः यस्य नृपस्य कृपाण उत्कटसंग्रामं लब्ध्वा मात्राहीनः नैव बभूव । व्यंग्यार्थे, मात्रा कालविशेषः । कृपाणशब्दस्य मात्राहीनत्वे [प० २९.१] कृपण इति भवति । यो बहुभ्यः अतुच्छां लक्ष्मीं दत्ते स कृपणो भवति, अयं च न तथा । श्लेषोऽलंकारः ॥ ६५ ॥

६६. गतेष्विति । शुण्डया मत्तः शौण्डः । दाने शौण्डाः मत्ताः दानशौण्डाः । 'मत्ते शौण्डोत्कटक्षीबा' इति हैमः कोशः । एवंभूतेषु कर्णादिषु कर्ण-बलि-जीमूतवाहनादिषु गतेषु सत्सु, अयं वार्त्तमानकालीनो जनः, दौःस्थ्यपात्रं दारिद्रपात्रं मा भवेत् इति ध्यात्वा विधाता अयं गंगदेवं चक्रे । कर्णादिभिः दानसादृश्यवर्णनम् ॥ ६६ ॥

६७. त्रैलोक्येति । तस्मात् गंगदेवात् **सोमेश्वरो** भवति स्म बभूव । कीदृक्षः ? **इलां पृथ्वीं** विलसतीत्येवंशीलः । अनश्वरा अविनाशिनी नीतिरीतिः न्यायाचारो यस्य सः । त्रैलोक्यस्य या लोकावलिः तस्याः कर्णे कर्णपूरीकृता कर्णाभरणीकृता ये अनन्तगुणास्तेषां एकमद्वितीयं धाम गृहं यः सः ॥ ६७ ॥

६८. रणेष्विति । पूर्वार्द्धं सुगमम् । धूमस्य समूहो धूम्या क्रोधाग्नेर्जाता बहिरुल्ल-संती धूम्येव । खड्गस्य काष्ण्यात् धूम्यासादृश्यम् । उपमालंकारः ॥ ६८ ॥

६९. उक्तेनेति । यस्येदं यदीयम्, यदीयं च तन्नाम यन्नाम तेन, गोत्रस्खलनात् नामस्खलनात्, उक्तेन, रमणं भर्त्तारं विलक्षं विधाय, चिरं रतरसप्रसक्तं निजं चेतः का न प्रीणयति स्म ? अपि तु प्रीणयति स्म । शुक्रच्यवनावसरे नृपनामग्रहणात्, भर्त्तुर्विलक्ष-त्वात् शुक्रदार्ढ्यम् । चिरायेति कथनात् चिरप्रसंगात्, चेतसः प्रीतिः । राज्ञः सौभाग्यरू-पातिशयवर्णनम् । शृंगाररसपर्यन्तं वृत्तम् । व्यंगबहुलत्वात् अनलं-[पृ० २९.२] कारमपि सुवृत्तम् ॥ ६९ ॥

७०. वह्नेरिति । शत्रुस्त्रियः यत्प्रतापवह्निं अश्रुभिः इति वर्षति स्म । हेतुकथन-माह—वह्नेः अंबु जलं द्विषन् शत्रुः, विध्यापनार्थमिति भावः, स प्रतापाग्निः काममत्यर्थं हविर्वत् घृताहुतिवत् एभिरस्रैः प्रवृद्धः । अर्थान्तरन्यासः सुगमः ॥ ७० ॥

७१. अनेनेति । शेषः अनेन राज्ञा समं एकत्वं कथमागच्छतु ? अपि तु न कथ-मपि । द्वयोर्भिन्नशक्तित्वं दर्शयति । स शेषः सहस्रेण शिरोभिः, मां पृथ्वीं धारयति स्म । अयं पुनः एकया भुजया । अतिशयोक्तिरलंकारः ॥ ७१ ॥

७२. कर्प्पूरदेवीति । पूर्वार्द्धं सुगमम् । यन्मुखे[न] जितं अप्सुजं कमलं जले लीनं भूत्वा अद्यापि किं न तपस्यति ? यो जितः स तपः कुरुते इति व्यवहारः । अप्सुजमिति अलुक् समासः । उपमालंकारः ॥ ७२ ॥

७३. इहेति । या **कर्पूरदेवी,** इतीवोत्प्रेक्षते—एणीदृशां नारीणामपि हृदये प्रवेष्टुं अवकाशं न अदित न ददौ । किं पुनः परपुरुषाणां इत्यपेरर्थः । इति पातिव्रत्यसूचनम् । हेतुमाह—इह हृदये स्थितोऽसौ रमणो भर्त्ता एताः हृदयस्थिताः स्त्रीः विलोक्य कदाचित् लुब्धो भविता, इति हेतोः । उत्प्रेक्षा-विरोधयोः संकरः ॥ ७३ ॥

७४. पत्या इति । सा **कर्पूरदेवी** भुवः पृथिव्याः वैषयिकं सुखं निर्विशंकं यथा स्यादेवं तथा पत्या सह निर्विशन्ती उपभुञ्जाना सूनुं असूत । का कमिव ? **हरेः आशा** पूर्वा दिक् चन्द्रबिम्बमिव । उपमालंकारः ॥ ७४ ॥

७५–७६. अतुच्छेति । सुगमम् । **तनुत्वयेति ।** सुगमम् ॥ ७५–७६ ॥

७७. शस्त्रेष्विति । योगेन योगमार्गेण मर्त्यानामिदं मार्त्तम् । यल्लोप[पृ० ३०.१] श्चेति सिद्धम् । शेषं सुगमम् ॥ ७७ ॥

७८. पित्रा इति । स भूभृत् पृथ्वीराजः, काले पूर्वकृततपःपरिपाकावसरे । पूर्वार्द्धं सुगमम् । कः केन कस्मिन् किमिव ? यथा उदयाद्रिः उदयाचलः, अहर्मुखे प्रभाते, अहर्पतिना सूर्य्येण प्रदत्तं रोचिः समवाप्य नितरां चकास्ति । किं०ष्टं रोचिः ? तमोव्रातं विनाशितुं शीलमस्येति । पूर्णोपमा ॥ ७८ ॥

७९. गुणाभिघातेति । एषः नृपः गुणो मौर्व्वी तस्याः अभिघातः जीवाटणत्कारः, तं कुर्वन्नपि गुणानां औदार्यादीनां अभिघातः पीडनं न चक्रे। परे शत्रवः, तेषां लोकाः परलोकाः, तेषां बाधा पीडा ताम् । विरोधपरिहारे—परलोकः परभवगमनं तस्य बाधा इहभवे पापाचारः ताम् । विरोधोऽलंकारः ॥ ७९ ॥

८०. निषेवेति । स एषः नृपः, असेर्भावः असिता, तां असितां खड्गभावरूपां वृत्तिं वर्त्तनं निषेवमानः सेवमानोऽपि असितां कृष्णां पापाचाररूपां वृत्तिं नैव उपादित जग्राह । तेन राज्ञा, परलोकपीडा शत्रुपीडा, अतितेने अत्यर्थं चक्रे। विरोधपरिहारे—परभवपीडा । विरोधोऽलंकारः ॥ ८० ॥

८१. द्विडिति । द्विषां ये कुंभिनो गजास्तेषां कुंभतटे दत्तो यः दृढप्रहारः तस्मात्, धाराग्रे खड्गप्रत्यंगे लग्नानि नवमौक्तिकानि तेषां कैतवं छलं, तेन । अनेन प्रकरणभूतेन । यस्य राज्ञः खड्ग एव लता असिवल्ली युधि संग्रामे विकसत् पुष्पश्रेणीव शुशुभे । किं कर्त्तुम् ? क्ष्मामंडलेन फलेन फलितुम् । गजकुंभेषु मौक्तिकसत्ता प्रसिद्धैव । उपमालंकारः । वसंततिलकं छन्दः ॥ ८१ ॥

८२. कीर्तीति । यस्य राज्ञः मृदुरपि [प०३०.२]कोमलापि कीर्त्तिः, सतीव्रता - तीव्रस्य भावस्तीव्रता सह तीव्रतया वर्त्तते इति सतीव्रता । पक्षे, सत्याः पतिव्रतायाः व्रतं यस्याः सा। अहो इति आश्चर्ये । या कीर्त्तिः तं राजानं कल्पान्तं आस्थितं प्राप्तमपि न उज्झति न त्यजति । इति प्रत्ययं ज्ञानं कस्य चित्ते न आधत्त? सर्वेषां चित्ते धारयामास । तु पुनरर्थे । अन्येषां नृपाणां कीर्त्तिः सतीव्रतापि न सती न विद्यमाना पतिव्रता वा, किं तु वेश्येव । तान् कतिचिन्नृपान्, या जीवितावध्येव जीवितमर्यादं न उज्झति । कतिचित्तान् जीवतोऽपि विद्यमानानपि उज्झति चेत् अयं वेश्याधर्म्मः । विरोध-श्लेषयोः संकरः ॥ ८२ ॥

८३. वाग्देवीमिति । द्विषां शत्रूणाम्, दुर्यशः कर्तृ, भुवने भ्राम्यत् सत्, अस्य राज्ञः यशोभ्रमेण सरस्वतीं चिकुरे केशेषु जग्राह । बहुत्वमस्य वैकल्पिकम् । चिकुराणां कार्ष्ण्यात् दुर्यशोग्रहणं संभाव्यते । एवं चन्द्रमुदरे, महेशं गले, तद्वृषं नंदिनं नासाग्रे, बलं बलभद्रं वस्त्रे, नीलत्वात् वस्त्राणाम्, स्वःकुम्भिनं ऐरावतं कुम्भयोः, एतेषां सर्वशुक्लानां कथितस्थाने कार्ष्ण्यात् । अमुमर्थं दृढयन् अर्थान्तरन्यासमाह—अहो इति आश्चर्ये, वैरस्य दुरन्ततां दुक्खा (दुःखा) न्ततां धिग् । या दुरन्तता तत्सन्ततौ तत्सन्तानेऽपि स्फुरति । वाग्देव्यादयः यशःसन्तानमिति कृत्वा । दीपक-भ्रान्तिमतोः संकरः ॥ ८३ ॥

८४. **भेजेति** । यस्य राज्ञः शयपयोजन्मनि करकमले, असौ इंदिरा लक्ष्मीः, शयालुतां निद्रालुतां भेजे। लक्ष्म्याः कमले शयनस्य न्यायात् । नारायणः खड्गच्छलमंगीकृत्य लक्ष्म्याः [पृ०३१.१] स्नेहेन स्वयं समैदाजगाम। अयमर्थश्चेत् एवं न स्यात्, तदा अस्य खड्गस्य बलिनो ये वैरिणः शत्रवस्तेषां विक्रमभरस्य यो ध्वंसः तस्मिन् संयति संग्रामे, कुतः कुतः आगता कौतस्कुती, एवंभूता शक्तिः नितमामत्यर्थं संबभूव, कथं संभवति स्म? । श्रीपतिपक्षे, बलिर्दैत्यविशेषः स एव वैरी । कीदृशस्य? उल्लासिनी नीला द्युतिर्यस्य सः, तस्य । खड्ग,- विष्णु-पक्षे तुल्यम् । कौतस्कुतीति 'भ्रातुष्पुत्रकस्कादयः' इति सिद्धम् । श्लेषोऽलंकारः ॥ ८४ ॥

८५. **दिगिति** । दिशां शैलाः कुलाचलाः, दिशां द्विपाः दिग्गजाः । दिक्शब्दः उभयत्र संबध्यते । कूर्म्मः कृष्णावतारः, भोगिविभुः सर्प्पराजः, पश्चाद् द्वंद्वः । एते धरित्रीं उद्धृत्य भवन्, तस्याः पृथिव्याः, भूयः पुनरपि, यो भरो भारस्तेन भंगुराः भंगशीलाः, कंप-च्छलात् मोक्तुमिच्छन्तोऽपि, अहं कविः एवं शंके— लज्जाकीलककीलिता इव तां धरित्रीं ते दिक्शैलादयः न त्यजंति स्म । लज्जाकीलकस्य हेतुं क्तान्तेनाह—यं पृथ्वीराजं प्रतिपन्नसूरं दृष्ट्वा, परं दृढव्रतं दृष्ट्वा, लज्जिताः । गुणिनः स्वयं प्रतिपन्ननाशं न कुर्वते इति लोकव्यव-हारः । व्यंग्यगर्भितः उत्प्रेक्षालंकारः ॥ ८५ ॥

८६. **औन्नत्येनेति** । अस्य नृपस्य औन्नत्येन उच्चभावेन यशोभरेण च हिमवान् परां प्रकृष्टां पराभूतिं लंभितः सन्, उच्चैरतिशयेन अस्य नृपस्य पराभवपदं लंभयितुं प्रापयितुं, स्वयं आत्मनः, तौ औन्नत्य - यशोभरौ पुनर्वाञ्छन् पुत्रीप्रदानादिभिः व्यर्थं ईशाराधनमकरोत् । मूढो जडः हिमवान् तयोः [पृ०३१.२] औन्नत्य - यशोभरयोर्मध्ये एककेन यशसा जितं तं ईशं किं न वेद किं न जानीत? मूढत्वादेवेत्यर्थः । गूढोपमालंकारः । पंच वृत्तानि शार्दूलविक्रीडितानि ॥ ८६ ॥

८७. **चिन्तारत्नेति** । अस्य नृपस्य दानं देव्यः जेगीयन्ते स्म । भृशा [मी]-क्ष्ण्येन गायन्ति स्म । किं कुर्वन्त्यो देव्यः? सिद्धाः देवविशेषाः पुण्योदयकाले दृश्याः मनो-भिलषितदातारस्तेषां आपगा नदी अर्थात् स्वर्गगंगा तस्यास्तटे कामधेनुसमूहान् चारयन्त्यः। किं०ष्टाः देव्यः? श्रमविनाशार्थं चिन्तामणिबद्धे निरन्तरपीयूषसिक्तकल्पद्रुच्छायाछादिते एवंभूते चत्वरे चत्वरे निषिणाः (षण्णाः) । चिन्तामणि - कल्पद्रु - कामधेनु - सिद्धकामधेनु - गोपालि-काम्यः एतस्य दानमधिकं इति ध(ध्व)न्यते । वीरमूलः अद्भुतप्रान्तो रसः । अतिशयोक्ति-रलंकारः । स्रग्धराछन्दः ॥ ८७ ॥

८८. **शश्वेति** । येन क्ष्माभृता राज्ञा भूतलं निरन्तरं निरीतितां ईतिराहित्यं गम-यिता प्रापयिता, अतिवृष्टयोऽपि समुद्रस्य परं पारं प्रयातुं आदिष्टाः । षडपि ईतयः पूर्वं निर्वा-सिता इत्यपेरर्थः । यत्तत्-शब्दौ अव्ययौ हेतुवाचकौ । उच्चैरतिशयेन शत्रुस्त्रीभिः निजेषु नेत्रेषु प्रक्षिप्य, अतिवृष्टयः रक्षिरे पालिता यत्, तद्धेतोः, मारितभर्त्रा तेन राज्ञा साकं सह, रिपुस्त्रीभिः किं वैरिभावः न पुपुषे? अपि तु पुपुषे । शत्रोर्वैरिणो रक्षणमेव परं वैराचारः । शत्रुस्त्रीनेत्रेषु सदा अश्रुवर्षणं अतिवृष्टेर्ध्वनिः । अद्भुतो रसः । अतिशयोक्तिरलंकारः । शार्दूल-विक्रीडितं छन्दः ॥ ८८ ॥

८९. **यत्खङ्गेति** । यस्य [पृ० ३२.१] राज्ञः खड्गो यत्खड्गः, तेन, क्षुण्णाः खण्डिताः ये भूमिपतयो नृपास्तेषां या विततिः श्रेणी, तस्याः शिरसः संचरन्त्यः याः रक्तधारास्तासां वारांराशिः समुद्रः प्रसरन् सन् समस्तं भूतलं रक्तमेव अकरिष्यत् व्यधास्यत् । यदि एषा समीपवर्तिनी, प्रोद्गच्छन् उदयं प्राप्नुवन्, अच्छः पूर्णिमासंबन्धी यः अमृतकरश्चंद्रस्तस्य किरणैः, क्षुब्धो यो दुग्धाब्धिः क्षीरोदः तद्वन्मुग्धा मनोहरा एवंभूता, यस्य राज्ञः कीर्त्तिः यत्कीर्त्तिः, विस्फुरन्ती प्रसरन्ती, तस्य समुद्रस्य श्वेततां तत्श्वेततां, सपदि शीघ्रं प्रापयिष्यत् । क्रियातिपत्तिः । स्रग्धराछन्दः ॥ ८९ ॥

९०. **वीरे इति** । यत्र यस्मिन् वीरे, दानयुद्धलक्षणे रणे संग्रामे वितरणे दाने, संलब्धं लक्षं वेध्यं यैस्ते, तान् । पक्षे संलब्धं लक्षं शतसहस्रं स्वर्णानां यैस्ते, तान् । एवंभूतान्, सन्मार्गणानां प्रधानबाणानाम्, पक्षे याचकानां च गणान्, तन्वाने विस्तारयति सति, कश्चिदन्यो नृपः, दानपरताम्, नो वा अथवा, अभटं आत्मानं भटं मन्यते इति भटं मन्यस्तस्य भावस्तत्ता, ताम् । चिरं संभ्रान्तचित्तः सन् श्रयति स्म । संभ्रान्तचित्तत्वे हेतुमाह—पूर्वोपार्जिता संग्रामाद् दानाद्वा या कीर्त्तिस्तस्याः कर्त्तनमीः, तया । हेतौ तृतीया, श्लेषोऽलंकारः, शार्दूलविक्रीडितं छन्दः ॥ ९० ॥

हम्मीरमहाकाव्यदीपिकायां सप्तदशराजवर्णनो
नाम द्वितीयः सर्गः ॥ २ ॥

[अथ तृतीयः सर्गः ।]

१–३. **अथेति** । अथानन्तरं **सहावदीनेन तुरुष्केण** अलमुपद्रुतास्सन्तः पश्चिमभूमिपालाः **सिन्धुसौवीर** [पृ० ३२.२] देशीयाः, श्री**चन्द्रराजं** अग्रेकृत्य, भुजोर्जा भुजबलेन विजिताः अरयः शत्रवो येन सः, एवंभूतः **पृथ्वीराज**स्तस्य आलयद्वारः गृहद्वारः स, तम्, भेजुः सेवन्ते स्म । कीदृशेन शकेन ? तरसा बलेन, प्रथीयः प्रथिष्ठं अति पृथुरसायाः पृथिव्यास्तलम्, स्वशये स्वहस्ते शयालुं निद्राशीलं वितन्वता । कीदृक्षं चन्द्रराजम् ? **गोपाचल**वासिनम् । समस्तपृथिव्याः आनन्दनेन हेतुना निजं नाम सत्यार्थतां नयन्तम् । यतश्चन्द्रवद् राजते इति कृत्वा । कीदृशं आलयद्वारम् ? उपायनेन ढौकनिकया आनीता ये महेभाः महागजास्तेषां कुम्भेभ्यो गलन् यो मदस्तेन आर्द्रीकृतः भूमिभागो यस्य स, तम् । ऊर्ज्जण बल-प्राणनयोः । क्विप्प्रत्ययेन व्यञ्जनान्तं पदं सिद्धम् । **सहावदीन**शब्दस्य नाम कोशादौ अविद्यमानत्वाद् दिलीपशब्दवन्न दोषः । यः खलु द्रव्यशब्दो यादृच्छिकः डित्थादिः, स स्वसमयसंकेतितः सकलजगदन्यापोहरूपस्तद्द्रव्याविर्भावात् पूर्वं नासीत् । संकेतादेव, न वाच्यवाचकसंबन्धात् । यथा दिलीपः पित्रा संकेतितः स च विभक्तिपरिणामेन परणि(रिण)तः । एवमत्रापि सहावदीनेनेति सिद्धो विभक्तिनिक्षेपः । त्रयाणां वृत्तानामेकक्रियासंबन्धो विशेषकमिति । उपजातिश्छन्दः । कथाकथनमेतत् ॥ १–३ ॥

४. **प्रवेशितेति** । अथ आनन्तर्ये, ते धरणेः पृथिव्याः कान्ताः भर्तारः, वेत्रकरेण नरेण दौवारिकेण स्वामिवाण्या प्रवेशितास्सन्तः यथास्थानं उपाविशन् । शेषं सुगम[प॰१३.१]मम् ॥ ४ ॥

५. **पूर्वार्द्धं सुगमम्** । एते भूपाः पाश्चात्त्याः श्रियं किं न धारयन्तीति प्रश्नः । ग्रीष्मकाले सरांसीव यथा श्रियं न धारयन्तीत्युपमालंकारः ॥ ५ ॥

६. **तमिति** । अथ **चन्द्रराजः गोपाचलीयः**, तं **पृथ्वीराजम्**, चन्द्रश्रियश्चन्द्रलक्ष्म्याः गर्वस्य सर्वंकषा समूलोच्छेदिनी या दन्तदीप्तिः दन्तकान्तिः, तया उपलक्षितः जगाद । चन्द्रराजः किं कुर्वन्निव ? हृदि हृदये उल्लसन् यो वाङ्मयदुग्धसिन्धुः शास्त्रदुग्धाब्धिः, तस्य तारतरान् अत्यर्थोज्ज्वलान् ऊर्मीन् तरंगान् विस्तारयन्निव । ऊर्मीशम्याविति पुंस्त्रीलिङ्गता । उत्प्रेक्षालंकारः ॥ ६ ॥

७. **तपः इति** । तपःप्रभावेण अर्जितं वर्य्यं प्रधानं वीर्यं येन सः । **शकमेदिन्याः तुरुष्कभूमेः** इनः स्वामी । यद्वा शकानां तुरुष्काणां मेदिनीनः भूपतिः । ईदृशः **सहावदीनः** बाहुजमण्डलानां क्षत्रियमण्डलानां अवनौ पृथिव्यां उपप्लवाय उपद्रवाय धूमकेतुरिव अजनि । उपमालंकारः ॥ ७ ॥

८. **देशानिति** । यः सहावदीनः, बाहुजराजराजेः क्षत्रनृपश्रेणेः कुलानि विगृह्य, विपदाकुलानि आपत्पूरितानि चक्रे । भृशाभीक्ष्ण्येन चकारेत्यर्थः । कथं चकार ? इत्याह—अशेषान् देशान् जहि जघान । नागराणां पौराणां एणनेत्राः स्त्रीः हर जहार । मन्दिराणि गृहाणि दह ददाह । पञ्चमीमध्यमपुरुषस्थाने परोक्षाप्रथमपुरुषपर्यायः । अत्र च हैमसूत्रम्—भृशाभीक्ष्ण्ये हि स्वौ यथाविधि तद्ध्मौ चेति सिद्धम् ॥ ८ ॥

९. **अशेषेति** । अशेषानां भूपालानां विशेषकवत् [प॰१३.२] तिलकवत् आभा कान्तिर्यस्य सः । तस्यामन्त्रणं विधीयते भोः !, नाम इति संभावनायाम्, पृथ्वीराज ! ते क्षोणिभुजो नृपाः भूमौ के ? अपि तु न केऽपि । येषां वृन्दैः स शकः दरीर्गुहाः न पूरितवान् । तस्मात् त्रस्ताः सर्वे गुहासु प्रविष्टाः इत्यर्थः । कीदृशानां येषाम् ? स्वौजसा स्वप्रतापेन त्रासिताः ये बाहुजास्ते, तेषाम् ॥ ९ ॥

१०. **यः इति** । भो समस्तनृपतिलकतुल्य ! यः शकः आकुलैर्वीरकुलैः इति व्यतर्कि इत्यूह्यते स्म । इति किम् ? अयं भार्गवः परशुरामः पुनरेव जातः किम् ? । शतृप्रत्ययेन परशुरामतुल्यतामाचष्टे । संगरे संग्रामे क्षणात् क्षात्रं क्षत्रकुलं यमस्य वेश्म गृहं नयन् प्रापयन् । संशयोऽलंकारः ॥ १० ॥

११. **अयमिति** । आः संभ्रमे, अयं समागात् अयं समागात् इति वीप्सा । भृशाभीक्ष्ण्याविच्छेदे, द्विः प्रोक्तमवादे इति हैमसूत्रेण वीप्सा सिद्धा । जनाः लोकाः यतः यस्माद् भयेन दशापि दिशः ईक्षमाणाः विस्तारितनेत्रकमलं यथा स्यादेवं तथा निर्निमेषा आसन् । निमेषराहित्येन अतिभयसूचा । वीप्सायां तु लोकानां वचनानुकरणम् ॥ ११ ॥

१२. **उद्वास्येति** । यः शकः भूपतीनां पुराणि सत्याम्यपि उद्वास्य, द्विट्कुले शूलमिव एवंभूतं यत् **मूलस्थानं** तस्मिन् निजराजधानीं स्थापयति स्म । कः कानीव ? शम्भुर्जैपुराणीव ॥ १२ ॥

१३. **निःकारणमिति** । भो नृप ! निःकारणं निर्निमित्तं तीव्रवैरि(र)भूता तेन शकेन पराभूतास्ततः अमी भूभुजः नृपास्त्वां शरणे साधुं समैयरुः समाजग्मुः । ऋ गताविलत्यस्य [प०३४.१] धातोः ह्यस्तन्यां अन उस्रूपम् । भो नृप ! अतः अनन्तरं परं प्रकृष्टं प्रमाणं भवानेव त्वमेव । प्रमाणशब्दस्य आविष्टलिंगत्वात् नित्यनपुंसकता ॥ १३ ॥

१४-१५. **इतदीति । मयूरमिति** । वाचंयमानामपि मुनीनामपि कोपोत्पादयित्रीं एतदीयां **चन्द्रराज**संबन्धिनीं वाचं इति निशम्य श्रुत्वा । पुनः किं कृत्वा ? तरवारेः खड्गस्य मुष्टेः पटिष्ठतां पटुतां भजतीति तच्च तत्करवारिजं करकमलं च, तेन कूर्चं दंष्ट्रिकां आकृष्य नरेशः **पृथ्वीराजः** इत्युच्यमानां प्रतिज्ञामकरोत् । प्रतिज्ञामेवाह—एनं **सहावदीनं** मयूरबन्धेन निबध्य यदि वा युष्माकं पदारविन्दे न क्षिपामि तर्हि तदा **चाहमाने** अन्वये वंशे न जात इति । वृत्तद्वये एकस्संबन्धः ॥ १४–१५ ॥

१६. **तत इति** । ततः आनन्तर्ये, तता विस्तीर्णा श्रीर्यस्य स अव्याकुलमनोव्यापारः पृथ्वीराजः चञ्चन् दीप्यमानः चचाल । प्रतिपन्थिनां शत्रूणां माथः उच्छेदः तस्य चिकीर्षा कर्तुमिच्छा तया । शेषं सुगमम् ॥ १६ ॥

१७. **पौरेणेति** । एणपोताभा हरिणबालकतुल्या दृशो यासां ताः, यद्वा एणपोताभदृश इव हरिणबालकतुल्यनेत्राणीव दृशो यासाम् । पश्चात् षष्ठीतत्पुरुषः । नागरिकबालस्त्रियः, प्रयान्तं गच्छन्तं नृपं प्रति यान् कटाक्षाम् प्रचिक्षिपुः, त एव कटाक्षास्तस्य नृपस्य माङ्गल्यहेतोः भवन्ति स्म । माङ्गल्यहेतौ कटाक्षविशेषणरूपं निमित्तमाह—यतः दूर्वावत् अक्षतवत् कान्ति भजन्तीति । कृष्णसारकान्तयः इत्यर्थः । वर्ण्यते कटाक्षाणां त्रयीगतिः [प०३४.२] सिता, असिता, सितासिता च । रूपकोऽलंकारः ॥ १७ ॥

१८. **निरमिति** । प्रकाममत्यर्थम्, करे स्फुरन् कम्पमानः स्फारतरः असिदण्डः खड्गदण्डः स्फाराखेटकश्च येषां ते, ईदृशाः वराः प्रधानाः वीरवाराः भटसमूहाः प्रचेलुश्चलन्ति स्म । प्रयोजनगर्भिता तादर्थ्यचतुर्थीमाह—निरन्तरं प्राप्तो लब्धः स्वामिसकाशात् गुरुर्गरिष्ठः प्रसादः हिरण्यवस्त्रादिदानं तस्य विशुद्धिः अनृणता, निरं० तस्यै । यतस्ते भटाः शुद्धधियः स्वामिभक्ताः । जात्यलंकारः ॥ १८ ॥

१९. **धावेति** । प्रोत्तुङ्गाः उच्चैस्तराः रङ्गन्तः सलीलगामिनः ये गजास्तेषां गर्जितानि शब्दितानि, कर्तॄणि, द्वयानां द्विभेदानामपि धरणीधराणां नृपाणां पर्वतानां च, सत्त्वानि गुणाविशेषान्, पक्षे जीवान् वा, विधृता अधृतिः अधैर्यं यैस्तानि, ईदृशानि चक्रुः । कीदृंशि गर्जितानि ? आकाश-भूम्योः उदरंभरीणि । कुक्ष्यात्मोदरात् भृगः खिरिति सिद्धम् । श्लेषोऽलंकारः ॥ १९ ॥

२०. प्रतापेति । अमुष्यायं अदसीयः दोरीयः इति सिद्धम् । एतत्संबन्धिनि प्रतापसूर्ये अभ्युद्यते उद्गते सति । एतेन स्वाभाविकेन सूर्येण उद्यतेन किम्? इतीवोत्प्रेक्षते—उद्यत-श्रीश्वासौ सैन्योत्थरेणुश्च ईदृशः, तीव्रं द्युतिं सूर्यं आच्छादयां बभूव । उत्प्रेक्षालंकारः ॥२०॥

२१. रजो इति । वाजिखुराणां अभिघातादुत्थैरुच्छलितैः धूलिपटलैः करणभूतैः, जानुदघ्नत्वं जानुप्रमाणत्वमपि प्रयाताः सरितो नद्यः, सैन्यगजानां मदजलैः वंशप्रमाणा बभूवुः ॥ २१ ॥

२२. इतीति । इति [पृ० ३५.१] पूर्वोक्तप्रकारेण कृताः वैरिवाराणां वैरिसमूहानां प्राणप्रयाणाः जीवनाशाः यैस्ते । एवंभूतैः प्रयाणैश्चलनैर्नृपतिः **पृथ्वीराजस्तं** देशं अभ्यवेष्टयत्॥२२॥

२३. आजेति । अथानन्तरं, **सहावदीनो**ऽपि तं **पृथ्वीराजं** स्वदेशं उप समीपे आजग्मिवांसं आगच्छन्तं चरैराकर्ण्य अभ्यमित्रत्वं भेजे । अरिसन्मुखं व्रजन् अभ्यमित्रस्तस्य भावस्तत्त्वम् । 'अभ्यमित्रोऽभ्यमित्रीयोऽभ्यमित्रीणोऽभ्यरिव्रजन्' इति हैमः कोशः । शेषं सुगमम् ॥ २३ ॥

२४. कोदंडेति । यवनस्य तुरुष्कस्य प्रकृष्टा वीराः सुभटाः, पृष्ठे **सहावदीन**स्येति योज्यं, निर्ययुः । कीदृशाः? चापदण्डानां श्रुत्या कान्त्या मण्डितानि अङ्गानि येषाम्, ते । पुनः कटीतटेषु आसक्ता बद्धा बृहन्तो निषङ्गास्तूणीरा यैस्ते । पुनः सूक्ष्मैः अक्षिभिर्नेत्रैर्लक्षीकृता वेध्यीकृता वैरिवाराः शत्रुभटा यैस्ते । सूक्ष्माक्षित्वेन मुद्गलदेशीयत्वं शू(सू)च्यते । जात्यलंकारः ॥ २४ ॥

२५. प्राकूरेण्विति । तदानीं संग्रामावसरे सैन्यद्वयस्यापि प्राक् रेणुजालानि अमिलन् । इति सर्वत्र क्रियादीपकम् । ततः अनन्तरं, करेणुकुम्भेभ्यः भ्रमतो ये षट्पदा भ्रमरास्तेषां झंकृतानि शब्दितानि । दीपकोऽलंकारः ॥ २५ ॥

२६. परस्परेति । परस्परस्यान्योऽन्यस्य आलोकात्, नितान्तं जातः प्रसृत्वरः प्रसरणशालीयः, आयल्लकः उत्कण्ठामूलो अरतिपर्यन्तो व्यभ(भि)चारीभावस्तेन वेल्लन्ति कम्पमानानि अङ्गानि येषां, ते । नानाविधाः स्फुरन्त्यः या हेतयः [पृ० ३५.२] शस्त्राणि ता बिभ्रति ये ईदृशाः प्रवीराः, युद्धरङ्गलीलां विस्तारयामासुः । प्रतेन(नि)वानिति क्वसुप्रत्ययेन सिद्धम्॥२६॥

२७. मणीवकानीति । सर्वेषु रसेषु भावेषु च उत्कर्षापकर्षहेतुर्वायुरेव । अतोऽस्यावश्यंतया वर्णनम् । शीघ्रप्रणयानां अर्थात् भटानां यशांसि क्षिपन्, भटराजानां या राजिः श्रेणी तस्याः कराम्बुजेभ्यः करकमलेभ्यः, त्यक्ता निर्गता ये पृषत्का बाणास्तेभ्यो जन्म यस्य स, एवंभूतो मरुत्वान् ववौ वाति स्म । केषां कानीव? वृक्षाणां मणीवकानि पुष्पाणीव । पूर्णोपमालंकारः ॥ २७ ॥

२८. मिथ इति । एकदेशे जातः एकदेशीयः, घटस्य एकदेशीयः घटैकदेशीयः, कर्परः लोकोक्तौ पर्परः, **मुद्गलानां** लोकाः **षप्पर** इति व्यपदिशन्ति । घटैकदेशे भवा घटैकदेशीयास्ते च ते भटा अर्थात् मुद्गलभटाः । च पुनः इभानां घटाः, तदानीं संग्रामावसरे हठात् प्रसह्य अयुध्यन्त संप्रहरन्ति स्म । उत्प्रेक्षते—मिथः परस्परं समाननेत्रनिरीक्षणेन उत्पन्नगूढकोपा इव । मुद्गलानां गजानां च नेत्रयोः सादृश्यम् । उत्प्रेक्षालंकारः ॥ २८ ॥

२९. दन्तावलस्येति । तस्य गजस्य आघातकला मारणकला तस्यां विपश्चित् विद्वान् कश्चित् भटः, दन्तावलस्य गजस्य प्रष(ख)रं शरीरत्राणं प्रविश्य, तं गजं क्षुर्या उदरं विदार्य भूमौ विलोठयामास ॥ २९ ॥

३०. उत्प्लुत्येति । काकूत्स्थलीलां आचरितः खड्गदण्डो यस्य एवंभूतः कश्चिद्भटः, रसायाः पृथिव्या [प० ३१. १] उत्प्लुत्य, उच्चैर्गजं कुम्भं आरूढवान् सन् एणारिः सिंहस्तस्य लीलां कलयति स्म ॥ ३० ॥

३१. कश्चिदिति । कश्चित् करी गजः, स्यदात् वेगात् स्यदनं रथं आपतन्तं आयान्तम्, सुखेन काकमुखे धृत्वा, आकाशे भ्रमिं अवाप्य, संग्रामभूरेव शिला तस्यां आस्फालयति स्म ॥ ३१ ॥

३२. प्रक्षिप्येति । उग्रवेगात् करं शुण्डां प्रक्षिप्य, उत्पाटितरथकपटेन पश्चात् पट्टिशं आदधान इतर इभः करी पद्गैः पदातिभिः अमा इव सार्द्धमिव शुशुभे ॥ ३२ ॥

३३. चीत्कारमिति । मतंगजानां हस्तिनां चीत्कारमाकर्ण्य वित्रस्यतस्तुरङ्गस्य कर्णौ, मौलिवेष्टनषं(खं)डेन पिधाय स्थगयित्वा, कोऽपि सुभटस्तैर्गजैः सह आहवेच्छां संग्रामेच्छां पूरयति स्म ॥ ३३ ॥

३४. हन्तुमिति । प्रत्यर्थिना शत्रुणा लूनभुजद्वयः अन्यः सुभटः, युधि संग्रामे, अरुंतुदाग्रैर्मर्मभेदकाग्रैर्दद्भिर्दन्तैः, कोपेन हन्तुं आगच्छन्तं दन्तिनम्, दद्भिरेव दन्तैरेव दशन्, नवयुद्धलीलां प्रतेने विस्तारयामास । अरुंतुदानि मर्म्मस्पृशि अग्राणि येषाम् । विध्वरुस्तिलातुदेति सिद्धम् । दद्भिरिति दन्तपादनाशकेति सिद्धम् ॥ ३४ ॥

३५. सन्नाहेति । सन्नाहसन्धौ वर्म्मसन्धिविषये अभीष्टगात्रभेदने मर्म्माङ्गच्छेदने भटानां किमाश्चर्यम् ? अपि तु न किमपि । यद्धेतोः करलाघवेन लघुहस्ततया तैर्भटैस्तेषां प्रतिभटानां परमाणुरूपं मनोऽपि अभेदि । मनोऽणु परमाणु इति नैयायिकमतापेक्षा ॥३५॥

३६. तदेति । पितरो वप्तारः सुतानां विपत्तौ मरणे यं प्रमोदपूरं लेभिरे । पूर्वार्द्धगतो [प० ३६. २] हि यत्-शब्दस्तत्-शब्दमपेक्षते । स प्रमोदपूरः अपुत्रिणामपि पितॄणां तेषां पुत्राणां जन्मकाले, एतस्य प्रमोदपूरस्य शतांशः एतच्छतांशो नाजनिष्ट । अधृतिभावमूलं आनन्दपर्यंतं भावद्वयसांकर्यरूपं वृत्तम् ॥ ३६ ॥

३७. अथेति । अथानन्तरम्, तुरुष्का उद्भटैश्चारभटैः सूरैः पृथ्वीराजसंबन्धिभिश्चण्डखड्गदण्डैः करणभूतैः अभिताड्यमानाः सन्तः, समन्तात् नेशुः अदर्शनं प्रापुः । एकविलोचनानां काकानामिति दृष्टान्तोपन्यासः सुगमः । दृष्टान्तोऽलंकारः ॥ ३७ ॥

३८. स्यात् पेषेति । पेषयन्त्रान्तरे घरट्टयन्त्रान्तरे संस्थिताः, पे०, एवंभूतानां हरिमन्थकानां चणकानां यादृशी अवस्था स्यात्, अर्थात् चूर्णन-भर्जनरूपा, भूपतिर्बाहमानः पृथ्वीराजस्तस्य रणे आश्रयो येषाम्, ते, एवंभूतानां यवनेश्वराणां तुरुष्काणां तादृशी अवस्था अभूत् । प्रतिवस्तूपमालंकारः ॥ ३८ ॥

३९. दृष्ट्वेति । शकेशः सहावदीनः आशु शीघ्रं क्रोधादधाविष्ट । शेषं सुगमम् । उपमालंकारः ॥ ३९ ॥

४०. तमापतन्तमिति । पूर्वार्द्धं सुगमम् । कीदृशः पृथ्वीराजः? अन्तर्हृदये स्फुरन् यः क्रोधकृशानुः क्रोधाग्निस्तस्य या कीला, तदनुकारी यो रागः रक्तता तेन अरुणे रक्ते दारुणे रौद्रे अक्षिणी यस्य सः । राजादित्वाददन्तः ॥ ४० ॥

४१–४२. करोदरेति । प्रपूरयन्ताविति । तौ पृथ्वीराज-सहावदीनौ क्रुधा कोपेन चिराय युद्धं आतनुताम् । द्वयोर्वृत्तयोरेकस्संबन्धः । अभ्युद्यतौ एतौ वन्यगजौ किं इति वीरवारैस्तर्क्यमाणौ [पृ० ३७.१] ऊह्यमानौ । कीदृशौ? करोदरे हस्तमध्ये उल्लासी यो महासिदण्डः महाखड्गदण्डस्तस्य छलेन छद्मना उल्लसत् यत् पुष्करं सुण्डाग्रं तेन दुर्निरीक्ष्यौ दुर्दर्शौ द्रष्टुमशक्यावित्यर्थः । युग्मम् । प्रथमश्लोके संशयोऽलंकारः ॥ ४१–४२ ॥

४३. एवमिति । अमुना प्रकारेण पृथ्वीराजः संग्रामे युध्यमानः सन्, हठात् किञ्चित् छद्म विचार्य, सहावदीनं निश्चयेन बद्ध्वा आत्मीयां विधिवत् प्रतिज्ञां पूरयति स्म । पाश्चात्यभूपालानां चरणे क्षिप्त इत्यर्थः ॥ ४३ ॥

४४. मही इति । ततः पश्चात्, शरणागतांस्तान् पाश्चात्यान् नृपान्, स्वे स्वे विषये देशे, न्यायेन अधिकारिणः कृत्वा, विमानीकृताः अपमानिताः शत्रुजाताः शत्रुसमूहा येन, एवंभूतः स मानी पृथ्वीराजः निजराजधानीं ढिल्लीपुरीं आपत् प्राप ॥ ४४ ॥

४५. वासांसीति । सुरलोके लोभि लोभनीयं महस्तेजो येषाम्, एवंभूतानि वासांसि वस्त्राणि तस्मै शकनृपाय दत्त्वा, राट् राजा पृथ्वीराज इति हेतोः मुमोच, यथागतं प्रेषयति स्म । हेतुमेवाह – अत्र अस्मिन् हते सति मया सह अन्यः को नाम नृपः संगरं विधित्सुः विधातुमित्सुः? ॥ ४५ ॥

४६. पृथगिति । असौ यवनावनीशः तुरुष्केशः, इत्थं अमुना प्रकारेण, पृथक् पृथक् संग्रामरङ्गविच्छित्त्या, सप्तकृत्वः सप्तवेलं विनिर्जितः सन्, म्लायति स्म म्लानो भवति स्म । च पुनः, ग्लायति स्म क्षीणहर्षो भवति स्म । यतो नृशंसः मनुष्य(ष्य)मारकः ॥४६॥

४७. अथेति । अथानन्तरम्, शकेशः सहावदीनः स्वस्य [पृ० ३७.२] आत्मनो बल-च्छले ताभ्याम्, तं पृथ्वीराजं जेतुमसहः असमर्थः सन्, घ(ख)र्परेशं प्रति बला-[भिला]षी चचाल । कीदृशं तम्? शकचक्रकेतुं शकचक्रे केतुरिव तम् । कः कमिव? चन्द्रो ग्रहेशं सूर्यमिव । यथा चन्द्रः क्षतक्षीणः बलाभिलाषी सूर्यं प्रति चलति । कुहूकाले क्षीणश्चन्द्रः सूर्यमभ्यर्थ्य सुषुम्णाभिधाममृतनाडीमादाय सितपक्षे वर्द्धत इति श्रुतिः ॥ ४७ ॥

४८–४९. अथेति । अथानन्तरम्, घटैकदेशीयनृपः मुद्गलाधिपः, उक्तात्मवार्त्ताय कथितनिजवृत्तान्ताय तस्मै नृपाय सहावदीनाय स्राक् तूर्णं बलं सैन्यं ददे दत्तवान् । कीदृशं बलम्? सौ(शौ)र्येण वीरचरितेन कलं मनोहरम् । पुनः कीदृशम्? संपादिता अरातीनां शत्रूणां आपत् यैस्ते, एवंभूता ये पत्तयः सुभटास्तेषां कोट्या आकुलम् । पुनः कीदृशं बलम्?

कांबोजादयो देशाः, पूर्वद्वन्द्वसमासः, **कांबोज - लंगाहथ - मीम - भिल्ल - बंगादिदेशानां** अधिपैः पेशला श्रीर्यस्य तत्। शिष्टाः प्रधानाः अष्टलक्षप्रमिताः, अमितस्य अह्निकांतस्य वायोः या त्वरा वेगवत्ता तस्याः जित्वरा जयनशीलाः, पश्चात्कर्मधारयः, एवंभूता ये वाजिनस्तुरंगास्तेषां राजिः श्रेणी यस्मिन् तत्। युग्मम् ॥ ४८–४९ ॥

५०. तत इति। ततोऽनन्तरम्, सद्यस्तत्कालं असौ **सहावदीनः**, मुद्गलाधिपतेरिति योज्यम्, प्रसरत्प्रसादात् साम्राज्यं लब्ध्वा, पूर्वंज्ञातो ज्ञातचरः न केनचित् पूर्वंज्ञातः आगत्य, अतिविग्रहेण सुरंगापातादिना **ढिल्लीं** जग्राह। तदा ढिल्ली थाणास्थानीया आसीत्। **पृथ्वीराजस्तु** [पृ० ३८.१] **अजयमेरुदुर्गे** संभाव्यते ॥ ५० ॥

५१–५२. तत इति। रणेति। हतां हता! हा! मारिता मारिता हा! इति कृतशब्दानां जनानां मुखतः शत्रुपतेः सहावदीनस्य समागमं श्रुत्वा, नृपः पृथ्वीराजः स्वल्पपरिवारोऽपि इत्यहंकारं वहन् प्रचेलिवान् चचाल। हेतुकथनं पूर्वार्द्धे सुबोधम्॥ युग्मम्॥ ॥ ५१–५२ ॥

५३. प्रागिति। प्राक् पूर्वं लग्ना ये तद्धस्ताः पृथ्वीराजहस्तास्तेभ्यो भृशमनुभूता भीर्येन स, एवंभूतः शकस्तं पृथ्वीराजं समीक्ष्य इति चिन्तितवान्। हेतुकथनं उत्तरार्द्धे सुगमम्॥ ५३ ॥

५४. तत इति। ततोऽनन्तरम्, निव(बि)डान्धकारे निशीथे अर्द्धरात्रौ प्रत्ययितैः आप्तैः, संप्रेषितैः पुरुषैरिति योज्यम्, शकेशः सहावदीनः, बहुसुवर्णदानैस्तस्य पृथ्वीराजस्य अश्वपालं तौर्यिकैर्वादित्रवादकैः सह अबीभिदत् भेदयति स्म ॥ ५४ ॥

५५–५६. दिष्ट्येति। आकाशशेषेति। उभयेषामपि सैनिकानां वचनयुक्तिं कविराह – अस्माकमिति योज्यम्, अस्माकं द्(दि)ष्ट्या समागता भवन्तः ध्रुवं निश्चितं निजानि वेश्मानि अस्मदुक्ता यास्यन्ति। हन्मो मारयामो वयम्। अथ स्वराज्यं दृढं वितन्मः कुर्म्मो वयम्। मिथोऽपि परस्परमपि इत्युक्तियुक्तिविस्तारकाः, इति सैन्यद्वयानां वचनम्। कविः शकानां सौप्तिकमाह – शकास्तुरुष्का निभृतं निश्चलमवाचालम्, समन्तात् चतसृष्वपि दिक्षु समेत्य, पृथ्वीपतीये पृथ्वीराजसंबन्धिनि शिबिरे सेनानिवेशे निपेतुः पतितवन्तः। क्व प्रस्तावे? आकाशमेव शेषं यस्य एवं[पृ० ३८.२]भूते चन्द्रबिम्बे सति। अर्थात् आकाशशेषं प्राप्ते सति। च पुनः हिमद्युतौ चन्द्रे प्रकाशकल्पे सति, अर्थात् ईषत् प्रकाशरूपे सति, सौप्तिकं चक्रुरिति भावः॥ ५५–५६ ॥

५७–५८. गृहाणेति। प्रवर्त्तमानयेति। नाटारम्भाभिधस्तुरंगमः नृपाय पृथ्वीराजाय अश्वयते – प्रकृष्टोऽश्वः अश्वतरः अश्वतर इव आचरति अश्वयते। 'खेताश्वाश्वतरगाल्लोडिताह्वरकस्याश्वतरे तकलुक्' इति हैमसूत्रेण सिद्धम्। यद्वा, अश्वतरो वेसरः। किं विशिष्टोऽश्वः? शकेशतुन्नेन सहावदीनप्रेरितेन अश्वपेन अश्वपालकेन, तदा संग्रामप्रस्तावे, नृपाय ददानः दत्त इति यावत्। क्व सति संग्रामे? सर्वतः प्रवर्त्तमाने सति। कीदृशे समरे?

इत्थं पूर्वोक्तप्रकारेण भटानां प्रोद्भटैर्वाक्यैश्चित्रं विविधं तस्मिन् । इत्थमिति कथम्? भट-वाक्यकल्पना सुगमा । सुगमम् ।। ५७–५८ ।।

५९. तमिति । अथानन्तरम्, अश्वं नाटारम्भाभिधं आरूढं अमुं पृथ्वीराजं विभाव्य ज्ञात्वा, सहावदीनगृहीतचित्तास्ते पूर्वमेदितास्तौर्यिकास्तूरवादका मृदङ्गादीन् अवीवदन् वाद-यन्ति स्म । णिगर्थेन ङिप्रत्ययेन सिद्धम् ।। ५९ ।।

६० अभ्युन्नतामिति । स चासौ तूर्यरवश्च तत्तूर्यरवः, अभ्युन्नतो अंभोधरो मेघ-स्तस्य धीरां गर्जि वितर्जयतीत्येवंशील:, अभ्यु०वितर्जी चासौ तत्तूर्यरवश्च अ०, तं निशम्य श्रुत्वा, तार्क्ष्ये तुरंगे मयूरवत् नर्त्तितुं प्रवृत्ते सति, भूपः पृथ्वीराजः क्षणं विलक्षः आस बभूव ।। ६० ।।

६१. भजेति । यवनास्तुरुष्कास्तथास्थं [प० ३१.१] विषादापन्नं अमुं पृथ्वीराजं वेगेन द्राक् तूर्णं, चटकाः सर्प्पमिव अवेष्टयेन् वेष्टयामासुः । कीदृशा यवनाः? इति पूर्वोक्तां उक्तिं वाणीं भजन्ते इति । इति कथम्? भज व्रजेति सुगमम् ।। ६१ ।।

६२. भुवमिति । नृपः सत्येस्तुरंगमात् उत्प्लुत्य भूमौ निषसाद निषण्णः । किं कुर्वन्? दक्ष(क्षि)णपादस्य जानुरंगुष्ठश्च दक्ष(क्षि)णपादजान्वंगुष्ठम्, तेन भुवं स्पृशन् । पुनः किं०, कृपाणं खड्गं वरुणं खेटकं हस्ते वहन् ।। ६२ ।।

६३. भंग्येति । भटचक्रे शक्र इव भ०, एवंभूतः पृथ्वीराजः, चिराय चित्रवि-धायि आश्चर्यकारि युद्धं चक्रे। कांश्चित् उग्रासेः उग्रखड्गस्य वेल्लनैः कंपनैर्वित्रासयन्, कांश्चन सिंहनादैर्वित्रासयन्, कांश्चन भुवो भंग्या वित्रासयन् । शतृप्रत्ययस्य दीपकोऽलंकारः ।।६३।।

६४. पृष्ठेति । यावद् युध्यति तावत् कश्चित् शकः पृष्ठे उपेत्य आततज्यं विस्ता-रितजीवं धनुः कण्ठे प्रक्षिप्य भूपतिं पृथ्वीराजं अपीपतत् पातयति स्म । पश्चात् सर्वे शका एकत्रीभूत्वा बलेन बबन्धुः बध्नन्ति स्म ।। ६५ ।।

६५. अथेति । अथानन्तरम्, स पृथ्वीराजः, द्विरपि द्विप्रकारमपि भोजने च पुनः जीवने, रतिं अहासीत् अत्याक्षीत् त्यजति स्मेति यावत् । कीदृशः पृथ्वीराजः? सहाव-दीनात् दैवविलासयोगात् प्राप्तबन्धनः, पुनः सद्गुणालीनां निशान्तो गृहं यः सः, प्रतिहत-शत्रुसमूहः । शेषं सुबोधम् । द्विरिति 'द्वित्रिभ्यां स्वि'रिति सिद्धम । मालिनी छंदः ।।६५।।

६६. यवनाधिपेति । अंगीकृतभयः शकराट् उदयराजभटं [प० ३१.२] समु-पेतमवेक्ष्य, तदा तस्मिन् प्रस्तावे, पुरीं ढिल्लीं प्राविशत् । कीदृशं भटम्? पुरा पूर्वं विभुनैव पृथ्वीराजेनैव सहावदीनदेशं अनुप्रेषितम् । त्रोटकं छन्दः ।। ६६ ।।

६७. कष्टमिति । अथानन्तरम्, उदयराज ईश(शि)तुः पृथ्वीराजस्य कष्टं प्राप्तं निशम्य श्रुत्वा, तथा अहं न अभूवम्, इति हेतोः मुहुर्मुहुर्वारंवारम्, उच्चैरतिशयेन, मूर्द्धानं मस्तकं अधुनात् । स्वतो हृदः स्वहृदयात्, तत्शल्यं स्वामिबन्धनलक्षणम्, उद्धर्तुमिव उत्खा-तुमिवोत्प्रेक्षते । इन्द्रवंशा छन्दः ।। ६७ ।।

६८. संख्येनमिति । असौ उदयराजः इत्थं पूर्वोक्तप्रकारेण ध्यात्वा' ढिल्लीं सर्वतः परिवेष्ट्य अनुदिनं पक्षद्वयं युद्ध्यमानः सन् तस्थौ । इत्थमिति कथम्? पूर्वार्द्धोक्तम्, सुगमम् । मंदाक्रान्ता छन्दः ॥ ६८ ॥

६९. म्लेच्छेति । अन्यदा अन्यस्मिन् प्रस्तावे, सविषादचित्तः कश्चित्पुरुषः म्लेच्छपृथ्वीपतिं एवं वक्ष्य[माण]प्रकारेण जगाद । एवमिति कथम्? एषकः पृथ्वीराजः संग्रामे त्वां अनेकशः सप्तवारान् अमुचत् मुमोच । हा इति खे(खे)दे, अमुं पृथ्वीराजं त्वं एकवेलमपि न जहासि न त्यजसि? । ललिता छन्दः ॥ ६९ ॥

७०. धर्मोचितामिति । स नृशंसधीः मनुष्यमारकबुद्धिः, तदा धर्मोचितामपि इति पूर्वोक्तलक्षणां तकि(द्गि)रं श्रुत्वा भृशं कुपितः सन्, तं प्रति, इति वक्ष्यमाणप्रकारेण अवक् उवाच । इति कथम्? एते हिंदुका इत एव शत्रुं बद्ध्वा मुञ्चन्ति, यतः विद्रवन्ती प्रणश्यन्ती राजन्यकानां नृपसमूहानां उपनिषद् रहस्यं येभ्यस्ते, प्रणष्टराजरहस्या इत्यर्थः । 'हिंदुका गुमरा' इति तौरुष्की [प० ४०.१] भाषा । छन्दो ललितैव ॥ ७० ॥

७१. वीरेन्द्रेष्विति । अथान[न्त]रम्, उग्रतरा तीव्रतरा रुट् कोपो यस्य एवंभूतः एषः सहावदीनः, तं नृपं पृथ्वीराजं आनाय्य, दुर्गान्तरे प्राकारमध्ये अचीचयत् । चिञ् चयने इत्यस्य धातोः णिगर्थेन डिप्रत्ययेन सिद्धम् । चिन्वन्ति नृपं सेवकास्तान् चिन्वतः सहावदीनः प्रायुंक्त । अर्थान्तरन्यासः सुगमः । केषु सत्सु? ह्रिया लज्जया वीरेन्द्रेषु धरापीठे दत्तदृष्टिषु सत्सु । पुनः केषु सत्सु? श्राक् शीघ्रं सतां साधूनां वृन्देषु सान्द्राणि यानि अश्रूणि तेषां श्रु(स्रु)त्या सिक्तायाः शोकलतिकायाः शोकबालवल्ल्याः कन्दो यैस्ते०दाः, तेषु एवंभूतेषु सत्सु । अर्थान्तरन्यासोऽलंकारः ॥ ७१ ॥

७२. शैवा इति । अद्भुतज्ञानमयं तद् ब्रह्म परमात्मरूपम्, तत्र स्थितः कोष्टमध्य-स्थितोऽसौ पृथ्वीराजनृपः स्मरन्, शिवं कल्याणलक्षणं परभवं शाश्वतं बहुकालस्थायि लेभे प्राप्तवान्, नृपाणां आलिः श्रेणी तस्यां तिलकः नृ० । शार्दूलविक्रीडितं वृत्तद्वयम् ॥ ७२ ॥

७३. पृथ्वीपतेरिति । गौडकुलमेव पंकजं तद्विकासकत्वात् बालसूर्य इव स उदयराजः, निजं तत्स्थानं निजं तद्बलं उपगम्य, तरसा बलेन युद्ध्वा, तुरुष्कैरिति योज्यम्, दिवस्पतिपदं इन्द्रपदं प्राप, स्वर्गं जगामेत्यर्थः । अन्यत् सुगमम् । वसन्ततिलकं छन्दः ॥ ७३ ॥

७४. अधिगत्येति । तस्मात् पृथ्वीराजादनु तदनु, हरिराजनृपः, अखिलां इमां पृथ्वीं स्वकरे चकार । शेषं सुगमम् । प्रमिताक्षराछन्दः ॥ ७४ ॥

७५. यन्नामेति । अहो इति [प० ४०.२] आश्चर्ये, ते च ते कवयश्च तत्कवय-स्तेषाम् । तच्छब्दस्य परोक्षार्थव्यंजकत्वात् । अर्थात् परोक्षकवितुल्यानां कवीनामपि वाणीनां पथि, यस्य राज्ञ इमे यदीया औदार्यप्रमुखा गुणाः पथिकीभावं अध्वगभावं नाभजन्त । अत्र किमद्भुतम्? अवाग्गोचरा गुणाः इत्यर्थः । कीदृशे पथि? यन्नाम्नः प्रतिवर्णं प्रत्यक्षरं संभृतो मिलितो यत्सुधापूरः सुधाप्रवाहस्तस्मिन्, आपतन् क्षरन् यद्यशःकर्पूरस्य उरुर्गरिष्ठो यो

रजोभर॰ रेणुसमूहस्तेन, प्रसृमरं प्रसरणशीलं आविर्भावि प्रकटीभवद् यत् पंकं, तेन आकुलः कर्दमिलस्तस्मिन् । लोकेऽपि पंकाकुले पथि पथिका न [ग]च्छन्तीति व्यवहारः । अतिशयोक्ति-रूपकयोः संकरः ॥ ७५ ॥

७६. **यत्पाणिमिति** । यत्पाणिं यद्धस्तं सरसीरुहं कमलं इति कृत्वा, रमा लक्ष्मीर्भेजे । च पुनः, असिदम्भात् खड्गदम्भात् हरिर्नारायणः, रागात् स्नेहात् तां लक्ष्मीं स्वयं अन्वगमत् अनुगच्छति स्म । तयोर्लक्ष्मी - नारायणयोः प्रतापः सूनुः अभूत् । यः प्रतापः अग्रजवैरिणं ज्येष्ठभ्रातृवैरिणं अर्थात् ज्येष्ठभ्राता कन्दर्पस्तद्वैरिणं स्मररिपुं महेशं, कोपात् तथा तापयति स्म, यथा स महेशः स्वस्मात् गंगां दूरयितुं क्षणमपि नालमभूत्, न समर्थो बभूव । त्रिभुवनजयिनोऽपि महेशस्य तापको यत्प्रताप इति भावः ॥ ७६ ॥

७७. **भूचक्रे इति** । यः **हरिराजः**, किमिति वितर्के, देवानामपि कुम्भजन्ममुनये अगस्त्याय अर्घं दातुं, नित्योल्लासिनः विकासिनश्च ये कासास्तैः [प॰ ४१.१] सुभगंभूष्णुः श्रीर्यस्याः सा ताम्, एवंभूतां दिवं व्यधात् चक्रे । कैः करणभूतैः ? अंशुभिः किरणैः । कीदृशैः अंशुभिः ? स्वयशःपर्वततुङ्गशिखरात् अभ्युद्गतैः । पुनः की॰ ? ब्रह्माण्डस्य आहत्या भग्नो यो वेगस्तेन विधुरैः, अतएव पश्चान्निवृत्तैः । यशःकिरणांकुराणां कासतुल्यता ध्वन्यते । सुभगंभवितुं शीलमस्येति सुभगंभूष्णुः । अतिशयोक्तिगर्भितो गूढोपमालंकारः । सार्दूलविक्रीडितं वृत्तत्रयम् ॥ ७७ ॥

७८. **विष्वगिति** । विष्वक् समन्तादञ्चतीति विष्वगद्र्यङ्, तस्मिन् । विष्वग्द्रीचि सर्वव्यापके यत्कीर्तिपूरे सति विधुश्चन्द्रः, अतिविधुरा अतिपीडिता श्रीर्यस्येति एवंभूतः, समजनि । गङ्गा तरङ्गवर्जिता अजनि, कीर्त्याऽऽवृतत्वात् । मेरुः अगौरः अजनि, तस्मात् कीर्तेरगौरत्वात् । स शर्वो महेशस्त्यक्तगर्वः अजनि । कुमुदं अमदं गर्वरहितं अजनि । इन्द्रस्यायं ऐन्द्रः सिन्धुरो गजः उद्धुरौजा नाजनि । उद्धुरं उत्कटं ओजस्तेजो यस्य सः । उपमातिरस्कारः । मालिनी वृत्तम् ॥ ७८ ॥

७९. **यान् यानिति** । यस्य क्षोणिपतेः **हरिराज**स्य सेना कापि अनिर्वचनीया नवा नूतना अनीदृशी संचारिणी चलन्ती दीपिका व्यराजततमां अत्यर्थं राजते स्म । दीपिका तु यान् व्यतिक्रामति तत्रान्धकारः, यान् प्रति चलति तत्रोद्द्योतः । इयं तु व्यतिरेकिणी इति नवा । नवीनत्वमेवाह—यान् यान् कृतनतीन् नृपान् व्यत्यगमत् व्यतिचक्राम, ते ते प्रकाशं ययुः । यान् यान् प्रति अचलत् चचाल ते ते म्लानतां [प्र॰ ४१.२] कार्ष्ण्यं भेजुः भजन्ति स्म । रूपकोऽलंकारः ॥ ७९ ॥

८०. **कर्तुमिति** । यस्य नृपस्य दिग्जयं कर्तुं उद्यतस्य निखिलं क्षोणीतलं क्रामतां अश्वानां असौ वारांराशिः अन्तरायः अजायततमां अत्यर्थमभूत् । वारांराशिः किं कुर्वन् ? वेगोत्तरं वेगोत्कृष्टं यथा स्यादेवम्, तथा धावतां अश्वानां गतिभंगतां उपनयन् प्रापयन् । अश्वानां केषामिव ? कवेर्वाचामिव । यथा कवेर्वाचां शठानां गोष्ठी अंतरायो भवति । कीदृशानां वाचाम् ? वाच्यविचारे अर्थविचारे भास्वरा रुग् यासां तास्तासाम् । उपमालंकारः ॥ ८० ॥

८१. हत्वेति। अनेन राज्ञा विपक्षभूमिपतयः शत्रुनृपाः हत्वा व्यापाद्य स्वर्वैभवं स्वर्गराज्यं लंभिताः प्रापिताः, तेऽपि शत्रुनृपाः, अस्य नृपस्य, इमां उपकारिणो भावः उपकारिता ताम्, स्वहृदये संभाव्य, गजाश्च वाजिराजिश्च वसुधा च कोशादयश्च तेषां दानं तैः सचक्रुः सत्कारं कुर्वंति स्म। एतदर्थसमर्थनार्थं अर्थान्तरन्यासो यथा – सा० सारपरोपकारोत्पादितं पुण्यं शत्रौ अपि न वन्ध्यं न निष्फलम्। अर्थान्तरन्यासोऽलंकारः ॥ ८१ ॥

८२. हुत्वेति। यः हरिराजनृपः निजक्रोधाग्निमुखे द्विड्वीरहव्यं शत्रुसुभटहोतव्यद्रव्यं हुत्वा, शुचा शोकेन, क्रन्दन्त्यः रुदन्त्यः यास्तद्रमण्यः शत्रुस्त्रियस्तासां यानि विलोचनानि तेभ्यः गलन्ति स्रवन्ति यानि बाष्पाम्बूनि अश्रुजलानि तानि, तैर्भूरिभिर्बहुभिः, अत्र भूचक्रे, तथा अतिवृष्टिं निरंतरं प्रोल्लासयति स्म यथा अन्यायबीजांकुरः [प० ४२.१] अचिरात् तूर्णं विनाशं आशिश्राय। अतिवृष्टौ बीजानि विनश्यन्तीति न्यायः। रूपकोऽलंकारः। शार्दूलविक्रीडितं वृत्तचतुष्टयम् ॥ ८२ ॥

॥ इति श्रीहम्मीरकाव्यदीपिकायां तृतीयः सर्गः ॥ ३ ॥

अथ चतुर्थः सर्गः ।

१. कुर्वन्निति। स हरिराजः असन्तापकरैः क्षन्तुं शक्यैः करैः, राजदेयद्रव्यैः, कुः पृथ्वी, तस्याः वलयस्य भूवलयस्य, उल्लासं कुर्वन्, प्रजाः लोकान् अभिवर्द्धयति स्म। कः का इव? तुषारांशुर्वेला इव। यथा चन्द्रः, असन्तापकरैः शीतलैः किरणैः, कुवलयानां कुमुदानां उल्लासं कुर्वन्, वेलाः समुद्रजलवृद्धीः अभिवर्द्धयति। उपमा-श्लेषयोः संकरोऽलंकारः। अनुष्टुप् छंदः ॥ १ ॥

२–३. राज्यमिति। विस्फुरदिति। अन्येद्युः अन्यस्मिन् दिने, श्रीगूर्ज्जरो नृपः राज्यमुपभुञ्जानाय हरिराजनृपाय, नर्त्तकीः प्रेषयामास। महीभुजे इति तादर्थ्यचतुर्थी। नर्त्तकीः का इव?। वर्षा इव। वर्षाशब्दस्य नित्यबहुत्वात्, नर्त्तकीनां वर्षाणां च श्लेषेण साधर्म्यमाह–विस्फुरन् दीप्यमानः शुक्रस्य सप्तमधातोः; वर्षापक्षे शुक्रः षष्ठो ग्रहः। पयोधरौ स्तनौ, पक्षे पयोधराः मेघाः। उल्लसन् हर्षो याम्यः। उभयत्र तुल्यम्। उपमा-श्लेषयोः संकरोऽलंकारः। युग्मम् ॥ २–३ ॥

४–१०. लसेति (१०)। ताः नर्तक्यः प्रनर्त्तितुं प्रावर्तन्त प्रवृत्ताः। उत्प्रेक्षते मूर्त्ताः कन्दर्प्पाहंकाराः। कीदृग्विधाः? लसन्तीभिर्लावण्यलीलाभिः, लोकलोचनानां लोभनाः लोभनहेतवः (१०); किं कुर्वन्त्यः नर्तक्यः? [प० ४२.२] कदाचिदिति। श्लोकः सुगमः (९); पुनः किं कुर्वन्त्यः नर्तक्यः? वात्याव्यतिकरेण उद्धूतं यत्कदलीदलं तद्वत्तनुं शरीरं कम्पयन्त्यः। च पुनः, कुम्भकारचक्रवत् तनुं भ्रमन्त्यः (८); नर्तक्यः का इव? उपमीयते – सुसेव्योः कन्दर्प्पस्य वाप्य इव। दीर्घिकाधर्म्ममारोपयति–पीनौ उल्लसन्तौ स्तनावेव कोकौ चक्रवाकौ यासु, ताः। विस्मेराणि वदनान्येव अम्बुजानि यासु, ताः।

चलन्त्यो दश एव पृथुलोमानो मत्स्याः यासु, ताः (७); दृढं यद्यौवनं तदेव सोपानं यासु, ताः। शृङ्गारः स एव वारिजलं यासु, ताः। विस्फुरन्तो ये वालाश्चिकुरास्त एव सेवालं यासु, ताः (६); क सति? अन्यस्मिन् प्रस्तावे, नृपे हरिराजे, च पुनः नृपलोके निषेदुषि सति। अन्यत् विशेषणद्वयं सुगमम् (४); केषु सत्सु? तालस्य हिल्लपटादेर्यो मेलः संबन्धस्तेन मनोहरं यत्कर्म तत् ता० यथा स्यादेवं तथा वाद्येषु मृदंगादिषु वाद्यमानेषु सत्सु। पुनः केषु सत्सु? कोकिलालापकोमलं यथा स्यादेवं तथा गायमानेषु गायत्सु सत्सु (५); सप्तभिः कुलकम् ॥ ४—१० ॥

११. तस्येति। यस्य पुरुषस्य आसां नर्त्तकीनां लावण्यसमुद्रे दुग्मनसे नेत्रचित्ते मग्ने ब्रुडते सती निर्यातुं निर्गन्तुं शक्ततां गते समर्थतां प्राप्ते, तस्य पुरुषस्य अजन्मेवाभूत्। दुग्मनसे इति राजादित्वाददन्तः ॥ ११ ॥

१२. इतीति। इत्यमुना प्रकारेण तासां नर्त्तकीनां नाट्यं पश्यन् अयं नृपः क्षणमात्रमपि त्यक्तुं मोक्तुं अलंभूष्णुः समर्थः नाभूत्। अलं भवितुं शीलमस्येति। 'भूजेष्णुक्' इति सूत्रेण सिद्धम् ॥ १२ ॥

१३. तत इति। गीतनृत्यादौ [पृ० ४३.१] दक्षाः संगीतवेदिनस्तेषां दाने परायणस्तत्परः असौ नृपः सेविनां भृत्यानां जीविकार्प्पणे सेवाद्रव्यदाने मितंपचत्वं कृपणत्वं आश्रयति स्म। सेवकानां न दत्ते इत्यर्थः। 'कृपणस्तु मितंपचः' इति हैमः कोशः ॥१३॥

१४. वार्त्तेति। ते सेवकाः वार्त्तां आजीवनं अलभमानाः अप्राप्नुवन्तस्तस्य राज्ञः सेनां अहासिषुः तत्यजुः। ओहाक् त्यागे इति धातोः अद्यतन्यां प्रयोगः। उत्तरार्द्धे अर्थान्तरन्यासः सुगमः। 'आजीवो जीवनं वार्त्ता' इति हैमः कोशः ॥ १४ ॥

१५. राज्यस्थितिमिति। प्रजाः लोकाः तथाभूतां तादृशीं राज्यस्थितिं दर्शं दर्शं दृष्ट्वा दृष्ट्वा, तस्मात् नृपात् श्राक् तूर्णं विरज्यन्ते स्म विरक्ता भवन्ति स्म। प्रजाः का इव? स्त्रितमा इव। प्रकृष्टाः स्त्रियः स्त्रितमाः। यथा प्रधानस्त्रियः दुर्भगात् विरज्यन्ते। 'खणम् चाभीक्ष्ण्ये' इति सूत्रेण दर्शं दर्शमिति सिद्धम्। पूर्वं सेवकाः विरक्ताः पश्चात् प्रजा इत्यपेरर्थः ॥ १५ ॥

१६. एतदिति। आनशे इति व्याप्नोति स्म। शेषं सुगमम् ॥ १६ ॥

१७—१९. काकनाशमिति। ततोऽनन्तरम्, भीत्या भयेन काकनाशं प्रणष्टजनताननात् शत्रुभूपतेस्तुरुष्कस्य सौख्यसर्वंकषं सौख्यसमूलोन्मूलकं आगमनं श्रुत्वा, ततोऽनन्तरम्, असौ हरिराजः इति हेतोः जलने प्राविशत्। हेतुकथनमाह—पृथ्वीराजमरणदिनमारभ्य अकृत्यं अकार्यमिति कृत्वा संत्यक्ततुरुष्कमुखदर्शनः। शेषं सुगमम्। पृथ्वीराजेन्द्रस्य या नाकलोकाप्तिः स्वर्गगमनं तस्य यो वासरः पृ०, तम्। काकैरिव [पृ० ४३.२] नश्यते, तद्वत् प्रणष्टा या जनता काकनाशं प्रणष्टजनता। 'करणेभ्यः' इति खणम् प्रत्ययेन सिद्धम्। सर्वं कषितुं शीलमस्येति सर्वंकषम्, सर्वान् सहत्वेति सिद्धम्। त्रिभिर्विशेषकम् ॥ १७—१९ ॥

२०. **नाकलोकमिति** । तस्मिन् हरिराजे ना[क]लोकं स्वर्गलोकं प्रीणातीति, कर्तुः क्वशिति सिद्धम्, तस्मिन् । अर्थात् स्वर्गं गते मृते इति यावत् । तत्परिच्छदस्तत्परिवारः अम्लासीत्, मम्लौ, म्लायतिस्मेति यावत् । जगद्दीपे सूर्ये अस्तंगते सति कमलाकरः पद्मसरः किं स्मेरः ? किं विकसितः ? अपि तु न । दृष्टान्तोऽलंकारः ॥ २० ॥

२१. **अपुत्रेति** । चिन्तया चान्तं हृत् येषां ते, एवंभूताः मन्त्रिणः, बाढमत्यर्थं मन्त्रयन्ति स्म । शेषं सुबोधम् । मन्त्रं कुर्वन्ति मन्त्रयन्ति, मन्त्रशब्दस्य णिज् बहुलमिति नामधातोः सिद्धम् । यद्वा मन्त्रिण् गुप्तभाषणे, चौरादिके धातौ, मन्त्रयन्ते इत्यात्मनेपदं सिद्धम् ॥ २१ ॥

२२. **अपत्यमिति** । न पतन्ति यस्मिन् जाते पितरो दुर्गताविल्यपत्यं पुत्रलक्षणः संतानः । अन्यत् सुगमम् ॥ २२ ॥

२३. **तदिति** । तद्धेतोः । नीवृतं **शाकंभरीदेशं** त्यक्त्वा **रणस्तंभपुरं** प्रति वयं मन्त्रिणो यामः । अर्थान्तरन्यासे सूरशब्दः श्लेषितः । सूरः सूर्यः, पक्षे सूरः विक्रान्तः ॥ २३ ॥

२४. **तत्रेति** । तत्र तस्मिन् **रणस्तंभ**देशे, अतः अस्मात् **अजयमेरु**दुर्गात्, पित्रा प्राक् निरासितः अस्तीति । अन्यत् सुगमम् ॥ २४ ॥

२५. **स्वस्वामीति** । तं भूपं आश्रिताः वयं मन्त्रिणः, न विद्यते भयं कुतोऽपि येषां ते अकुतोभयाः [पा० ४४.१] संतः कीर्त्तिपात्रीभवन्तः, अवतिष्ठेमहि अवस्थानं कुर्वीमहि । कीदृशं तम् ? स्वस्वामिनो वंश एव कासारस्तडागस्तत्र हंसस्तम् । स्था धातोः संविप्रावादिति कर्त्तर्यात्मनेपदम् ॥ २५ ॥

२६. **मन्त्रयित्वेतीति** । भूपस्येदं भूपीयं भूपसंबन्धि कोशबलादिकं भाण्डागारकटकादि । अन्यत् सुगमम् ॥ २६ ॥

२७. **दावेति** । उद्वसं देशं ज्वालयन् पश्चाच्छकः **अजयमेरुपुरं** लाति स्म । किंवत् ज्वालयन् ? दावकपावकवत् दावाग्निवत् । यथा दावाग्निः वार्क्षं अरण्यं ज्वालयन् पश्चादुपागच्छति । वृक्षाणां समूहो वार्क्षम् । समूहार्थेन अण् प्रत्ययेन सिद्धम् ॥ २७ ॥

२८. **अथेति** । अथानन्तरं ते सर्वे मन्त्रिणः **गोविन्द**भूपतेः पुरं प्राप्य समगंसत, संगच्छन्ति स्म, अमिलन्नित्यर्थः । वृत्तान्तं च निगदन्ति स्म ॥ २८ ॥

२९. **पितृव्येति** । पितुर्भ्राता पितृव्यः । अन्यत् सुगमम् ॥ २९ ॥

३०. **स्मृतीति** । स्मृतौ स्मरणज्ञाने, पूर्वं स्मृतः पश्चात्परित्यक्तः शोको येन सः । अन्यत् सुगमम् । 'अमात्यः सचिवो मन्त्री धीसखः ।' इति हैमः कोशः ॥ ३० ॥

३१. **पराभवन्निति** । स गोविन्दराजः प्रजाः लोकान् अन्वशात् अनुशिष्यति स्म । स्फीतं गरिष्ठं शांतं सौख्यं अनुभवन्, शत्रुसमूहं पीडयन्, न्यायवृद्धये समर्थो भवन् ॥ ३१ ॥

३२. **गोविन्द इति** । दिविषदां देवानां वृन्दं देवसमूहस्तस्मिन् विषये गोविन्दे चातुरीं संचारयति सति, अर्थात् स्वर्गगते सति, **वाल्हणः**, शत्रूणां समूहः शात्रवम्, तन्नो-र्मावस्तानवं तनुतां निन्ये ॥ ३२ ॥

३३. **घनवदिति** । यत्र **वाल्हणे** समरे [पृ० ४४.२] संग्रामे घनवत् मेघवत् शरासारं बाणवेगवृष्टिं विस्तारयति सति, नाशेन पलायनेनैव शत्रूणां राजहंसता मरालता व्यक्ता अभवत् । एवशब्दो अन्ययोगव्यवच्छेदार्थः । आसारे वर्षति राजहंसाः नश्यन्ति । निर्लोभनृपतित्वगुणेन राजहंसता नाऽभूत् । 'निर्लोभनृपतौ हंसः' इत्यनेकार्थः । श्लेषोऽलंकारः ॥ ३३ ॥

३४. **वर्षत्यपीति** । यस्य धनुरेव घनो मेघस्तस्मिन्, बाणधाराभिर्वर्षति सति, शत्रुभूभृतः अरिनृपाः विच्छायतां भेजिरे । एवं चित्रम् । अन्यत्र घने वर्षति भूभृतः पर्वताः सच्छायाः स्युः । अत्र तु न तथा । श्लेषोऽलंकारः ॥ ३४ ॥

३५. **सत्वरमिति** । शत्रुसमूहाः यं नृपं संग्रामे शीघ्रं जयनशीलं वीक्ष्य, नाश-हेतवे पलायनाय, नवरं केवलम्, सपक्षत्वं पक्षसहिततां अभिलेषुः ववाञ्छुः । न तु युद्धहेतवे सपक्षत्वं अपरनृपसाहाय्यं अभिलेषुः । श्लेषोऽलंकारः ॥ ३५ ॥

३६. **नाम्नीति** । यो **वाल्हणः**, विरोधिनां शत्रूणां अवनीपालतां भूमिपालतां हित्वा, द्राक् शीघ्रं, वनीपालतां वनरक्षकतां ददौ । किं कर्तुमिच्छुः ? विरोधिनां नाम्नि, च पुनः विरोधिनां धाम्नि तेजसि, संक्षेपं विधित्सुः । यमकोऽलंकारः ॥ ३६ ॥

३७. **सदेति** । तत्पुत्रौ **वाल्हण**पुत्रौ उभौ अभूताम् । काविव ? सूर्याचंद्रमसाविव । कीदृशौ पुत्रौ ? सह दान-भोगाभ्यां वर्त्तत इति । सूर्य-चन्द्रपक्षे सदा निरंतरं नभोगौ आकाशगामिनौ । गोचक्रं भूमिचक्रम् । पक्षे गावः किरणास्तेषां चक्रम् । पापानां अन्या-यिनां खंडनौ । पक्षे पापं दुःकृतम् । श्लेषोऽलंकारः ॥ ३७ ॥

३८. **गुणश्रेष्ठ** [पृ० ४५.१] **इति** । द्वितीय एव द्वैतीयीकः । स्वार्थ इकण्प्रत्ययेन सिद्धः । प्रतिपत् प्रज्ञा तस्याः घटः । अन्यत् सुगमम् ॥ ३८ ॥

३९. **सममिति** । सममेकत्र तुल्यकालं वा क्रीडां विस्तारयतोः, कलाः लिखि-तादिकाः पठतोस्तयोः । शेषं सुगमम् ॥ ३९ ॥

४०. **वीक्ष्येति** । अन्यदा नृपो **वाल्हणः**, मूर्ध्नि मस्तके, अपलितः पलितः क्रियते अनया, ईदृशीं जरां वीक्ष्य, भोगेभ्यः शपति स्म, कोशति स्म, निन्दतीति यावत् । योगेभ्यः मोक्षोपायेभ्यः श्लाघते स्म, स्तौति स्म । श्लाघह्नुस्था शपेति चतुर्थी ॥ ४० ॥

४१. **तत इति** । ततोऽनन्तरम्, भूपः **वाल्हणः**, द्वावपि पुत्रौ विधिना अनुशास्य शिक्षयित्वा, **प्रह्लादनं** राज्ये न्यधात् । **वाग्भटं** प्रधानत्वे स्थापयति स्म ॥ ४१ ॥

४२. **स्वयमिति** । राजा दिव(वि)षत्पदं देवस्थानं बभूवे । तयोः पुत्रयोः प्रीतिं द्रष्टुमिव कियत्कालं स्थित्वा । भूधातोः क्रियाव्यतिहारे गतिहिंसेति कर्तर्यात्मनेपदम् ॥ ४२ ॥

४३. कृत्वेति । सूनुः पितुः देहादूर्ध्वं कर्म और्ध्वदेहिकम्, मरणदिने काष्ठादिदानम् । 'तद्देहदानं तदर्थमूर्ध्वदेहिकम्' इति हैमः कोशः । यथेत्युदाहरणोपन्यासे । माठ्यस्य उपनिषदं रहस्यं जानातीति । अन्यत् सुगमम् ॥ ४३ ॥

४४. भास्वतीति । न असत्यस्य जनिं करोतीत्येवंशीलो यः स तस्मिन्, एवंभूते यस्मिन् राजनि भास्वति दीप्यमाने उदिते पट्टाभिषिक्ते सति, सपक्षैः सदृशैः अर्थात् कुटुंबक्षत्रियैः, विपक्षैः शत्रुभिश्च, कौशिकायितं कौशिकवत् इंद्रवत् घूकवद्वा आचीर्णम् । कुटुंबिभिः इंद्रायितम्, शत्रुभिः घूकायितम् । गुहानिवासित्वात् । चित्रं तु [प० ४५. २] नासत्ययोः अश्विनीकुमारयोः जनिं करोतीत्येवं शीलो यः स, तस्मिन् । एवंभूते भास्वति सूर्ये उदिते सति सपक्षैः पक्षसहितैः वृकैः कौशिकाय्यते । विपक्षैः पक्षरहितैः न कौशिकाय्यते । अत्र तु द्वाभ्यामपि कौशिकायितं इति चित्रम् । श्लेषोऽलंकारः ॥ ४४ ॥

४५. विशामिति । यत्र यस्मिन् विशां वैश्यानां ईशे स्वामिनि अर्थाद् राजनि, दशापि दिशः जेतुं कृतोद्यमे सति, वैरिणः प्राणान् रक्षितुम्, द्विप्रकारेणापि प्रधनं संग्रामम्, द्वितीयभेदे प्रकृष्टं धनं तत्यजुः । श्लेषोऽलंकारः ॥ ४५ ॥

४६. बलीति । विष्वक् सर्वव्यापिनी सेना यस्य । एवंभूतोऽपि यो नृपः दानवारितां दैत्यशत्रुतां न भेजे । अन्यत्र तु यः विष्वक्सेनः विष्णुः, स दानवारितां भजते इति विरोधः । विरोधपरिहारे, दानं वारयतीत्येवंशीलः दानवारी, दानवारिणो भावः, दा० । ताम् । किं०ष्टः नृपः ? बलिनां बलिष्ठानाम् । विष्णुपक्षे बलेर्वैरोचनेर्ध्वंसे । आशये चित्ते शायिनो नित्यं वसन्तः । सुष्ठु शोभनानि दर्शनानि जैनादीनि यस्य, सः । विष्णुपक्षे शये हस्ते शायी वर्त्तमानः सुदर्शनश्चक्रं यस्य । शब्दविरोध-श्लेषयोः संकरः ॥ ४६ ॥

४७. मुदेति । स नृपः निरगात् निर्ययौ । दावाग्निवत् प्रतापो यस्य । चापविदां धनुर्वेदिनां गुरुः । अन्यत् सुगमम् ॥ ४७ ॥

४८. उत्सलदिति । तुरगाः बभुर्भान्ति स्म । उत्सलन्त्या धूल्या विज्ञाताः खुराग्रैः क्षुण्णं भूतलं यैस्ते । पश्चात्कर्मधारयः । त्वरया वेगेन समीरस्य वायोः स्फूर्त्तिं शीघ्रगमनलक्षणां जयन्तीति । जात्यलंकारः ॥ ४८ ॥

४९. आजान्वीति । [प० ४६. १] जानोः आमर्यादीकृत्य लम्बीनि लम्बमानानि सुस्थूलानि यानि नीलीचीवराणि रागद्रव्यचिह्नितवस्त्राणि, तानि धारयन्तीत्येवंशीला ये ते । एवंभूताः पदातयः पद्गाः चेलुः । मूर्त्ताः सशरीराः । उत्प्रेक्षते, भयानकरसाः । उत्प्रेक्षालंकारः ॥ ४९ ॥

५०. स्तब्धेति । स्तब्धाः अनम्राः कर्णाः येषां ते । स्वर्णस्य अग्रकण्ठिका कण्ठाभरणं येषाम् । चक्षुषाः चक्षुर्ग्राह्या मातरिश्वानो वाता इव । अभूतोपमालंकारः ॥५०॥

५१–५२. वाहिनीति । विस्मेरेति । नृपः नारीरिव स्त्रीरिव वनीर्वनस्थलीर्वीक्ष्य रन्तुं उत्सुकचेताः अभूत् । अन्योऽपि नारीर्दृष्ट्वा रन्तुमुत्सुको भवति । किं० ष्टा वनीः ?

विस्मेरसुमनसः विकसितपुष्पाः ये वाणाः वृक्षविशेषाः करवीरा हयमाराश्चरोः, तैर्मनोहराः यास्तास्ताः। नारीपक्षे विस्मेराः फुल्लाः सुमनस एव पुष्पाण्येव करे यस्य एवंभूतो वीरः कन्दर्पस्तेन मनोहराः। उपमा-श्लेषयोः संकरोऽलंकारः। किं कुर्वन्नृपः? प्रचलद्भिर्बलैः कटकैः इलां पृथ्वीं विह्वलयन्। ह्वल्धातोः णिगंतेन प्रयोगः, चलयन्नित्यर्थः। कीदृशैर्बलैः। वाहिनीशतानां सेनाशतानां संश्लेषेण संबन्धेन बहुलानि यानि तैः। समुद्रपक्षे वाहिनीशतानां नदीशतानाम्। उत्प्रेक्षा-श्लेषयोः संकरः॥ ५१-५२ ॥ युग्मम्॥

५३-५४. बलभद्रा इति। केचिदिति। वनस्यान्तः अन्तर्वणं वनमध्ये, भटाः प्राविशन्। केऽपि भटाः बलेन भद्राः बलभद्रास्ततो हेतोः, हरिमार्गं सिंहमार्गं अनुसरन्तीत्येवंशीलाः। श्लेषपक्षे ये बलभद्रा [पृ० ४६.२] रौहिणेयास्ते कृष्णमार्गानुसारिण इति युक्तम्। केचिद्भटाः शशान् लोमकर्णान् धारयन्तीति ये ते। यतः दृष्टः सिंहिकासुतस्य केसरिणः विक्रमो यैस्ते, ततः शशधराः। श्लेषपक्षे ये शशधराश्चन्द्रास्ते। दृष्टः सिंहिकासुतस्य राहोः विक्रमो यैस्ते। केचित् रौद्रा रौद्ररसात्मकाः। ततः शिवां शृगालजायां अनुगच्छन्तीति। ततः वृषस्य पुण्यस्य उलंघने जांघिकाः जंघालाः। श्लेषपक्षे ये रौद्रा रुद्रपक्षीयास्ते शिवां पार्वतीं अनुगच्छन्ति। वृषस्य बलीवर्दस्य उलंघने जंघालाः। श्लोकद्वये श्लेषोऽलंकारः। अन्तर्वणमिति निःप्राप्रोऽन्तःखदिरेति णत्वम्। जंघाबलं येषु ते जांघिकाः॥५३-५४॥ युग्मम्।

५५. द्विधेति। कोऽपि भटः सिंहयोः द्वयोः अन्तर्मध्ये स्थितः द्विप्रकारेणापि पृष्ठदानेन सत्रपः सलज्जः। यश एव अमृतं पिबन् क्रोडं सूकरं व्यडम्बयत् अनुचकार। सूकरोऽपि सिंहद्वयमध्ये अमृतं जलं पिबतीति लोकोक्तिः। गूढोपमालंकारः॥ ५५॥

५६. मत्स्वामीति। कोऽपि भट इति हेतोः मध्यतः कटीदेशात् वराहं अच्छिनत् छिनत्ति स्म। हेतुकथनमाह—मत्स्वामिनो वल्लभां प्रियां वसुधां पृथ्वीं अयं सूकरः, निरन्तरं भृशाभीक्ष्ण्येन खनति चंखनीति॥ ५६॥

५७. त्वन्नेत्रेति। कश्चिद्भट इति हेतोः भार्याप्रीतये हरिणं बध्वा, सह सार्द्धं गृह्णाति स्म। हेतुकथनमाह—अयं मृगः त्वन्नेत्रकान्तितस्करः। अस्य मृगस्य, रुचेरनतिक्रमेण विधीयताम्। चौरस्य बन्धनं युक्तम्। गूढोपमालंकारः॥ ५७॥

५८. निघ्नन्निति। कस्यचिद्भटस्य करः, काकस्याक्ष्णो गोलः [पृ० ४७.१] काकाक्षगोलस्तस्य, उपमानं लभते स्म। काकस्य नेत्रद्वयं गोलश्चैकः जातिस्वाभाव्यात् नेत्रद्वयेऽपि भ्रमतीति लोकोक्तिः। किं कुर्वन्? परं अन्यं पृष्ठागतं सिंहं हत्वा पुरःस्थितं सिंहं निघ्नन्। एक एव बाहुः द्वयोः सिंहयोः प्रहारे कृतार्थत्वात्। काकाक्षगोलकोपमानम्। उपमालंकारः॥ ५८॥

५९. तत्कटीति। कश्चन भटः सिंहेन हातुं न त्यक्तुं, न प्रहर्तुं न मारयितुं, क्षणं क्षणमात्रं, क्षमः समर्थः नासीत् न बभूव। किं कृत्वा? तत्कटीदर्शनात् सिंहकटीदर्शनात्, आशु शीघ्रं प्रियां संस्मृत्य स्मरणविषयीकृत्य॥ ५९॥

६०. **व्यात्तवक्रेति** । कोऽपि भटः केसरिणः सिंहस्य छिन्नं शिरो बाहुत्राणवत् बाहुल्लवत् अदीदृशत्, दर्शयति स्म । णिजर्थेन अङा सिद्धम् । किं कृत्वा ? प्रसारितमुखे करं क्षिप्त्वा । कीदृशः ? उत्पाटितबाहुः ॥ ६० ॥

६१. **निजघांसुमिति** । मृगो हरिणः मृगी निहन्तुमिच्छुं कंचिद्भटं दृष्ट्वा आत्मना मध्यवर्त्ती आस बभूव । अत्रार्थे अर्थान्तरन्यासमाह – स्नेहकटाक्षितम् । कटा – आश्चर्यवाचकः, कटा इति अव्ययशब्दः । अर्थान्तरन्यासोऽलंकारः ॥ ६१ ॥

६२. **वञ्चयित्वेति** । कोऽपि भटः सिंहस्य यानं वाहनं लीलया आचरितं लीलायितम्, पश्चात् तत्पुरुषः । तत्, तत् धारयति स्म । किं कुर्वन् ? अतिदाक्ष्येणातिचातुर्येण हरेः सिंहस्य नेत्रविषयं वञ्चयित्वा, पृष्ठिं आरूढवान् ॥ ६२ ॥

६३. **कृत्वेति** । सिंहातिक्रान्तं अतिसिंहं स्थाम बलं पूर्वं कृत्वा, पश्चात् शस्त्रेण कुन्तादिना पातितः सन् अर्द्धमारितः [पृ० ४७.२] सन्, वराहः भृशाभीक्ष्ण्येन रटति । अत्रार्थे अर्थान्तरन्यासमाह – खलु निश्चितं स्वभावो दुस्त्यजः । अर्थान्तरन्यासोऽलंकारः ॥६३॥

६४–६५. **नृप इति । क्वचिदिति** । नृपोऽपि **प्रह्लादनो**ऽपि, क्वचिद्गिरिणदीतीरे स्फुरच्छरवणान्तरे, एकं सिंहमद्राक्षीत् ददर्श । किं०ष्टम् ? निद्रा० शयानम् । गिरिनद्यादीनामिति णत्वम् । वनस्य वेति च णत्वम् । नृपः किं कुर्वन् ? हर्षेण स्वेच्छया भ्रमन् । पुनः किं० ? श्वापदान् हिंस्रमृगान् आपदाक्रान्तान् कुर्वन् । पुनः किं० ? अरुंतुदैर्मर्माविद्भिः शरासारैः शरवेगवर्षैर्वर्षन् । विध्वरुस्तिलेति अरुंतुदेति सिद्धम् । 'स्यान्मर्मस्पृगरुंतुद' इति हैमः कोशः ॥ ६४–६५ ॥

६६. **उत्साह्येति** । नृपः **प्रह्लादनः**, तं विनिद्रितं सिंहं उत्साह्य आहूय दक्षिणेर्म्माणं दक्षिणशरीरभागच्छेदितं निर्ममे निर्म्माति स्म । कीदृशः ? अविज्ञा० अविज्ञातं शरस्य बाणस्य संधानं मोक्षणं च यस्य, सः । 'दक्षिणेर्म्मातु स मृगो यो व्याधैर्दक्षिणे क्षतः' इति हैमः कोशः ॥ ६६ ॥

६७–६८. **तेनेति । जग्राहेति** । तेनैव प्रथमं सिंहं प्रति प्रोक्तेनैव, उत्साहनादेन आह्वानशब्देन, कुतोऽपि अलक्षितप्रदेशात्, अन्यत अन्यस्मात् स्थानात्, परः कुपितः सिंहः, तावत्प्रथमतः भूपतेः प्रांशुं दीर्घं अंशं स्कन्धं तीव्राग्रदंष्ट्रया जग्राह । असौ सिंहः राज्ञा क्षुर्या छुरिकया उरोविदारं यथा स्यादेवं तथा प्रतिचस्करे अवधीत् । उरसो विदारणं पूर्वं उरोविदारम् । प्रतेश्च वधे इति सूत्रेण कृग्धातुना परोक्षया प्रतिचस्करे इति सिद्धम् । उरोविदारमिति णम् प्रत्ययेन [पृ० ४८.१] सिद्धम् । कीदृशः ? स्फुरन्ती फाला विक्रमो यस्य, सः । मिलितपराक्रमः ॥ ६७–६८ ॥ युग्मम् ॥

६९. **दंष्ट्राघातेति** । दंष्ट्राघातेन स्रवद् यद्रक्तं तस्य याः धारास्ताभिः, अभितः समंतात्, चितो व्याप्तो नृपः, क्षणं क्षणमात्रं धातूनां गैरिकादीनां द्रवेण धातुस्रवणेन श्लिष्टो यः शैलस्तस्य लीला, ताम्, दधौ धारयति स्म । उपमालंकारः ॥ ६९ ॥

७०. तत इति । तत आनन्तर्ये, दंष्ट्राविषेण उत्सर्पिणी या मूर्च्छा, तया विह्वलीकृतः स नृपः, यती मुनिः ऋद्धिमिव, पापर्द्धिं मृगयां त्यक्त्वा स्वगृहमाजगाम । उपमालंकारः ॥ ७० ॥

७१. मन्त्रेति । भूपः **प्रह्लादनः,** स्वरूपभाक् स्वस्वभावभाक् नाभूत् न बभूव । नृपः किं क्रियमाणः ? शतात् संख्यायाः परे परःशतास्तैः, वैद्यसमूहैः मन्त्रवादिसमूहैश्च भृशमत्यर्थं चिकित्स्यमानः । रोगप्रतिकारविषयीक्रियमाणः । 'परःशताद्यास्ते येषां परा संख्या शतादिका' इति हैमः कोशः ॥ ७१ ॥

७२. दुश्चिकीति । अथानन्तर्ये, भूपः **प्रह्लादनः** दुश्चिकित्सिततरं चिकित्सा रोगापनयनम्, दुःखेन चिकित्सा यस्य स दुश्चिकित्सः । अतिशयेन दुः० तरः, तम् । ईदृशं आत्मानं ज्ञात्वा **वीरनारायणं** पुत्रं निजे स्वकीये पदे राज्ये सर्वथा सर्वप्रकारेण अभ्यषिंचत् अभिषिक्तवान् ॥ ७२ ॥

७३. पतिष्यदिति । पतिष्यन्ती भविष्यत्काले पतनशीला या **वाहमानीया** राज्यश्रीवल्लिस्तस्याः पादप इव, तं एवंभूतं सोदरं भ्रातरं **वाग्भटं** समाहूय, नृपः इति अमि वक्ष्यमाणप्रकारेण जगिवान् [प० ४८. २] उक्तवानित्यर्थः ॥ ७३ ॥

७४. शौर्यमिति । शौर्यं बुद्धिरविश्वास एतत्त्रयं राज्यश्रीकारणम् । स्थाविरे वार्द्धके तत्त्रयं पूर्वोक्तं स्वापं सुलभम् । पुनः पुनरपि तत्त्रयं शैशवे बाल्ये दुरापं दुर्लभम् । 'वार्द्धकं स्थाविरं ज्यायान्' इति हैमः कोशः ॥ ७४ ॥

७५. तदेति । स्वापं सुलभं चापल्यं चपलता यस्मिन्, तत्तस्मिन् । एवंभूते बाल्ये वयसि असौ **वीरनारायणः** स्थितोऽस्ति । तद्धेतोस्तथाकारं त्वया अनुशास्यः शिष्यणीयः, यथा कचिदहितं न स्यात् । तथाकारमिति 'अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ।' 'यथा तथा दीर्घोत्तरे' इति सूत्रद्वयेन सिद्धम् ॥ ७५ ॥

७६. दौःशल्येनेति । अथ आनन्तर्ये, **वाग्भटः प्रह्लादननृपभ्राता,** अस्य सुतस्य **वीरनारायणस्य,** दौःशल्येन दुश्चरितभावेन, मन्युना कोपविशेषेण, गद्गदा गीर्यामी या सा तया, एवंभूतया गिरा वाण्या सशल्य इव, मन्दं मन्दं यथा स्यादेवं तथा, आचख्यौ व्याचष्टे ॥ ७६ ॥

७७. भवितव्यमिति । वाग्भटवचनमेतत् । भो स्वामिन् प्रह्लादन ! भवितव्यं भाव्यं निरोद्धुं कोऽपि न सासहिः, न भृशाभीक्ष्ण्येन शक्नोति स्म । सासहीति औ सासहि वावहि चाचलि पापतीति सिद्धम् । भो स्वामिन् ! एनं वीरनारायणं पुरा पश्चात्, परं विशेषेण, सदा त्वामिव उपासे सेविष्ये । उपासे इति भविष्यन्त्या अर्थे वर्तमाना । 'पुरायावतोर्वर्त्तमाना' इति सूत्रेण सिद्धम् ॥ ७७ ॥

७८. **उक्त्वेति**। इति पूर्वोक्तप्रकारेण उक्त्वा, वाग्भटे तूष्णीं तस्थुषि सति, क्षितिपाग्रणीः प्रह्लादनः, आत्मनो हितं आत्मनीनं तस्य चिकीर्षया कर्तुमिच्छया [प० ४९.१] परमात्मनः परमब्रह्मणः सस्मार। स्मृत्यर्थे षष्ठी॥ ७८॥

७९. **राज्ञेति**। अथ आनन्तर्ये, तस्मिन् राज्ञि **प्रह्लादने** अस्तमिते सति, **वीरनारायणो** नृपः लोकानां भास्वानिव सूर्य इव आसीत् बभूव। यो भास्वान् सूर्यः कमलानां पुष्पविशेषाणां उल्लासहेतुर्भवति। अयं तु कमलायाः लक्ष्म्याः इति। उपमाश्लेषयोः संकरः॥ ७९॥

८०. **स्वं तेजसेति**। यस्य **वीरनारायणस्य** असिः खड्गः, किमित्युत्प्रेक्षते—इति हेतोः श्यामतां कृष्णतां अधात्। किं कुर्वतः? अस्य आत्मतेजसैव द्विषतः शत्रून् आशु तूर्णं पिबतः सतश्चूर्णयतः, सतो विद्यमानस्य। हेतुकथनमाह—मत्प्रतिकर्म्म मत्प्रसाधनं वृथा इति। 'प्रसाधनं प्रतिकर्म्मे'ति हैमः कोशः। उत्प्रेक्षालंकारः॥ ८०॥

८१. **विस्फूर्जेति**। यस्य नृपस्य खड्गलता खड्गवल्ली नागदमनौषधिवत् बभौ शुशुभे। केषाम्? विस्फू०! विस्फूर्जद् विजृम्भत् यद्भुजशौण्डीर्यं बाहुपराक्रमः स एव फणभृत् सर्प्पः तेन दष्टा ये वैरिणः विस्फू० णः, तेषाम्। उत्प्रेक्षालंकारः॥ ८१॥

८२. **सोऽन्यदेति**। स नृपः अन्यदा अन्यस्मिन्प्रस्तावे प्रमदानेत्राणां पावनं पवित्रीकरणं प्र०, एवंभूतं यौवनं आश्रितं सन्, **कत्सवाहस्य** पुत्रीं परिणेतुं **आम्रपुरीं** नगरीं अगात् समाजगाम॥ ८२॥

८३. **तत्राभिषेति**। तत्र **आम्रपुर्यां जल्लालदीन**तुरुष्कराज्ञा **वीरनारायण** अभिषेणितः। सेनया अभियातः अभिषेणितः। उत्तरार्द्धं सुगमम्॥ ८३॥

८४. **तत्रेति**। तत्र **रणस्तंभे** तेन **वीरनारायणेन** सार्द्धं **जल्लालदीनः** [प्र० ४९.२] चिरं युद्ध्वा, तं वीरनारायणं छलग्राह्यं ज्ञात्वा, निजां पुरीं **ढिल्लीं** निवृत्य अगात्॥ ८४॥

८५. **कियतीति**। अथ आनन्तर्ये, यतश्छलग्राह्यस्ततो हेतोः, स शकभूपतिः **अमुं वीरनारायणं** छलेन विजिगीषुः, इत्थं वक्ष्यमाणप्रकारेण, दूतेन अचीकथत् कथयति स्म। णिगर्थो ड् प्रत्ययः॥ ८५॥

८६. **ज्योतिष्वेति**। ज्योतिषां ग्रहनक्षत्रताराणां चक्रेषु यथा सूर्याचंद्रमसौ तथा निखिलेष्वपि आवां सार्वभौमावः। सार्वभौमौ इव आचरतः सार्वभौमावः। आधाराच्चोपमानादाचारे क्यङ्प्रत्ययलोपात् सिद्धम्। 'शेषात्परस्मैपदम्' इति परस्मैपदं सिद्धम्। सूर्यश्च चन्द्रमा च सूर्याचन्द्रमसौ। 'आ द्वंद्वे' इति आत्वं सिद्धम्। दूतकथनमेतत्॥ ८६॥

८७. **तज्ञौ युक्तेति**। दूतः पूर्वकथितां वार्त्तां निगमयति। तत्तस्माद्धेतोर्नौ आवयोः मिथ एकान्ते प्रीतिर्युक्ता। कीदृशी प्रीतिः? पचे० पचेलिमः परिपाकोन्मुखः फलोदयो यस्याः सा। कलङ्कविस्फूर्त्तिः ननु। भिदेलिमतमा अत्यर्थं भेदयोग्या आयतिः उत्तरकालो यस्याः सा॥ ८७॥

८८. **सहायमिति।** भो **वीरनारायण!** त्वादृशं सहायं लब्ध्वा दृढानपि वैरि-वंशान् शत्रुकुलानि अहं दंदह्येय, भृशामीक्ष्ण्येन दहेयम्। इति चेतसः संभावना। यथा पावको वह्निः समीरं वायुं सहायं लब्ध्वा वैरिरूपान् वंशान् तृणध्वजान् दहति। मैत्र्याः फलकथनमेतत्। उपमा-श्लेषयोः संकरः॥ ८८॥

८९. **प्रीतोऽस्मीति।** पूर्वार्द्धं सुगमम्। यद्यहं तुभ्यं द्रुह्यामि द्रोहं करोमि, तदा कर्त्रे शपे। कर्तुः शपथोऽस्तु इत्यर्थः। [पा० ५०.१] 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति तुभ्यमिति चतुर्थी। 'श्लाघह्नुङ्स्थाशपामिति' कर्त्रे इति चतुर्थी॥ ८९॥

९०. **एकवेलमिति।** त्वदीयो य आदेशस्तत्र वशंवदः त्वदा०। त्वदादेशेन वशीभूतः। अन्यत् सर्वं सुगमम्॥ ९०॥

९१–९२. **वक्षःस्थलेति। नाभि इति।** अथ आनन्तर्ये, **चाहमानस्य** हृदयं ताभिर्दूतोक्तिभङ्गीभिश्चुम्बितं सत् तमां अत्यर्थं विश्वसीत्। काभिः किमिव? भ्रमरीभिः कमलमिव। कीदृशस्य चाहमानस्य? सिसाधयिषतः साधयितुमिष्टस्य। पुनः कीदृशस्य? सुतरां विगृहीतस्य। शेषं सुगमम्॥ ९१–९२॥

९३. **तत इति।** संवदति। राजा तं संवदन्तं **वाग्भटः** प्रयोजयामासेति। फलवत् कर्तृत्वात् परस्मैपदम्। अन्यत् सुगमम्॥ ९३॥

९४. **नयेति।** पारं पश्यतीत्येवंशीलमस्येति पारदृश्वा। क्वनिप् कृता सिद्धम्। शेषं सुगमम्॥ ९४॥

९५. **शत्रुर्नेति।** स्नेहस्तैलम्। ध्वन्यर्थेन स्नेहो रागः। शीतात्मत्वं शीतस्वरूप-त्वम्। इयर्ति गच्छति। ऋगतावित्यस्य प्रयोग इति सिद्धम्॥ ९५॥

९६. **प्रचिकीति।** राज्यं चेत् कर्तुमिच्छसि चिरं चेज्जीवितुमिच्छसि। पदद्वयेऽपि सन्नन्तद्वयम्। मदुक्तिरेव मद्वचनमेव भंगी। उत्तरार्द्धे रूपकोऽलंकारः॥ ९६॥

९७. **गुरव इति। वाग्भटः** शिष्या(क्षा)माह–भो नृपगुरवः पूज्याः!, यदि वा पक्षान्तरे, सन्तः पण्डिता उत्तमा वा हितवाक्योपदेशिनः तस्य भवन्ति। कीदृक्षस्य तस्य? अभव्य-भव्यौ अशुभ-शुभकर्तव्यौ कर्मतापन्नौ, हेयोपादेयतां परिहार्य-ग्राह्यतां कर्मताप-न्नाम्। यथाक्रमं [पा० ५०.२] चिकीर्षतः कर्तुमिष्टस्य, अशुभस्य हेयताम्, शुभस्य उपा-देयताम्, इति यथाक्रमः। यथासंख्योऽलंकारः॥ ९७॥

९८. **इत्युक्त्वेति।** तत्र तस्मिन् **वाग्भटे** इत्युक्त्वा तूष्णीके मौनावलम्बिनि सति, पार्थिवो **वीरनारायण** इति जगिवान् उक्तवान्। किं कुर्वन्? भीमां भृकुटीं घटयन्। कीदृशः? सर्वांगीणा सर्वांगव्यापिनी या क्रुत् तया अन्धलो गताक्षः॥ ९८॥

९९. **अकार्यमिति।** करणानर्हं अकार्यम्, कर्तुमुचितं कार्यम्, मे मह्यं यत्तमां रोचिष्यते स्वदिष्यते। रुचिक्लृप्यर्थधारिभिरिति चतुर्थी। तत्कर्म स्वैरं स्वाभिलाषेण अहं विधास्ये। तत्र चिन्तया अत्र कृतं पूर्यताम्॥ ९९॥

१००. वाग्भटेति । **वाग्भट**स्तद्राज्यं त्यक्त्वा **मालवं** ययौ । उत्प्रेक्षते–प्रासेन कुन्तेन हृदि हत इव ॥ १०० ॥

१०१. परमेति । उर्वीशः **वीरनारायणः**, पौराणां नागरिकाणां जल्पितं उपेक्ष्य अनंगीकृत्य, **योगिनीपुरं** ययिवानिति । क्वसुप्रयोगेन सिद्धम् ॥ १०१ ॥

१०२. अन्तर्दुष्ट इति । महेन उच्छवेन, पुरीः अन्तः–अन्तःपुरि इति अव्ययीभावः ॥ १०२ ॥

१०३. प्रियालेति । शकेन्द्रः प्रियं यत् आलपनं संभाषणं तेन सारः प्रि०, तस्य भावस्तत्त्वम् । अस्य **वीरनारायण**स्य वनवद् दर्शयन्, अस्य मनः आश्चर्यचुम्बितं चकार । वनपक्षे–प्रियाला राजादनद्रुमाः, पनसाराः सर्वफलेग्रहिणो द्रुमाः । तयोर्भावस्तत्त्वम । पुनः वनपक्षे– चित्राश्चित्रकाः द्वीपिन इति यावत्, तेषां प्रचयेन समूहेन चुम्बितम्, चि० ॥ १०३ ॥

१०४. अन्येद्यु इति । अन्यस्मिन् दिने विषयोगेन हेतुना, शको **जल्लालदीनः**, भूपं **वीरनारायणं** अमीमरत्, [प० ५१.१] मारयति स्म । णिगर्थेन अङ्प्रत्ययेन **सिद्धम् ।** उत्तरार्द्धे अर्थान्तरन्यासमाह–अकार्यं प्रकुर्वन्तः पापा दुष्टाचाराः, हन्त इति खेदे, किं मुह्यन्ति मूढतां गच्छन्ति ? अपि तु न । अर्थान्तरन्यासोऽलंकारः ॥ १०४ ॥

१०५. हतेऽत्रान्येति । अत्र अस्मिन् **वीरनारायण**हते सति, शको **जल्लालदीन** आशु शीघ्रं अन्यद्राजकं अन्यद्राजसमूहं हतमेव अबोधि जानीते स्म। हेतुकथनमाह– यत उच्चैस्तरोरपि मूले छिन्ने सति फलादि स्वापं सुप्रापम् ॥ १०५ ॥

१०६. तत इति । ततोऽनन्तरं **वाग्भटः** पितृव्यः, भूपालो **वीरनारायणः**, तावेव सूर्येन्दू सूर्याचन्द्रमसौ ताभ्यां परिवर्जितं परित्यक्तं वा० । ईदृशं **रणस्तंभपुरा**काशं तुरुष्कतारकैः व्यानशे । रूपकोऽलंकारः ॥ १०६ ॥

१०७. शकेति । अत्रापि **मालवे**, शकप्रेरणया **जल्लालदीन**प्रेरणया, जिघांसुं मिमारयिषुं मालवेश्वरं विज्ञाय ज्ञात्वा, **वाग्भटः** मालवेश्वरं हत्वा, तद्राज्यं मालवराज्यं ऊर्जितं ऊर्जस्वलं ललौ ॥ १०७ ॥

१०८. शकातंकेति । तद्राज्यं **वाग्भट**राज्यं दिने दिने वर्द्धते स्म । कैः ? **जल्लालदीन**परित्रस्तैः शरणागतैः क्षत्रियैः करणभूतैः ॥ १०८ ॥

१०९. शकेति । सेनया अभियातुमिष्टे अभिषेणिते, **षर्प्परैर्मुद्गलैः**, **रणस्तंभस्य** उद्धर्तुमिच्छा उद्दिधीर्षा, तया, अमीमिलत् मेलयति स्म । णिगर्थेन अङ्प्रत्ययेन सिद्धम् । शेषं सुगमम् ॥ १०९ ॥

११०. पुन्नागेति । पुन्नागा वृक्षविशेषा इति पर्वतपक्षः । गजपक्षे—पुरुषेषु नागाः प्रशस्याः पुन्नागास्तेषां संगे सुभगाः ।

सिंहशार्दूलनागाद्यास्तल्लजाश्च मतल्लिका ।

मचर्चिका प्रकाण्डाद्याः प्रशस्या[प० ५१.२]र्थप्रकाशकाः ॥'

इति हैमः कोशः । प्रक्षरन्तो मदा एव निर्झरा यत्र द्विपेषु, ते । एवंभूताः द्विपाः जंगमाश्चलन्तोऽवनिभृतः पर्वतास्तेषां लीला, तां कलयामासुः धारयन्ति स्म । श्लेषोपमारूपकाणां संकरः ॥ ११० ॥

१११. खुरोत्खातेति । खुरै उत्खाता ये रजःपुञ्जा रजःसमूहास्ते, तैर्हेतुभिः, विश्वं त्रिभुवनमपि एकरूपतां नयन्तः प्रापयन्तः, वाजिनां तुरगाणां व्यूहा रचनाविशेषाः, अद्वैतवादिवत् वेदान्तवादिवत्, रेजिरे शुशुभिरे । अद्वैतवादिनः विश्वं एकरूपतामाचक्षते, इति तार्किकप्रवादः । उपमा-श्लेषयोः संकरः ॥ १११ ॥

११२. संचरेति । अखिलाऽपि सकलाऽपि अब्धिमेखला वसुधा, द्वयोर्भावो द्विता, द्वितायाः प्राधान्यं द्वैतमयी । ततो बुञ् । शब्देन अद्वैतमयी शब्दाद्वैतमयी । आसीदिवोत्प्रेक्षते । कैर्हेतुभिः ? संचरन्ति यानि रथचक्राणि तेषां दिशां कूलं कषन्तीति कूलंकषा एवंभूता ये स्वनाः शब्दास्तैर्हेतुभिः । उत्प्रेक्षालंकारः ॥ ११२ ॥

११३. धृतेति । धृतानां हेतिततीनां शस्त्रश्रेणीनां स्फीतद्युतिभिः प्रसूतकान्तिभिः द्योतितानि दिग्मुखानि यैस्ते । द्वेधापि द्विप्रकारेणापि प्राणेन बलश्वासलक्षणेन, शत्रुप्राणापहारिणः पदातयः शुशुभिरे । श्लेषोऽलंकारः ॥ ११३ ॥

११४. चलद्दलेति । स वाग्भट रणस्तंभस्याध अधोरणस्तंभम्, इति अव्ययीभावः । शिबिरं कटकस्थानं न्यवेशयत् स्थापयति स्म । किं कुर्वन् ? चलत्कटकसमूहैः भोगिविभुना शेषनागेन दुर्द्धरां धर्तुमशक्यां पृथ्वीं सृजन् ॥ ११४ ॥

११५. दृष्ट्वाऽनेकेति । अनेके च ते रणोच्छेका [प० ५२.१] रणोत्कटाः क्रीडन्तो ये वीरास्तेषां कुलानि यत्र तत्, तत् । ईदृशं कटकं दृष्ट्वा दरोद्रेकं भयविह्वलतां दधिवांसः धारयामासुः । क्वसु प्रयोगः ॥ ११५ ॥

११६. लोका इति । पूर्वार्द्धं सुगमम् । न्यायमाह—परचक्रे प्राप्तवति सति, सौख्यनाडीं धमन्तीति । 'नाडी घटी खरी'ति कृता सिद्धम् । सौख्यपूर्णाः के ? अपि तु न केऽपि ॥ ११६ ॥

११७. नृपादेशादिति । ततोऽनन्तरम्, वाग्भटनृपादेशात् स्फूर्जत् यत् शौर्यं वीरता तस्य आवेशो येषां, ते, एवंभूताः सुभटसमूहाः । अन्यत् सुगमम् ॥ ११७ ॥

११८. गोलैरिति । गोलैर्यन्त्रमुक्तैष्टकैः पाषाणदारकैः, कुशीभिः सुरंगाकारणैः, अन्यैरपि प्रकारैः, मनागपि स्तोकमपि अलंभूष्णवः समर्थाः । शेषं सुगमम् ॥ ११८ ॥

११९. भटानामिति । दृष्ट्वा दृष्ट्वा, 'णमुल् चाभीक्ष्ण्ये' कृतप्रत्ययेन सिद्धम् । विषादश्च आश्चर्यं च विषादाश्चर्ये ताभ्यां चुम्बितः वि० । शेषं सुगमम् ॥ ११९ ॥

१२०. मत्वेति । बलेन न ग्रहीतुं शक्यते इति बलाग्राह्यः, तम् । शेषं सुगमम् ॥ १२० ॥

१२१. निर्यातुमिति । लेगिवांस इति क्वसुप्रयोगेन सिद्धम् । लग्ना इत्यर्थः । अन्यत् सुगमम् ॥ १२१ ॥

१२२. वारीण्येति । दुर्गान्तरे प्राप्तेरभावात् जलानि अदुग्धायन्त, दुग्ध इव आचरन् । तृणानि ऐक्षुयष्टीयन्त, इक्षुयष्टिरिव आचरन् । काष्ठानि अचन्दनायन्त, चन्दनमिव आचरन् । गूढोपमालंकारः ॥ १२२ ॥

१२३. त्रिमास्यामिति । जीवं लात्वा जीवग्राहम् । 'कृग् ग्रहोऽकृत जीवात्' इति कृत्सूत्रेण सिद्धम् । पलायिषत प्रणष्टाः । अन्यत् सुगमम् ॥ १२३ ॥

१२४. भक्ति० [प० ५२. २] **इति** । मह्या ईशो महीशस्तस्य महीशस्य **वाग्भटस्य**, पौराः संजग्मिरे संगच्छन्ति स्म, मिलिता इत्यर्थः । पुरे वसन्तीति पौराः । कीदृशाः पौराः ? उपदापात्रपाणयः—उपदा ढौकनिका तस्याः पात्राणि पाणिषु येषां ते । की० नृपस्य ? जयेन जयवादेन शस्यतमा प्रशस्या द्युतिः कान्तिर्यस्य स, तस्य ॥ १२४ ॥

१२५. नृप इति । नृपोऽपि पुरान्तरं प्रविवेश । किं०ष्टं पुरान्तरम् ? सकैः—उत्सवैरुल्लसन्ती छाया शोभा यस्य स, तम् । पूर्वार्द्धं सुगमम् ॥ १२५ ॥

१२६. सैंहिकेति । अथानन्तरम्, किं कुर्वन् ? सैंहिकेयो राहुः, तस्य मुखनिर्मुक्तो यश्चन्द्रः, तद्बिम्बं विडम्बते अनुकुरुते इति । एवंभूताम्, अरिनिर्मुक्तं यद् **रणस्तंभपुरं** तस्य श्रीः, ताम् । उपमालंकार ॥ १२६ ॥

१२७. गजाश्वेति । स **वाग्भटः** धरायां सारं प्रधानं मन्दिरं अर्थाद् राजभुवनम् । यद्वा, धरायां सारः प्रधानो नृपस्तस्य मन्दिरम् । माद्यन्ती उन्मत्ता इन्दिरा लक्ष्मीर्यत्र तत् । तत् ईदृशं चकारः । कैर्हेतुभिः ? गजाः० । अन्यत् सुगमम् ॥ १२७ ॥

१२८. क्रमागेति । स **वाग्भटः**, कान् कान् इति कांस्कान्, भूमीभृतो नृपान्, पक्षे—पर्वतान्, पादाक्रान्तान् चरणाक्रान्तान्, पक्षे—पादाः किरणाः, अरीरचत् । पुनःपौनःपुन्येन रचयति स्म । कीदृशः ? भास्वान् देदीप्यमानः, पक्षे—सूर्यः । पुनः कीदृशः ? क्रमागतं परंपरागतं यदुदयस्थानं तत्, लब्धा प्राप्ता । श्लेषपक्षे उपमा—यथा भास्वान् भूभृतः पर्वतान् । शेषं सुगमम् । लब्धा इति तृच्प्रत्ययेण सिद्धम् । कांस्कानिति । 'कातुः पुत्र [प्र० ५३. १] कस्कादयः' इति सिद्धम् ॥ १२८ ॥

१२९. निवेश्येति । तेनिवान् ततान इत्यर्थः । क्वसुप्रयोगेन सिद्धम् । अन्यत् सुगमम् ॥ १२९ ॥

१३०–१३१. तस्मिन्निति । **तन्नन्दनेति** । तन्नन्दनो **वाग्भटनन्दनः श्रीजैत्रसिंह** अभूत् । कीदृशः ? चन्दनवृक्षवत् जगतां विशेषां नेत्रानन्दनः । क सति ? तस्मिन् वाग्भटे स्वर्लोके याः लोलाक्ष्य अप्सरसः तासां या कटाक्षविशिखावलिः कटाक्षबाणश्रेणी,

तस्याः वेध्यतां लक्ष्यतां उपगत्वरे प्राप्तवति सति । अर्थात् स्वर्गलोकं प्राप्ते सति । किं०ष्टां वेध्यताम्? वीरयोगव्रतेन या अवाप्यते लब्धुं शक्यते इति वीरयोगव्रतवाप्या, ताम् ॥ १३०-१३१ ॥ युग्मम् ॥

१३२. **समूलेति** । समूलकाषं कषितः निर्मूलोन्मूलितः, अन्यायसंतमसस्य अन्यायान्धकारस्य उदयो येन स, एवंभूतो यस्तिग्मांशुरिव सूर्य इव प्रजानां प्रियंभावुकः । प्रियं भवितुं शीलमस्येति बभूव । 'तमसं समवांधतः' इति हैमः कोशः । उपमालंकारः ॥१३२॥

१३३. **सद्वंशस्येति** । सद्वंशस्यापि प्रधानवेणोरपि यच्चापदण्डस्य यद्धनुषः, अहो इति आश्चर्ये, अनौचिती अयोग्यता, पक्षे–वंशोऽन्वयः । अनौचितीमेवाह–द्विषां शत्रूणां समाजे समूहे संगते मिलिते सति, अस्य नृपस्य दोषं दूषणम्, पक्षे–भुजम्, अभजत् भजति स्म । विरोध-श्लेषयोः संकरोऽलंकारः ॥ १३३ ॥

१३४. **बिभ्रदिति** । यो नृपः भूमिष्ठोऽपि शचीवरयितुरिन्द्रस्य लीलां अचूचुरत्, चोरयति स्म । किं कुर्वन्? सदा निरन्तरं नभसि गच्छतीति नभोगस्तस्य भाव-[पृ० ५३.२] स्तत्वम् । पक्षे–सह दान-भोगाभ्यां वर्त्तते इति । सुमनसो विद्वांसः । पक्षे–सुमनसो देवाः । भूमिष्ठेति । गोबाम्बसव्यापद्वित्रिभूम्यग्नीति स्थाधातोः षत्वम् । उपमा-विरोध-श्लेषाणां संकरः ॥ १३४ ॥

१३५. **कर्णजाहमिति** । यद्भुजदण्डयोः पराक्रमे कर्णजाहं कर्णमूलं जगाहाने गाहमाने सति, भूभृतां नृपाणां शिरांसि चकम्पिरे । 'कर्णादेर्मूले जाह' कर्णजाहमिति सिद्धम् । जगाहानेति क्स्-कानाविति सिद्धम् ॥ १३५ ॥

१३६. **यदातंकेति** । शत्रूणां यत्सौ(शौ)र्यं वीरता तदेव नभोमणिः सूर्यः, तस्मिन् । यस्य राज्ञः आतंक एव तमो राहुः तेन ग्रस्तो यः स । तस्मिन्नेवंभूते सति, शत्रुस्त्रीणां कचच्छलात् मुक्तकेशकपटेन शोकान्धकारं व्यक्तं दीप्यते स्म । रूपकोऽलंकारः ॥ १३६ ॥

१३७. **सद्वंशस्येति** । शोभनवेणोर्यश्चापस्य, च पुनः शोभनान्वयस्य यस्य राज्ञ ऐकमत्यं एकबुद्धिता न । अमुमर्थं हेतुनाऽऽह–यद्धेतोः प्राच्यश्चापः परेषां शत्रूणां युधि संग्रामे पृष्टिं दर्शयति स्म । राजा युधि संग्रामे पृष्टिं न अदात् । श्लेष-व्यतिरेकयोः संकरः ॥१३७॥

१३८. **अगण्येति** । अगण्यं गणितुमशक्यं पुण्यं पवित्रं यल्लावण्यं तदेव रसस्तस्य यः प्रसरस्तस्य सारणिः कुल्या या, सा । शेषं सुगमम् ॥ १३८ ॥

१३९. **सौन्दर्येणेति** । यस्याः हीरदेव्याः सौन्दर्येण जिता रतिः कामपत्नी तामेव हीरदेवीमेव मेजुषी सेवते स्म । पक्षे–रतिश्चित्तस्वास्थ्यम् । अत्र न्यायमाह–वह्निदग्धस्य वह्निरेव शरणं जगदे अवादि । श्लेष-दृष्टान्तयोः [पृ० ५४.१] संकरः ॥ १३९ ॥

१४०. **भुंजानेति** सुगमम् ॥ १४१. **स्वकरामिति** । स्वकरकमलेन कीनाशदासीकृता यमकिंकरीकृताः शकास्तुरुष्कास्तेषां असृक् रुधिरं तेन । सा **हीरदेवी** गर्भशक्तेः अर्थात् दोहदात् स्नातुमिच्छति स्म । दोहदकथन...... ॥ १४१ ॥

१४२. प्रहर्षुलेति । प्रहर्षुल्मनसा हर्षितचेतसा प्रेयसा भर्त्रा प्रेरितं उद्दामं उत्कटं दौहृदं यस्याः ....देवी समये प्रस्तावे सूनुं पुत्रं सुषुवे प्रासूत । सा का इव ? श्रीरिव । यथा श्रीः सुमायुधं कन्दर्प्पं सूते । उपमालंकारः ॥ १४२ ॥

१४३. असाविति । तदा पुत्रजन्मावसरे इति व्योम्नि आकाशे गीर्वाणी आसीद् बभूव । इति किम् ? असौ बालकः शकासृजस्तुरुष्करुधिरस्य ये बाष्पूरा जलप्रवाहास्तैः, इमां धरणीं संप्लाप्य, तन्मस्तककमलैरिष्टा पूजयिता ॥ १४३ ॥

१४४. बालाङ्गेति । बालाङ्गसंगीनि बालशरीरसंसक्तानि यानि रोचींषि ज्योतींषि तैः । शेषं सुगमम् । उपमालंकारः ॥ १४४ ॥

१४५. दिश इति । आसेदुः प्रापुः । दिद्युते दिदीपे । सेवायोग्यः सेव्यः, सुखं सेव्यः । ववौ वाति स्म । अन्यत् सुगमम् ॥ १४५ ॥

१४६. विशादमिति । तस्य बालकस्य जनने जन्मनि तज्जनने, संमदं हर्षम् । शेषं सुगमम् ॥ १४६ ॥

१४७. तज्जनाविति । तज्जन्मनि अर्थिनां याचकानां रोर एव दारिद्र्यमेव यवासक औषधविशेषः । वर्षत्यपि मेघे यवासकः शुष्यतीति लोकोक्तिः । रूपकोऽलंकारः ॥ १४७ ॥

१४८. कृत्वेति । पिता अमुष्मै बालकाय **हम्मीरदेव**नाम इति ददौ । दशदिन-[प० ५४. २] महोत्सवं कृत्वा । विश्वस्य सकलस्य, विश्वस्य जगतः सुखावहम् । शेषं सुगमम् ॥ १४८ ॥

१४९. मातेति । स्वकीयं यद्दर्शनं स एव सुधारसः अमृतरसः स, तैः । शेषं सुगमम् । उपमालंकारः ॥ १४९ ॥

१५०. दिनैरिति । अकृच्छ्रं अकष्टमिति क्रियाविशेषणम् । शस्त्राणि धनुः-खड्गादीनि, शास्त्राणि व्याकरणादीनि । शेषं सुगमम् ॥ १५० ॥

१५१. न तदिति । शयाम्बुजे करकमले भ्रमर इव आचरति स्म । अभ्रमरायत । 'पंचशाष(ख)शयः समे' इति हैमः कोशः । गूढोपमालंकारः ॥ १५१ ॥

१५२. अथेति । भंगशीलो भंगुरः । अभंगुरस्य शृंगारस्य आद्यरसस्य जीवनमुत्पादकम् । दृक् च मनश्च दृग्मनसे । अत् प्रत्ययेन सिद्धम् ॥ १५२ ॥

१५३. दृग्द्वंद्वेति । दृशोर्द्वन्द्वं युग्मं दृग्द्वन्द्वम्, दृग्द्वन्द्वेन पेयं पानार्हं यत्सौन्दर्यं सुन्दरता तस्य श्रियः, दृग्द्वन्द्व० तासाम् । अपतिं पतिं कर्त्तुं पतीकर्त्तुम् । काः कामिन्यः मानसे चित्ते नावाञ्छन् न अभिलेषुः ? ॥ १५३ ॥

१५४. अकृत्रिमेति । तस्य **हम्मीरकुमारस्य** उत्थिते स्मश्रुलते स्मश्रुवल्ल्यौ अभातां शुशुभाते । कीदृशे ? आननस्य अकृत्रिममंडनमिल्याविष्टलिंगता । आधिक्यतः अधिकीभावात् घ्राणयुगस्य योऽध्वा मार्गस्तस्मिन्निर्यान्त्यौ निर्गच्छन्त्यौ शृङ्गारस्य धारे, घ्रा० ।

इवोत्प्रेक्षते । श्रृङ्गारः कृष्णो वर्ण्यते, इति भरतमतम् । छन्दश्चात्र इन्द्रोपेन्द्रवज्रयोरुपजातिः ॥ १५४ ॥

१५५. **केशा इति** । केकिनो मयूरस्य कलापकान्तिं पिच्छकान्तिं जयन्तीत्येवंशीलाः, ईदृशाः[प० ५५.१] केशाः । शशिनश्चन्द्रस्य प्रीतिं बिभर्तीति, ईदृग्मुखम् । कंबोः शंखस्य रिपुः स्पर्द्धी, ईदृशः कण्ठः । कपाटपटुतां विक्षिपतीत्येवं शीलं यत्तत्, ईदृग्वक्षः । परिघस्य अर्गलायाः अपघातः अकालमृत्युस्तत्र निबिडौ, ईदृशौ दोर्दण्डौ । कृता अब्जानां आपत् याभ्यां तौ, ईदृशौ पादौ । शेषं स्पष्टम् । पदे पदे समासोपमालंकारः ॥ १५५ ॥

१५६. **नारीभिरिति** । स्त्रीभिः कन्दर्प इति, प्रार्थिभिर्याचकैरमरभुवि स्वर्गभूमौ जन्म यस्य अर्थात् कल्पवृक्ष इति, सत्यप्रतिज्ञापरायणैर्गंगाभूर्गांगेय इति, तत्त्वज्ञानिभिर्ब्रह्मा इति, योधृभिः सुभटैः स्वर्भुज इन्द्रात् भू जन्म यस्य अर्थात् जयन्त इति, शत्रुनृपैर्यम इति, यूनो भावः युवता युवतामध्यं आश्रितः, यु०, एवंभूतः एष कुमारः, कैः कैः नारीप्रभृतिभिः, कथं कथं सुमचापादिप्रकारेण न तर्कितः न विकल्पितः ? । उपमासंशययोः संकरोऽलंकारः ॥ १५६ ॥

१५७. **विन्ध्येति** । तस्मिन् कुमारे स्त्रीणां मनो वाग्विषयां प्रीतिं सृजति स्म । किं वत् ? विन्ध्ये गजवत् । इत्यादि सुगमम् । उपमालंकारः । शार्दूलविक्रीडितवृत्तत्रयम् ॥ १५७ ॥

१५८. **सौन्दर्येति** । अस्तव्रीडमिति क्रियाविशेषणम् । दुःखेन च्यवते इति दुश्च्यवन इन्द्रः शचीभिरैंद्राणीभिः सह यथा क्रीडते । शेषं सुबोधम् । उपमालंकारः । इन्द्रवज्राछन्दः ॥ १५८ ॥

१५९. **हम्मीरादिति** । जैत्रस्य नृपतेर्**हम्मीरा**दितरावपि अङ्गरुहौ पुत्रौ जज्ञाते अभूताम् । कीदृशौ अङ्गरुहौ ? पित्र्यानुजौ ज्येष्ठभ्राता पित्र्यः, लघुभ्राता [प० ५५.२] अनुजः । हम्मीरस्येति योज्यम् । गुहौ इव कार्त्तिकेयौ इव । जगतो विश्वस्य जैत्रो जयनशीलः प्रतापोदयो ययोस्तौ । आद्यः पूर्वजः **सुरत्राणो**ऽभात्, अन्योऽनुजः **वीरमः** । नयोदय एव न्यायोदय एव दलन्ती फुल्ला या वल्ली तस्या वसंतः, न्यायविकाशक इत्यर्थः । परवीरदारणे शत्रुदारणे यो रणारम्भः संग्रामारम्भस्तत्र प्रभा यस्य, स । उपमायथासंख्ययोः संकरः ॥ १५९ ॥

१६०. **पूर्द्वारेति** । श्रीजैत्रनृपः अभ्यस्तन्यायैस्त्रिभिः पुत्रैः संसेव्यमानो वीरजनकमुकुटभावं आटीकते स्म आस्तिघ्नुते स्म । पूर्द्वारार्गलवत् दीर्घौ पीनौ च यौ भुजौ ताभ्यां भूरुत्पन्नो यः प्रौढप्रताप एव ज्वलत्ज्वालाजिह्वो ज्वलदग्निस्तस्य शिखावल्याः कवलिता ग्रस्ताः प्रत्यर्थिपृथ्वीधवाः शत्रुनृपा यैस्ते । रूपकोऽलंकारः । शार्दूलविक्रीडितद्वयम् ॥ १६० ॥

॥ इति श्रीहम्मीरकाव्यदीपिकायां चतुर्थः सर्गः ॥ ४ ॥

[अथ पंचमः सर्गः ।]

१. **अथेति** । अथानन्तर्ये, त्रिभुवनजेतुः कंदर्प्पस्य प्रियमित्रं सुरभिर्वसन्त उद-जृम्भत उज्जृम्भते स्म । क सति ? जैत्रसिंहनृपतौ श्रितहरेः आश्रितेन्द्रायाः दिवः स्वर्गस्य धरणिं समानां धरणिं पृथ्वीं सृजति सति । उपमालंकारः प्रमिताक्षराछन्दः । लक्षणं चैतत्—'स्जौसौप्रमिताक्षरा' ॥ १ ॥

२. **पुपुषेति** । एष मलयाचलोत्पन्नः अनिलो वायुः, ध्रुवं निश्चितम्, सर्प्पश्वासैः पुपुषे पुष्टीभूतः । अमुमर्थं द्रढयितुं हेतुमाह—अन्यथा एवं चेन्न, अस्य वायोर्वियोगिनो विरहिलोकान् झगिति शीघ्रं मूर्छयितुं कथं सहसा क्षमता [प० ५६. १] समर्थता इति यावत् भवति स्म । हेतुरलंकारः ॥ २ ॥

३. **ऋतुराजेति** । ऋतुराजस्य वसन्तस्य वीक्षणं तस्य रसः अद्भुतनामा तस्मा-द्धेतोः, ध्रुवं निश्चितम्, अरुणेन सूर्यसारथिना रथो नाषे(खे)टि न चालितः । रथी विलोकन-रसाद् रथं न षे(खे)टयतीति लोकव्यवहारः । अमुमर्थं हेतुना नियमयन्ति—अन्यथा एवं चेन्न भवति, अमी दिवसा वासन्तिकाश्चक्रवाकैकहितां गुरुतां गरिमाणं कथं दधुः धारयन्ति स्म ? ॥ ३ ॥

४. **अतिदुःसहेति** । स्त्रीजनैः स एष शीतकालसंबन्धी चतुस्त्रिंशत्घटील-क्षणो नोऽस्माकं महिमा महाप्रमाणत्वं कथमिव सहिष्यते ?, अपि तु न कथमिव । इतीवोत्प्रे-क्षते—कृपया मधुरीभूता निशा रात्रयः कृशतां अधुर्धारयन्ति स्म । कीदृशैः ?, अतिदुःसहः प्रियसुहृदां विरहो येषां ते, तैः । उत्प्रेक्षालंकारः ॥ ४ ॥

५. **समुदेति** । वा इवार्थे, नवरं विशेषः । इतीवोत्प्रेक्षते—वसन्तसमयो यतीनां मुनीनां वल्लभतरो न बभूव । इह वसन्ते मलिना मधुपा भ्रमराः । पक्षे—मद्यपायिनः, सह-र्षेण चरन्ति । चः पुनरर्थे । इह वसन्ते निर्मला जातिर्मालती, पक्षे—जातिर्मातृपक्षः । उत्प्रेक्षा-श्लेषयोः संकरः ॥ ५ ॥

६. **मलयेति** । सुरभौ वसन्ते मलयजैश्चन्दनैः सह, मलयानिलो मलयपवनः, स्त्रीणां कुचयुगले विलसन्, मलयपर्वतमहाशृङ्गाधिरोहणं पुनः समुपागतं मन्यते स्म । स्तनानां पर्वतशृङ्गसाम्यं ध्वन्यते । अनलंकारमपि इदं वृत्तं रसभावबहुलत्वात् सत्काव्यम् ॥ ६ ॥

७. **अमुनेति** । अमुना हिमेन विवर्णितदलां दग्ध[प० ५६. २]पत्रां पद्मिनीं विलोक्य, नलिनीदयितः सूर्यः, उत्प्रेक्षते—हिमं हन्तुमिव हिमवतः पर्वतस्य ककुभं उत्तरां रविरगात् । वसन्ते कालस्वाभाव्यात् उत्तरायणसूचा । अन्योऽपि भर्ता भार्याया उपमर्दकारकं हन्तुमुपक्रमते इति भावः । उत्प्रेक्षालंकारः । क्रोधाभासो भावः ॥ ७ ॥

८. **स्खलतामिति** । इवोत्प्रेक्षते । तत्तस्माद्धेतोः, पवनेरिता पवनप्रेरिता या पुष्प-राजी पुष्पश्रेणी तस्याः, यानि रजांसि किंजल्कानि, तेषां पटलैः समूहैः हेतुभिः, गगने

स्खलतां प्रयाति सति अर्कतुरग......शनकैर्मन्दं अचलन् । उत्प्रेक्षातिशयोक्तिहेतूनां संकरोऽलंकारः ॥ ८ ॥

९. मधुरेति । मधुराणि मिष्टानि यानि प्रसूनानि कुसुमानि तेषां यन्मकरन्दपानं तद्वशात् अतिमात्रमत्यर्थं मत्ता या मधुकृद्युवती भ्रमरी तस्याः झंकृतं शब्दितं विनिशम्य, कतरे जनाश्चेतसि विकारभरं कामपराधी[नत्वं] न धारयामासुः । वसन्तस्य स्वभावाख्यानमेतत् ॥ ९ ॥

१०. सहकारेति । सहकारस्य सारतरा या हृद्या मञ्जरी मञ्जरिका तस्या प्रसङ्गेन उल्लसन् यो मधुरिमा कण्ठे पंचमस्वरपाटवस्तेन अञ्चिता पूरिता या, सा, तया । एवं भूतया परपुष्टया कोकिलया अखिलमेव जगत् कंदर्पहस्ते लीलया नतूद्यमेन अकारि । कंदर्पहस्तवशीकृतमित्यर्थः ॥ १० ॥

११. इयमागतेति । इति पिककूजितेषु अध्वगवधूः पथिकस्त्रीः का न मुमुदे का न तुतोष ? । असकृत् पौनःपुन्येन का न विषसाद का न शुशोच ? । इति किम् ? शशिनाशिनी चासौ कुहूश्च श० । अमा[प० ५७.१]वाश्या इयमागतैव । कोकिलाशब्दस्य अव्यक्तानुकरणमेतत् । अथ च पक्षान्तरे, अन्यभृता कोकिला आव्यलपत् आभाषते स्म । इति पक्षद्वयम् । कुहूशब्दश्रवणात् विरहिणीनां प्रमोदः । कोकिलाभाषणात् विरहिणीनां विषादः । एका क्रिया द्वि[र]र्थकरी ॥ ११ ॥

१२. शुकेति । शुकचञ्चुसदृशानि पलासस्य त्रिपत्रकस्य दलन्ति विकसन्ति यानि कुसुमानि, अनुवनं अभितः सर्वतो रेजुः शुशुभिरे । सुमेषुविभोः कन्दर्पभूपतेः, शमदन्तिनं उपशमगजं भृशमत्यर्थं इह वसन्ते वशं कुर्वतः अंकुशो इव । उपमालंकारः ॥ १२ ॥

१३. यदीति । अभिनवा चासौ जातिलता च अभिनवजातिलता, सुरभौ वसन्ते, इदं उच्यमानं विचिन्त्य, कृपया करुणया न विचकास किम् ? । किमिति संशये वितर्के प्रश्ने वा । इह वसन्ते यद्यहं जातिः पुष्पिता, तत्तदा इतराः लतिकाः कमलिन्यादयः कियतीं श्रियं उद्वहन्तु ? अपि तु न कियतीम् । संशयोऽलंकारः ॥ १३ ॥

१४. विकसदिति । तरुषु वृक्षेषु, काननं काननं प्रति प्रतिकाननम्, शुचय उज्ज्वला विकसत्पुष्पसमूहाः शुशुभिरे । महद्वनं वनी वन्येव युवतिर्वनीयुवतिस्तस्याः, निजभर्तारं ऋतुराजं वसन्तं अनुलक्षीकृत्य प्रथिता विस्तृता हसा हासा इव । उपमालंकारः ॥ १४ ॥

१५. जलदागेति । असौ मालती जलदागमे वर्षाकाले स्वमहिमाप्राग्भारैः पथिकस्त्रीः अवधीत् ममार । इति हेतोः, वसन्ते पंक्तिबाह्यविहिता इव सुमनस्सु पुष्पेषु न प्राविशत्, अपांक्तेयत्वात् । मालतीकुसुमदर्शनात् वर्षासु विरहि[प०५७.२]णीनां मरणवर्णनं युक्तम् । उत्प्रेक्षालंकारः ॥ १५ ॥

१६. मदनोऽधुनेति । अधुना वसन्ते परदेशजुषां पथिकानां अर्थाद् विरहिणां हृदि नष्टशल्यमभिहन्तुं अभिघातुमिव मदनः कन्दर्प्पः कुसुमानि वृन्तमुखि(षि)राणि विरचय्य सुशामल्यर्थं काण्डफलतां बाणलोहाग्रतां अनयत् अनैषीत् । उपमालंकारः ॥ १६ ॥

१७. ममेति । नाम इति संभावनायाम् । यद् यदा इमा जातिलता कलिका मम नालिकशराः, तत् तदा इमाः कलिकाः स्पृशतीः कतरः सहेत ? अपि तु न कतरः । इति हेतोः, इह मधौ वसन्ते मधुसखः कन्दर्प्पः स्फुटतीः फुल्ला जातिलता कलिकाः किमिति वितर्के नाद्रियत ? । संशयोऽलंकारः ॥ १७ ॥

१८. विकसदिति । सुदृशां नारीणां दृशो नेत्राणि मृगीनयनैः सह सदृशतां सादृश्यं, न जहुः न तत्यजुः । द्वयोः सादृश्यहेतुमाह—कीदृशैः ? विकसन्त्य या मञ्जर्य्य एव मञ्जरिकाः प्रियालतरूणां मञ्जरिकाः, तासां यद्रजः किंजल्कं तेन, अरुणैः रक्तैः । किं० ष्टा दृशः ? मधु मधुरं यद्वा मधोर्वसन्तस्य यत्सीधुपानं तस्मात् यत् घनो निबिडो रागः अरुणता, तं जुषन्तीति यास्ताः । समासोपमालंकारः ॥ १८ ॥

१९. परिसंचरेति । परि सामस्त्येन संचरन् यो मलयदिक्पवनो दक्षिणपवनस्तेन, प्रविकम्पिनो कम्पमाना ये पल्लवास्त एव कराम्बुरुहाणि कमलानि, तैः करणभूतैः, वनराजिरेव वधूः कान्ता निजकान्तं ऋतुपतिं वसन्तं उपगूहनाय आलिंगनार्थं, आव्हयदिव आजुहोति स्मेव ॥ १९ ॥

२०. मधुपानेति । [पृ०५८.१] मकरन्दपानतो मन्दभ्रमणा एवंभूता भ्रमरास्तरुषु प्रतिवनं बभुः । अलमेव अलकं, गुलिका एव अलकं गुलिकालकं, गुलिकालकस्य अभ्यसनं गु० । उन्नयतः अभ्यासविषयीकुर्वतः कन्दर्प्पस्य गुलिका इव । 'प्रसवश्च मणीबकं' इति हैमः कोशः । उपमालंकारः ॥ २० ॥

२१. प्रविलोकेति । पलाशशिखरी त्रिपत्रकवृक्षः वेगेन जगति विश्वे, निजं नाम पलाश इति—पलमश्नातीति पलाश इति । किं कुर्वन् ? वशा वधूः कर्मतापन्नाः, प्रविलोकनादपि दर्शनादेव, विधूतकम्परसा उत्पादितकंपभावा वियोगपरवशा विदधत् कुर्वन् । पलाशकुसुमदर्शनाद् वसन्तागमनाच्च विरहिणीनां कृशत्वात् पलाशे मांसभक्षणत्वं उपचर्यत इति भावः । श्लेषोऽलंकारः ॥ २१ ॥

२२. पदसंगेति । मात्रशब्दः अन्ययोगव्यवच्छेदार्थस्तावन्मात्रार्थो वा । चरणसंसर्गमात्रे उपजाता तृट् समीहा यस्य स तस्य, ईदृशस्य ममाशोकस्य, इमा एव इमका गतभर्तृकाः प्रसभं नितरां प्रहन्ति स्म । इति हेतोः, सकोप इव अजनयन् अरुजन् । अन्योऽपि स्वल्पे उपजाततृट् केनापि निःप्रहन्यते, स तस्मै कुप्यति पीडयति च । सकोप इति शब्देन रक्ताशोकस्य पुष्पोद्गमो व्यज्यते । इमका इति । 'त्यादिसर्वादिस्वरेष्वन्त्यात्पूर्वोऽक् ।' अक्प्रत्ययेन सिद्धम् । उत्प्रेक्षालंकारः ॥ २२ ॥

२३. परीलोमेति । मधुसंगमेन वसन्तसंगमेन मधुरैर्मृष्टैर्मधुभिर्मकरन्दैः । अन्यत् सुगमम् । प्रत्ययोपमालंकारः[प०५८.२] ॥ २३ ॥

२४. अपि तन्मुखेति । अगो बकुलः बकुलवृक्षः सुदृशां नारीणां अखिलामपि मानसंस्थितिं अहंकारसंस्थितिं अधरीचकार नीचैश्चकार । किं कुर्वन्? तन्मुखस्य अभिषवः आसवस्तस्य शेकस्तं विनापि, वचोविषयमतिक्रान्तां अतिवचोविषयां श्रियं आश्रयन् । अर्थविरोधोऽलंकारः ॥ २४ ॥

२५. निजेति । निजकालिम्न उल्लसितैः उल्लासैः संजनिता उत्पादिता असमये अप्रस्तावे दिवसे एव, याः क्षपालयो रात्रिश्रेणयो यास्ताः तासु । एवंभूतासु वनीततिषु । उत्तरार्द्धं सुगमम् । वनश्रेणीपत्रोद्गमात् कालिम्नः आरोप उपचर्यते । व्यक्तोपमालंकारः॥२५॥

२६. भृशलीनेति । भृशलीनं यत् षट्चरणचक्रं भ्रमरसमूहः तद्वशात् अधिक-नीलानि यानि नीरजदलानि यस्मिन् तत्, तस्मिन् । एवंभूते सरसि, विलसल्लक्ष्मीकैः कमलै-र्गगने आकाशे नवोद्गतचन्द्रकान्तिः अलम्भि अप्रापि लब्धेत्यर्थः । धवलकमलपत्राणि भ्रम-रावष्टब्धानि तेषां यत्पर्यन्तावशिष्टं वक्राकारपरिणतं द्वितीयाचन्द्रेणोपमितम् । सरसि गगनो-पमानम् । उपमालंकारः ॥ २६ ॥

२७. मलिनामिति । मलिनस्य कज्जलादिना समवेतस्याम्बुनो जलस्य बिन्दु-सादृश्यं कलयत् सत् यद्विकसत्पलाशकुसुमवृन्तं तत् शोभते स्म । इतश्चोपमीयते—भ्रमर-युवा जातीविरहतः शिरोग्निसाधनतपः कुर्वन्निव ॥ २७ ॥

२८. कृतेति । दक्षिणानिलैः दक्षिणपवनैः कृतकम्पा वनलता भृशं शुशुभिरे । [प०५९.१] चिरकाले भवद् उत्पन्नं यन्मिलनं तस्मात् मिथः परस्परं आलिङ्गनानि ददाना इव । उत्प्रेक्षालंकारः ॥ २८ ॥

२९. सकलेति । कदली रम्भादलैः पत्रैः अनङ्गपतिं कन्दर्पनृपं वीजयन्ती वातव्यजनं कुर्वतीव शुशुभे । अन्योऽपि श्रान्तो वीज्यते । श्रमं विशेषणद्वारेणाह—सकलत्रि-लोकस्य यो विजयो जयवादस्तस्मात् प्रभवं यत् श्रमवारिखेदस्तेन संगतः अर्थात् खिन्नः, तम् । उत्प्रेक्षालंकारः ॥ २९ ॥

३०-३१. हृदयेश्वरेति । को किल युवा कुरङ्गदृशः स्त्री इति बोधयन्निव रुचिरं मनोहरं यथा स्यात् चुकूज पक्षिभाषया उल्ललाप । गतः समयः कालो नागच्छतीति । कालस्य नित्यत्वात् विभुत्वाच्च, गतागते अनुपपन्ने । तदवष्टब्धस्य यौवनस्य गतागतं ध्वन्यते । प्रथमपदे स्त्रीणां शिष्या(क्षा)प्रदानम् । उत्प्रेक्षालंकारः ॥ ३०–३१ ॥

३२. विलसदिति । इह वसन्तऋतौ कानिचित् कुसुमानि अविदुषां अन्या(ज्ञा)-नृणां कतिचिन्मधुकराङ्कृतैः स्वशब्दितैरिदं एतदिदं एतत् अवदन्निव ब्रुवन्तीवोत्प्रेक्ष्यन्ते ॥३२॥

३३. विधूतेति । कलरवः पारापतः चटुकूजितैः प्रियप्रायविहंगवचनैर्दयितां कपोतीं मदयन् दयितामेव परिरभ्य दयितामेव चुचुम्ब । किं कुर्वन्? तरुणचित्तानि दयिताप्रसादने विधूतौत्सुक्यानि कुर्वन् ॥ ३३ ॥

३४. विकसदिति । लतावल्ल्यो वसन्तं द्रष्टुमागता वनदेवता [प०५९.२] इव शुशुभिरे । पूर्वार्द्धे रूपकम्, उत्तरार्द्धे उपमा ॥ ३४ ॥

३५. अधिकेति । शरीरविलेपनविधौ वह्निशिखं कुङ्कुमं प्रमदाभिर्नारीभिरधिकाधिकं आद्रियत । चिरकालोपगतं उपकारकारि वस्तु सहसैव तूर्णमेव कथं हेयम्? अपि तु न कथमपि । अर्थान्तरन्यासोऽलंकारः ॥ ३५ ॥

३६. पथिकेति । पथिकानां यः अङ्गनाजनः स्त्रीजनः तेषां परासनं मारणं तस्मात् जातैर्गुरुपातकैर्व्याप्ता इव । उत्प्रेक्षते—हविषा होतव्यद्रव्येण आचिता व्याप्ता, अर्थात् कृष्णा अंजनघना कज्जलनिविडा द्युतिः कान्तिर्येषां ते । एवंभूता भ्रमरा वनं वनं प्रति भ्रमिरा भ्रमणशीलाः शुशुभिरे ॥ ३६ ॥

३७–४०. इतीति । अदसीयेति । घनसारेति । प्रचलदिति । स वीरमाग्रजकुमारवरो **हम्मीरदेवः**, तरुराज्या वृक्षश्रेण्या राजितं, पुरस्य उपसमीपे वनं पुरोपवनं, प्रययौ प्रयाति स्म । किं० ष्टः सः? सह यौवनवयसा वर्त्तन्ते ये ते सयौवनवयसः, एवंभूता ये सवयसः तुल्यवयसः अर्थान्मित्राणि, तेषां परिहासेन भासुरतरो देदीप्यमानः आस्यशशी मुखचन्द्रमा यस्य सः, कीदृशं उपवनम्? प्रचलन्तीषु दलावलीषु पत्रश्रेणीषु लसन् विलसन् पवनो यत्र, तत्, तत् । पुनः कीदृशः? घनसारं कर्पूरं सारा प्रधाना मृगनाभिः कस्तूरी ताभ्यां मिलन् यो मलयद्रुश्चन्दनभेदो नागजरजश्च सिन्दूरक्षोदश्च तयोः प्रकारास्तैः, करणभूतैः, कृतदेवनः कृतक्रीडाविनोदः । पुनः किं० ष्टः? वनविनोदं चिकीर्षतीति [प० ६०.१] कर्तुमिच्छतीति वन० । पुनः किं वि० ष्टः? अवरोधोऽन्तःपुरं तत्र बन्धुरा मनोहरा या वध्वस्तैर्मधुरः अ० । ४०।३९ । किं विधाय? वीक्षणयुगेन नेत्रयुग्मेन प्रसभं बलादाहृतः संमदो हर्षो येन स तम् । ईदृशं अमुं प्रत्यक्षोल्लिख्यमाणं वसन्तकालं इति वीक्ष्य दृष्ट्वा । कालस्य दर्शनानर्हत्वाद् विप्रकृष्टत्वाच्च, अदस्-शब्दस्योल्लेखः । पुनः किं विधाय? जैत्रं पृथ्वीपतिं पितरं परिपृच्छ्य । ३८ । किं कुर्वन्? अस्येदमदसीयम्, अदसीयं यद्रूपं तस्य, या विलुलोकयिषा द्रष्टुमिच्छा तया, गृहं गृहं अनु अनुगृहं अधिरूढा या ललना स्त्रियस्तासां वदनानि तैः, हेतुभिः, दिनेऽपि व्योमतलं विस्फुरन्ति अनेकानि यानि सुधाकरबिम्बानि यस्मिन्, तत् । एवंभूतं जनयन् कुर्वन् । चतुर्भिर्वृत्तैरेकः संबन्धः ॥ ३७–४० ॥

४१. तरुणेति । अथानन्तर्ये, मदकृन्मदकारको यो मधूत्सवो वसन्तमहस्तत्कृते तन्निमित्तं तदर्थमिति यावत् । मदनोद्यमेन दीप्ता दीप्तिः कान्तिर्यासां ताः । ततः कर्म्मधारयः । सुतनूभिर्नारीभिरमा सह सार्द्धमिति यावत् । योग्यतमवस्त्रधारकाः युवानश्चेलुः ॥ ४१ ॥

४२. **कृतेति** । हे सखि ! सांप्रतमधुना तव वदनकमलस्य कृतमंडनयापि रुरोदिषया रोदितुमिच्छया कृतं पूर्यताम् । हे सखि ! एहि आगच्छ, इमं दयितं सुतरामत्यर्थं सत्वरं प्रसाद्य वैरिमुदं सपत्नीहर्षं जहि उच्छिन्धि ॥ ४२ ॥

४३. **इतीति** । वृत्तं सुगमम् ॥ ४३ ॥

४४. ***अनुनेतुमिति** । अनुनेतुं प्रसादयितुं नायिकामिति योज्यम् । कमल-[पृ० ६०.२] नेत्राया नायिकाया एव पदयोः पतितस्य कस्यचन पुंसो वेणिर्बभौ । एतस्याः अयं इदमीयस्तम् । अन्यत् सुगमम् ॥ ४४ ॥

४५. ***अनुनेतुमिति** । अन्यतरः पुरुषश्चन्द्रमुखीं अनुनेतुं प्रसादयितुं विविधेङ्गितानि विविधचेष्टितानि निपुणं विदधन् कुर्वन्, तया इन्दुमुख्यैव तरसा तूर्णं आलिंग्यते स्म । कीदृशया ? हसपूर्वं हास्यपूर्वं सूचितं तदिंगितं भर्तृचेष्टितं यया सा, तया ॥ ४५ ॥

४६. ***प्रचलेति** । भर्तृप्रेरिता काचित्सखी दूती वा नायिकां प्रत्याह—अंग इति कोमलामन्त्रणे, हे आलि ! हे सखि ! इतो विवक्षितप्रदेशे प्रचल । आवां काननं अविलोकयावः पश्यावः । स कितवो धूर्तस्तव विरहात् किमातनुते ? इति छलविपर्यीकृत्य काऽपि सखी दूती वा मिषात् कपटेन तां नायिकां उपनीय ढौकयित्वा भर्त्रे ददौ । रतिलक्षणस्थायिभावपर्यन्तमिदं वृत्तम् ॥ ४६ ॥

४७–४८. **अयीति** । **इतीति** । अपि-शब्दो विरोधसूचकः । अधुनापि वसन्तोऽपि, स्वस्य आत्मनः परस्य भर्तुः अहितं स्वपराहितं, नायिकां प्रतिभर्तुः शिष्या(क्षा)दानवृत्तं । शेषं सुगमम् ॥ ४७ ॥ योषितां अनुनीतौ प्रसादने चणः पटुः, सुकृती पुण्यवान्, कश्चन नायि(य)कः । इति पूर्वोक्तप्रकारेण । अन्यत् सुगमम् । कुपितनायिकाप्रसादने सामदामभेद......पेक्षारसान्तरं चेति षडुपायाः । अत्र सामोपायः । रसश्चात्र मानपरित्यागरूपः संभोगात्मा शृङ्गारः ॥ ४८ ॥

४९. **न विलोकेति** । पूर्वार्द्धं सुगमम् । पीतं [पृ० ६१.१] कर्णाभ्यामादरेण श्रुतमङ्गीकृतं च वल्लभस्य भर्त्तुर्वचो यया सा, इतरा काचित् सुरापानतोऽपि अधिकं मदं भावविशेषं वा आप लेभे । धृति-मदभावयोः संकरोऽत्र ॥ ४९ ॥

५०. **नवेति** । अथानन्तरम्, अमी **हम्मीर**सवयसो वरवर्णिनीतुल्यां प्रधानस्त्रीसदृशां वनीं वनभूमिं विलोक्य क्रीडितुं औत्सुक्यं दधुः । वर्णिनीधर्ममारोपयति—नवाः पल्लवा एव अद्भुताः कराः पाणयो यस्याः सा, ताम् । मधुपावलिर्भ्रमरश्रेणिरेव वेणिः कबरी यस्याः सा, ताम् । इद्धाः स्थूलाः पुष्पगुच्छा एव कुचा यस्याः सा, ताम् । पूर्वार्द्धे रूपकम् । उत्तरार्द्धे उपमा ॥ ५० ॥

---

* इत आरभ्य ४६ तमपर्यन्तानि पद्यानि मूलग्रन्थे पौर्वापर्येण रूपेण लिखितान्युपलब्धानि, तानि च तथैव तत्र मुद्रितानि सन्ति । अतः पाठकजनैस्तथैवानुसन्धेयानि तानि अस्माभिर्व्याख्यातानि ।

५१. तरुणीति । स्त्रीगणे निर्दयं यथा स्यादेवं तथा पुष्पावचयं कर्तुं उद्यमवति सति, तरुभिः कम्पितमिव भीतमिव । क्लीबे क्त इति क्तप्रत्ययेन सिद्धम् । कुतः ? प्रवहन् यः पवमानो वायुस्तेन वेल्लिता चालिता या दलालिः पत्रश्रेणी तच्छलात् । अत्र भय-कम्पयोः स्थायिसात्त्विकभावयोः आभासवर्णनम् । उत्प्रेक्षालंकारः ॥ ५१ ॥

५२. प्रविहायेति । उन्मदिष्णव उन्मत्ता ये मधुकरनिकरास्तैः, काचन कमलमुखी उदवेजि । भ्रान्तिमानलंकारः ॥ ५२ ॥

५३. दयितामिति । केनचिन्नायकेन दयितां प्रियां लताग्रं अधिरोहयता आरोपयिता क्वचनापि नाभीजघनादौ तनौ शरीरे यन्नखरक्षतं अदायि, किल इति सत्ये, तन्नखरक्षतं तस्याः हृदये कियतीं मुदं हर्षं नातनोत् ? इति काका । अत्र स्त्रीणां स्वाभाविकः [पृ० ६१.२] कुट्टमितो भावः । यदूचुः श्रीहेमसूरयोऽलंकारचूडामणौ—'अधरादिग्रहात् दुःखेऽपि हर्षः कुट्टमितमिति' ॥ ५३ ॥

५४. सुमेति । केनचन नायकेन क्रुद्धाऽपि सुलोचना सहसं सहास्यं यथा स्यादेवं तथा अहासि । अन्यत् सुगमम् । अज्ञातौ उरोजौ उरोजकौ । दुःखेऽल्पे ज्ञाते वा कः प्रत्ययः । अत्र हासाभिधः स्थायीभावः, क्रोधभावप्रशमश्च ॥ ५४ ॥

५५. अयीति । अयीति कोमलामन्त्रणे, हे वल्लभे इदं कुसुमं मधुरगन्धं इति वदन्, परोऽन्यो विदुरो विचक्षणः सिंघयणकपटात् करं नाशिकासमीपं आप्य तां कान्तां अधरे जग्राह । अत्र ललिताख्यः स्वाभाविको भावः । तल्लक्षणं चैतत्—'मसृणोंगन्यासो ललितम्' ॥ ५५ ॥

५६. मुखचुंबनमिति । पूर्वार्द्धं सुगमम् । भर्त्तरि सखीसमक्षं यथा स्यादेवं इति गदति सति, त्रपया च पुनर्मुदा हर्षेण, परा काचिन्नायिका, समवादि संवाद्यते स्म । त्रपा-हर्षयोः संकरोऽत्र ॥ ५६ ॥

५७. दयितेति । तस्य पदस्य अवाप्तौ लाभे, जात उत्पन्नः पुलकप्रसरो यस्यां, सा । भावश्चात्र कम्पनामा सात्त्विकः । भ्रान्तिमानलंकारः ॥ ५७ ॥

५८. पुरत इति । विजनप्रदेशं एकान्तप्रदेशं रतये संभोगाय अनयत् अनैषीत् ॥ ५८ ॥

५९. अयीति । कितवस्य धूर्त्तस्य उक्तौ परो निपुणः कोऽपि कामी, हसन् सन्, दयितास्तनं हस्तायि(य)त्तीकृत्य, लब्धमिति जगाद । पूर्वार्द्धे कपटोक्तिः । करसादिति 'तद-धीने सादिति' सिद्धम् । लब्धमिति अव्यक्तत्वान्नपुंसकम् ॥ ५९ ॥

६०. अयीति । सुगमम् ॥ ६० ॥

६१. तनुवल्लीति । परया अति[प० ६२.१]विचक्षणया युवत्या वृक्षकपटात् भर्त्ता आलिंग्यते स्म । कीदृग् ? तनुवल्ल्यां संगमितानि संयोजितानि यानि पुष्पाणि, तेभ्यो गलन् यो मकरन्दस्तत्र लुब्धा ये मधुकृन्निकराः भ्रमरसमूहा यस्मिन्, स ॥ ६१ ॥

६२. फलदेति । फलदे वृक्षे अधिरूढो यो हृदयाधिपतिर्भर्त्ता, तत्प्रविलोकनात् अपहृता चेतना संज्ञा संज्ञिसंबन्धरूपा संवित्तिर्यस्याः सा, तया । एवंभूतया परया अन्यया नायिकया, अंग भोः ! इमं प्रसवं पुष्पं वितरेति वीप्सया वृथैव जगदे मुधैवाभाषि । वृक्षे पुष्पाभावो वृथाशब्देन ध्वन्यते । भावश्चात्र सात्त्विकः प्रलयाभिधः ॥ ६२ ॥

६३. इतरेणेति । इतरेण नायकेन गोत्रभिदया नामभेदेन वनितां अनुलक्षीकृत्य कुसुमकन्दुकः प्रहितः । वृक्षाधिरूढेनेति स्वयमूह्यते । अनया स्त्रिया निःश्वसितैः प्रहतः सन् कुसुमकन्दुको न्यवर्तत ऊर्द्ध्वं व्यावर्तत । दुर्भगा सेति स्वयमूह्यते । किमित्युत्प्रेक्षायाम् । प्रति-उदितः प्रेरितस्तां अनवेक्ष्यैव । धृष्टो नायकः । धीराधीरा नायिका । व्यभिचारीभावश्चात्र चिन्ता ॥ ६३ ॥

६४. अयीति । पूर्वार्द्धं सुगमम् । इतरः कोऽपि नायकः । इति पूर्वार्द्धोक्तयुक्त्या दयितां स्वभार्यां विप्रतार्य, अर्द्धदृशा अर्द्धावलोकनेन, परां अन्यां नायिकां सुचिरं निपपौ अत्यर्थं पश्यति स्म ॥ ६४ ॥

६५. तरुराजीति । पञ्चम्यर्थे तस् । वृक्षश्रेण्याः विकसितपुष्पसमूहान् मस्तके स्थाप्य प्रयतीं यातीं परां नायिकां भ्रमरा रुरुधुः । उपमालंकारः । भ्रमररोधोत्कर्षवर्णनात् । पद्मिनी संभा० [प० ६१,२] ....

[इतोऽग्रे प्रतिः खण्डिता]

***

हम्मीरकाव्यदीपिकान्तरुल्लिखितानां ऐतिहासिकनाम्नां सूचिः।

***

हम्मीरकाव्यदीपिकान्तरुल्लिखितानां ग्रन्थानां ग्रन्थकाराणां च नाम्नां सूचिः ।

***